॥ इत्यनुक्रमणिका समाप्ता ॥

श्रीगणेशायनमः ॥श्रीसरस्वत्यैनमः ॥ श्रीवेदपुरुषायनमः॥गणनाथ
सरस्वतीरविशुक्रबृहस्पतीन् ॥ पंचैतान्संस्मरेन्नित्यंवेदवाणीप्रवर्त्तते
॥१॥अथानुवाकसूत्रम् ॥ इषेत्वैका,वसोःपवित्रंतिस्रोऽग्नेव्रतपतेसप्त,
पवित्रेस्थोद्वे,शर्म्मासितिस्रो, धृष्टिरसिशर्म्मासिद्विकौ, देवस्यत्वाति
स्रो,देवस्यत्वापञ्च,प्रत्युष्टꣳरक्षस्तिस्रो,दशैकत्रिꣳशत्।हरिः ॐ इषेत्त्वा॑।
इ॒षे॒त्त्वो॒र्ज्जेत्त्वा॑वा॒यव॑स्स्थदे॒वोवः॑स॒वि॒ताप्प्रार्प्प॑यतु॒श्श्रेष्ठ॑तमाय॒कर्म्म॑ण॒
ऽआप्प्या॑यध्वमघ्न्या॒ऽइन्द्रा॑यभा॒गम्प्र॒जाव॑तीरनमी॒वाऽअ॑य॒क्ष्मामाव॑
स्तेनऽई॑शतमाघशꣳसोध्ध्रु॒वाऽअ॒स्मिन्गोप॑तौस्यातब॒ह्वीर्यज॑मानस्य

संहि.
॥ १ ॥

पशून्पाहि ॥ १ ॥ [१]व्वसोः पवित्रम्॥व्वसोः पवित्रमसि द्यौरसि पृथिव्य
सि मातरिश्वनो घर्म्मोऽसि व्विश्वधाऽअसि ॥ परमेण धाम्म्ना दृꣳहस्स्व मा
ह्वार्म्मा ते यज्ञपतिर्ह्वार्षीत् ॥२॥ व्वसोः पवित्रम्॥व्वसोः पवित्रमसि शतधा
रं व्वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु व्वसोः पवित्रेण
शतधारेण सुप्प्वा कामधुक्षः ॥ ३ ॥ सा व्विश्वायुः ॥ सा व्विश्वायुः सा व्वि
श्वकर्म्मा सा व्विश्वधायाः ॥ इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि व्वि
ष्णो हव्यꣳ रक्ष ॥ ४ ॥ [३] अग्ने व्व्रतपते । व्व्रतश्चरिष्यामि तच्छके
यन्तन्मे राद्ध्यताम् ॥ इदमहमनृतात्सत्त्यमुपैमि ॥ ५ ॥ कस्त्वा ।

पू. अ.
१

युनक्ति सत्त्वा युनक्ति कस्मैत्त्वा युनक्ति तस्मैत्त्वा युनक्ति ॥ कर्म्मणे वां
वेषाय वाम् ॥ ६ ॥ प्रत्युष्टꣳ रक्षः ॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा ऽअरातयो नि
ष्टप्तꣳ रक्षो निष्टप्ता ऽअरातयः उर्व्वन्तरिक्षमन्वेमि ॥ ७ ॥ धूरसि । धू
र्व्व धूर्व्वन्तन्धूर्व्व तं योस्मान्धूर्व्वति तन्धूर्व्व यं व्वयन्धूर्व्वामः ॥ देवानामसि व
न्हितमꣳ सस्नितमम्पप्रितमञ्जुष्टतमन्देवहूतमम् ॥ ८ ॥ अह्रुत
मसि । हविर्द्धानन्दृꣳहस्व माह्वार्म्मा ते यज्ञपतिर्ह्वार्षीत् ॥ विष्णु
स्त्वाक्रमतामुरुव्वाताया पहतꣳ रक्षो यच्छन्ताम्पञ्च ॥ ९ ॥ देवस्य
त्वा । सवितुः प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ अग्न

येजुष्टंङ्गृह्णाम्म्युग्नीषोमांभ्याञ्जुष्टंङ्गृह्णामि ॥ १०॥ भूतायंत्त्वा॥भूता
यंत्त्वुानारांतयेस्वृरभिविकख्यैषुन्द्दृꣳहंन्तुान्दुर्ख्याꣳपृथिव्यामुर्वुन्तारि
क्षमन्न्वेंमिपृथिव्यास्त्त्वानाभौंसादयाम्म्यदित्त्याऽउपस्त्थेग्नेंहव्यꣳ
रंक्ष॥११॥[७] पुवित्त्रेंस्त्थः ॥ पुवित्त्रेंस्त्थोव्वैष्णव्व्यौसवितुर्व्वं÷प्प्रसुव
ऽउत्त्पुंनाम्म्याच्छिद्द्रेणपुवित्त्रेंणसूर्य्यंस्यरश्मिभिं÷ ॥ देवीरापोऽअग्ग्रे
गुवोऽअग्ग्रेपुवोग्ग्रंऽइममुद्ययुज्ञन्नयुताग्ग्रेयुज्ञपंतिꣳसुधातुंय्युज्ञपंति
न्देवुयुवम्॥१२॥युष्म्माऽइन्द्रं÷॥ युष्म्माऽइन्द्रोवृणीतव्वृत्त्रुतूर्य्येयूयमि
न्द्रंमवृणीद्ध्वंव्वृत्त्रुतूर्य्येप्प्रोक्षितास्त्था। अग्ग्नयेंत्त्वाजुष्टम्म्प्रोक्षाम्म्युग्नी

षोमा॑भ्यान्त्वा॒जुष्ट॒म्प्रोक्षा॑मि ॥ दैव्या॑य॒कर्म्म॑णेशुन्धद्ध्वन्दे॒वय॒ज्ज्या
यै॒षद्वो॑शु॑द्धाःपराज॒घ्नुरि॒द॑व॒स्तच्छु॑न्धामि॥१३॥[२]शर्म्मा॑सि॥शर्म्मा॒
स्यव॑धूर्तꣳरक्षोव॑धूताऽअरा॑तयो॒दि॑त्या॒स्त्वगा॑सि॒प्प्राति॒त्त्वादि॑तिर्वे॑त्तु ॥
अद्रि॑रसि॒वा॑नस्प॒त्त्योग्ग्रावा॑सिपृथु॑बु॒ध्नःप्प्रति॒त्त्वादि॑त्त्या॒स्त्वग्ग्वे॑त्तु ॥
॥१४॥अग्ने॒स्त॒नूः॥अग्ने॒स्त॒नूर॑सि॒वा॒चोवि॒सर्ज्ज॑नन्दे॒ववी॑तये॒त्त्वा॒गृह्णा
मिबृ॒हद्ग्रा॑वासि॒वा॒नस्प॒त्त्यःसऽइ॒दन्दे॒वेभ्यो॒ह॒विः॑शमी॒ष्वसु॒शमि॑शमी
ष्व ॥ ह॒वि॑ष्कृदेहि॒ह॒वि॑ष्कृदे॑हि ॥१५॥ कु॒क्कु॒टो॑सि॥कु॒क्कु॒टो॑सि॒मधु॑जिह्व॒ऽ
इष॒मूर्ज्ज॒मावद॒त्त्वया॑व॒यꣳसङ्घा॒तꣳसङ्घा॒तञ्जेष्म॒व॒र्ष॑वृद्ध॑मासि॒प्प्राति॒त्त्वाव॒

र्षवृ॑द्धंव्वेत्तु॒परा॑पूत॒ꣳरक्ष॒ःपरा॑पूता॒ऽअरा॑त॒यो॒ऽप॑हत॒ꣳरक्षो॑व्वा॒युर्व्वो॒व्विवि॑नक्तु दे॒वोव॑ःसवि॒ताहिर॑ण्यपाणि॒ःप्रति॑गृभ्णा॒त्वच्छि॑द्रेणपा॒णिना॑ ॥१६॥ [३]धृष्टि॑रसि॥धृष्टि॑र॒स्यपा॑ग्ने॒ऽअ॒ग्निमा॒माद॑ञ्जहि॒निष्क्र॒व्याद॑ꣳसे॒धादे॑व॒यजं॑वह॥ध्रु॒वम॑सिपृथि॒वीन्दृ॑ꣳहब्रह्म॒वनि॑त्वाक्षत्र॒वनि॑सजात॒वन्युप॑दधामि॒भ्रातृ॑व्यस्यव॒धाय॑ ॥ १७ ॥ अग्ने॒ब्रह्म ॥ अग्ने॒ब्रह्म॑ङ्गृभ्णीष्वध॒रुण॑मस्य॒न्तरि॑क्षन्दृꣳहब्रह्म॒वनि॑त्वाक्षत्र॒वनि॑सजात॒वन्युप॑दधामि॒भ्रातृ॑व्यस्यव॒धाय ॥ ध॒र्त्रम॑सिदि॒वन्दृꣳहब्रह्म॒वनि॑त्वाक्षत्र॒वनि॑सजात॒वन्युप॑दधामि॒भ्रातृ॑व्यस्यव॒धाय॑ ॥ व्विश्वा॑भ्यस्त्वा॒शाभ्य॒ऽउप

दधा॑मि॒चित॑स्त्थो॒र्द्ध्वचि॑तो॒भृगू॑णा॒मङ्गि॑रसा॒न्तप॑सातप्प्यद्ध्व॒म् ॥ १८ ॥
[२] । शर्म्मा॑सि ॥ शर्म्मा॒स्यव॑धू॑त॒ꣳरक्षो॒व॑धूता॒ऽअरा॑त॒योदि॑त्त्यास्त्व
ग॑सि॒प्प्रति॒त्त्वादि॑तिर्व्वे॑त्तु । धि॒षणा॑सिपर्व्व॒तीप्प्रति॒त्त्वादि॑त्त्या॒स्त्वग्ग्वे॑त्तु
दि॒वस्क॑म्भ॒नीर॑सिधि॒षणा॑सिपार्व्व॑ते॒यीप्प्रति॑त्त्वापर्व्व॒तीव्वे॑त्तुधा॒न्न्य॒मसि
॥ १९ ॥ धा॒न्य॒मसि । धि॒नु॒हिदे॒वान्प्रा॒णाय॑त्त्वोदा॒नाय॑त्त्वाव्व्या॒ना
य॑त्त्वा ॥ दी॒र्ग्घा॑मनु॒प्प्रसि॑तिमायु॑षेधान्दे॒वोव॑÷सवि॒ताहिर॑ण्ण्यपाणि॒ः
प्प्रति॑गृब्भ्णा॒त्त्वच्छि॑द्द्रेणपा॒णिना॒चक्षु॑षेत्त्वाम॒हीना॒म्पयो॑सि ॥ २० ॥
[३] दे॒वस्य॑त्त्वा । सवि॒तुःप्प्र॑स॒वे॒श्विनो॑र्ब्बा॒हुब्भ्यां॑म्पू॒ष्ण्णोहस्ता॑ब्भ्या

संहि.
॥१॥

म् ॥ संव्वपामिसमापऽओषधीभिःसमोषधयोरसेन ॥ सꣳरेवतीर्ज्जगती
भिःपृच्च्यन्ताꣳसम्मधुमतीर्म्मधुमतीभिःपृच्च्यन्ताम् ॥२१॥ जनय
त्यैत्त्वा । संय्यौमीदमग्नेरिदमग्नीषोमयोरिषेत्त्वाघर्म्मोसिविश्वा
युरुरुप्प्रथाऽउरुप्प्रथस्वोरुतेयज्ञपतिःप्प्रथतामग्निष्टेत्त्वचम्माहिꣳसी
द्देवस्त्त्वासविताऽश्रपयतुव्वर्षिष्ठेधिनाके ॥ २२ ॥ माभेः ॥ माभेर्म्मासं
व्विक्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्यप्प्रजाभूयात्त्रितायत्त्वाद्द्वि
तायत्त्वैकतायत्त्वा ॥ २३ ॥ [३] देवस्यत्त्वा । सवितुःप्प्रसवेश्विनो
र्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेद्ध्वरकृतन्देवेभ्यऽइन्द्रस्य

पू.अ.
१

बाहुरंसिदक्षिणःसुहस्त्रंभृष्टिः शुततैजाव्वायुरंसितिग्ग्मतजाद्विषुतोव्वु
धः ॥ २४ ॥ पृथिविदेवयजुनि ॥ पृथिविदेवयजुन्न्योषद्ध्यास्त्तेमूलु
म्माहिंᳪसिषंव्व्रजङ्गच्छगुोष्ठानंव्वर्षंतुतेद्यौर्ब्बधानदेवसावितःपरुमस्यांम्पृ
थिव्व्याᳪशुतेनुपाशैर्य्योस्म्मान्द्वेष्टियञ्चवंयान्द्विष्म्मस्त्तमतुोमामौक्
॥२५॥ अपाररुंमृ॥अपाररुम्म्पृथिव्व्यैदेवयजनाद्वद्ध्यासंव्व्रजङ्गच्छगो
ष्ठानंव्वर्षंतुतेद्यौर्ब्बधानदेवसवितःपरमस्यांम्पृथिव्व्याᳪशुतेनुपाशैर्य्यो
स्मान्द्वेष्टियञ्चवंयन्द्विष्म्मस्त्तमतुोमामौक् ॥ अरंरुोदिवुम्मापंप्तोद्र
प्प्सस्त्तेद्याम्मास्कन्व्व्रजङ्गच्छगुोष्ठानंव्वर्षंतुतेद्यौर्ब्बधानदेवसवितःपरुम

स्या॑म्पृथि॒व्याꣳश॒तेन॒पाशै॒र्य्यो॑स्मान्द्वे॑ष्टि॒यश्च॑व्व॒यान्द्वि॒ष्मस्तम॒तोमा
मौ॑क् ॥ २६ ॥ गा॒य॒त्रेण॑त्त्वा।गा॒य॒त्रेण॑त्त्वा॒च्छन्द॑सा॒परि॑गृह्णामि॒त्रै
ष्टु॑भेनत्त्वा॒च्छन्द॑सा॒परि॑गृह्णामि॒जाग॑तेनत्त्वा॒च्छन्द॑सा॒परि॑गृह्णामि ॥
सु॒क्ष्मा॒चा॑सि॒शि॒वा॒चा॑सि॒स्यो॒ना॒चा॑सि॒सु॒ष॒दा॑चा॒स्यूर्ज्जँ॑स्वती॒चा॑सि॒प
य॑स्वती॒च ॥ २७ ॥ पु॒रा॒क्रू॒रस्य॑ । व्वि॒सृपो॑व्वि॒राप्प्स॒न्नु॒दा॒दा॒य॑पृ॒थि॒वी
ञ्जी॒वदा॑नुम् ॥ या॒मैर॑यँश्च॒न्द्रम॑सि॒स्व॒धा॒भि॒स्ता॒मु॒धीरा॑सोअनु॒दि॒श्य॑य॒
जन्ते ॥ प्रोक्ष॑णी॒रा॒सा॑द॒य॒द्वि॒ष॒तो॒व्व॒धो॒सि ॥२८॥[५] प्रत्त्यु॑ष्ट॒ꣳरक्ष॑ः ॥
प्रत्त्यु॑ष्ट॒ꣳरक्ष॒ः प्रत्त्यु॑ष्टा॒ऽअरा॑त॒यो॒निष्ट॑प्त॒ꣳरक्षो॑निष्ट॑प्ता॒ऽअरा॑तयः ॥

आनिशितोसिसपत्नक्षिद्वाजिनन्त्वाव्वाजेद्ध्यायैसम्मार्ज्मि ॥ प्रत्य
ष्टुँरक्षुः प्रत्त्युष्टाऽअरातयोनिष्टप्तुँरक्षोनिष्टप्प्ताऽअरातयः ॥ आनि
शितासिसपत्नक्षिद्वाजिनीन्त्वाव्वाजेद्ध्यायैसम्मार्ज्मि ॥ २९ ॥
अदित्त्यैरास्नासि । व्विष्ण्णोर्व्वेष्प्पोस्यूर्ज्जेत्त्वादब्धेनत्त्वाचक्षुषा
वपश्यामि ॥ अग्ग्नेर्ज्जिह्वासिसुहूर्द्देवेब्भ्योधाम्म्नेधाम्म्नेमेभवयजु
षेयजुषे ॥ ३० ॥ सवितुस्त्त्वा । प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रे
णपवित्त्रेणसूर्य्यस्यरश्म्मिभिः ॥ सवितुर्व्वःप्प्रसवऽउत्पुनाम्म्य
च्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्म्मिभिः ॥ तेजोसिशुक्क्रमस्यमृतम

सिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ३१ ॥ [३]
इतिश्रीव्वाजसनेयसंहितायांप्रथमोऽध्यायः॥ १॥श्रीवेदपुरुषायनमः॥
अनुवाकसूत्रम्॥ कृष्ण्णोसिषड,ग्नेवाजजित्तिस्रो, मर्याद, मग्नीषोम
योःपञ्चका,वग्नेदब्धायो चतस्रः,संवर्च्चसापञ्चा, ग्नयेकव्यवाहनायष
ट्,सप्तचतुस्त्रिंशत्॥हरिःॐ कृष्णोऽसि॥कृष्ण्णोस्याखरेष्ठोग्नयेत्त्वाजु
ष्टम्प्रोक्षामिवेदिरसिबर्हिषेत्त्वाजुष्टाम्प्रोक्षामिबर्हिरसिस्रुग्भ्यस्त्वाजु
ष्टम्प्रोक्षाम्यदित्यैव्युन्दनम्॥ १॥अदित्यैव्युन्दनमसिविष्ण्णोस्तुपो
स्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्थान्देवेभ्योभुवपतयेस्वाहाभुवन-

पत॒ये॒स्वाहा॑भू॒ता॒ना॒म्पत॑ये॒स्वाहा॑ ॥ २ ॥ ग॒न्ध॒र्व्वस्त्वा॑ । वि॒श्वाव॑सुः
परि॑दधातु॒वि॒श्व॒स्या॒रि॑ष्ट्यै॒यज॑मानस्य॒परि॒धिर॑स्य॒ग्नि॒रि॒डऽई॒डि॒तः ॥
इन्द्र॑स्यबा॒हुर॑सि॒दक्षि॑णो॒वि॒श्व॒स्या॒रि॑ष्ट्यै॒यज॑मानस्य॒परि॒धिर॑स्य॒ग्नि
रि॒डऽई॒डि॒तः ॥ मि॒त्रावरु॑णौ॒त्वो॒त्तर॒तः परि॑धत्तान्ध्रु॒वेण॒धर्म्म॑णा॒वि॒श्व
स्या॒रि॑ष्ट्यै॒यज॑मानस्य॒परि॒धिर॑स्य॒ग्नि॒रि॒डऽई॒डि॒तः ॥ ३ ॥ वी॒तिहो॑त्र॒
न्त्वा । क॒वे॒द्युम॒न्त॒ꣳसमि॑धीमहि ॥ अग्ने॑बृ॒हन्त॑मध्व॒रे ॥ ४ ॥ स॒मिद॑सि ॥
स॒मिद॑सि॒सू॒र्य्य॑स्त्वापु॒रस्ता॑त्पा॒तुक॒स्या॑श्चिद॒भिश॑स्त्यै ॥ स॒वि॒तु
र्बा॒हू स्त्थ॒ऽऊर्ण्ण॑म्म्रद॒सन्त्वा॒स्तृ॒णा॒मि॒स्वा॒स॒स्थन्दे॒वेभ्य॒ऽआत्वा॒व

संवोरुद्राऽआदित्त्याःसंदन्तु ॥५॥ घृताच्च्यसि । जुहूर्न्नाम्म्नासेदम्म्प्रि
येणधाम्म्नांप्प्रियꣳसदऽआसीदघृताच्च्यस्युपभृन्नाम्म्नासेदम्म्प्रियेण
धाम्म्नांप्प्रियꣳसदऽआसीदघृताच्च्यसिद्ध्रुवानाम्म्नासेदम्म्प्रियेणधा
म्म्नांप्प्रियꣳसदऽआसीदप्प्रियेणधाम्म्नांप्प्रियꣳसदऽआसीद ॥ ध्रुवाऽ
असदन्नृतस्ययोनौताव्विष्ण्णोपाहिपाहियज्ञम्म्पाहियज्ञपतिंपाहिमां
य्यंज्ञन्न्यम् ॥ ६ ॥ [६] अग्ग्नेव्वाजजित् ॥ अग्ग्नेव्वाजजिद्वाजं
न्त्वासरिष्ष्यन्तंव्वाजजितꣳसम्मार्ज्ज्मि ॥ नमोदेवेब्भ्यःस्वधापि
तृब्भ्यःसयमेमेभूयास्त्तमस्कन्नमद्य ॥ ७ ॥ अस्कन्नमद्य ।

दे॒वेभ्य॒ऽआज्ज्य॒ꣳसम्भ्रियास॒माङ्घ्रिणाव्विष्ण्णो॒मात्त्वावक्क्रमिषं॒व्वसं॒म
तीमग्ग्नेतेच्छायामु॒पस्त्थेषं॒व्विष्ण्णो॒स्त्थानमसीतऽइन्द्द्रोव्वी॒र्य्यमकृ
णोदू॒र्द्ध्वोऽद्ध्व॒रऽआस्त्थात् ॥ ८ ॥ अग्ने॒व्वेः ॥ अग्ने॒व्वे॒र्हो॒त्रं॒व्वे॒र्दू॒त्य॒मव
ता॒न्त्वान्द्द्यावापृथि॒वीऽअव॒त्त्वन्द्द्यावापृथि॒वीस्स्विष्ट॒कृद्दे॒वेभ्य॒ऽइन्द्र॒ऽ
आज्ज्येनह॒विषाभू॒त्स्वाहा॒सञ्ज्ज्योति॒षा॒ज्ज्योतिः ॥ ९ ॥ [३]
मयीदम् ॥ मयी॒दमिन्द्र॒ऽइन्द्रि॒यन्दधात्त्व॒स्मान्न्रायो॒मघवानः
सचन्ताम् ॥ अस्माकꣳसन्त्वा॒शिषः स॒त्त्यानः सन्त्वा॒शिष॒ऽउप
हूतापृथि॒वीमा॒तोप॒माम्पृथि॒वीमा॒ताह्वयताम॒ग्निराग्नीद्ध्रात्स्वाहा ॥

॥१०॥ उप॑हूतो॒ द्यौः॥ उप॑हूतो॒ द्यौष्पि॒ता॑ पुमान्द्यौष्पि॒ता ह्व॑यताम॒ग्नि
राग्नीध्रात्स्वाहा ॥ दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू
ष्णो हस्ता॑भ्याम् ॥ प्रति॑गृह्णाम्म्य॒ग्नेष्ट्वा॒स्ये॑न॒ प्प्राश्ना॑मि ॥११॥ एत
न्ते॑। देव सवितर्य्य॒ज्ञम्प्राहु॒र्बृह॒स्प्पत॑ये ब्र॒ह्मणे॑ ॥ तेन॑ य॒ज्ञम॑व॒ तेन॑ य॒ज्ञप॑
ति॒न्तेन॒ माम॑व ॥१२॥ मनो॑ जू॒तिः॥ मनो॑ जू॒तिर्ज्जु॑षता॒माज्य॑स्य॒ बृह॒स्प्प
ति॑र्य्य॒ज्ञमि॒मन्त॑नो॒त्त्वरि॑ष्टंय्य॒ज्ञꣳ समि॒मन्द॑धातु ॥ विश्श्वे॑ दे॒वास॑ऽइ॒
हमा॑दयन्ता॒मो३म्प्रति॑ष्ठ ॥ १३ ॥ एषा ते॑ऽअग्ने स॒मित्तया॒ वर्द्ध॑स्व॒
चा च॑ प्प्यायस्व ॥ व॒र्द्धि॑षी॒महि॑ च व॒यमा च॑ प्प्यासिषीमहि ॥ अग्ने

व्वाजजि॒द्वाज॑न्त्वाससृ॒वाᳫंसं॑व्वाज॒जित॒ᳫंसम्मा॑र्ज्म्मि ॥ १४ ॥ [५]
अ॒ग्नीषोम॑योरु॒ज्जिति॒म् ॥ अ॒ग्नीषोम॑यो॒रुज्जि॑ति॒मनूज्जे॑षं॒व्वाज॑स्यमा
प्प्र॒स॒वेनु॒प्प्रोहा॑मि ॥ अ॒ग्नीषोमौ॒तमप॑नुदतां॒य्यो॒स्मान्द्वेष्टि॒यश्च॑व्व॒य
न्द्वि॒ष्मोव्वाज॑स्यैनम्प्रस॒वेनापो॑हामि। इन्द्रा॒ग्न्योरु॒ज्जि॑ति॒मनूज्जे॑षं॒व्वाज
स्यमाप्प्रस॒वेनु॒प्प्रोहा॑मि ॥ इन्द्रा॒ग्नीतमप॑नुदतां॒य्यो॒स्म्मान्द्वेष्टि॒यश्च॑
व्व॒यन्द्वि॒ष्मोव्वाज॑स्यैनम्म्प्रस॒वेनापो॑हामि ॥ १५ ॥ व॒सु॑भ्यस्त्त्वा ॥
रु॒द्रेभ्य॑स्त्त्वादि॒त्त्येभ्य॑स्त्त्वा॒सञ्जा॑नाथान्द्यावापृथिवीमि॒त्त्रावरु॑णौ
त्त्वावृष्ट्या॑वताम् ॥ व्यन्तु॒वयो॒क्क्तᳫंरिहा॑णामरु॒ताम्म्पृष॑तीर्ग्गच्छव॒

शापृश्न्निर्ब्भूत्त्वादिवङ्गच्छततौंनोव्वृष्टिमावह ॥ चक्षुष्प्पाऽअग्ग्ने
सिचक्षुंर्म्मेंपाहि ॥ १६ ॥ यम्पंरिधिम् ॥ यम्पंरिधिम्पर्य्यधत्थाऽ
अग्ग्नेदेवपणिभिर्ग्गुह्यमानः ॥ तन्तऽएतमनुजोषम्भराम्म्युषनेत्त्व
देपचेतयाताऽअग्ग्नेः प्प्रियम्पाथोपीतम् ॥ १७ ॥ सꣳस्रवभागा
स्त्थ ॥ सꣳस्रवभागास्त्थेषाबृहन्तः प्प्रस्तरेष्ठाःपरिधेयाश्च्चदेवाः ॥
इमांव्वाचमभिविश्श्वेगृणन्तऽआसद्यास्म्मिन्बर्हिषिमादयद्ध्वꣳस्वा
हाव्वाट् ॥ १८ ॥ घृताचीस्त्थः ॥ घृताचीस्त्थोधुर्य्यौपातꣳसुम्म्ने
स्त्थःसुम्म्नेमाधत्तम् ॥ यज्ञनमश्च्चतऽउपचयज्ञस्यशिवेसन्तिष्ठ

स्वास्विष्टमेसन्तिष्ठस्व ॥ १९ ॥ [५] अग्नेदब्धायो । शीत
मपाहिमांदिद्योःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्याऽअविष
न्नः पितुङ्कृणुसुषदायोनौस्वाहावाडग्नयेसंवेशपतयेस्वाहासरस्वत्यै
यशोभगिन्यैस्वाहा ॥ २० ॥ वेदोसि ॥ वेदोसियेनत्त्वन्देववेद
देवेभ्योवेदोभवस्तेनमह्यंवेदोभूयाः ॥ देवागातुविदोगातुंवित्त्वा
गातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ॥ २१ ॥ स
म्बर्हिः ॥ सम्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्यैर्वसुभिःसम्मरुद्भिः ॥ स
मिन्द्रोविश्वदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा ॥ २२ ॥ कस्त्वा ॥

कस्त्वाव्विमुञ्चतिसत्त्वाव्विमुञ्चतिकस्म्मैत्त्वाव्विमुञ्चतितस्म्मैत्त्वाव्विमु
ञ्चति ॥ पोषायरक्षसाम्भागोसि॥२३॥ [४] संव्वर्च्चसा ॥ संव्वर्च्चसापय
सासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्त्रोव्विदधातुरायो
नुमार्ष्टुतन्न्वोयद्द्विलिष्टम्॥२४॥ दिविव्विष्ण्णुः। दिविविष्ण्णुर्व्व्यक्क्रꣳस्त
जागतेनच्छन्दसाततोनिर्ब्भक्तोयोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मोन्त
रिक्षेव्विष्ण्णुर्व्व्यक्क्रꣳस्तत्त्रैष्टुभेनच्छन्दसाततोनिर्ब्भक्तोयोस्म्मान्द्वेष्टि
यञ्चवयन्द्विष्म्मः पृथिव्व्यांव्विष्ण्णुर्व्व्यक्क्रꣳस्तगायत्त्रेणच्छन्दसाततो
निर्ब्भक्तोयोस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मोस्म्मादन्नादस्यैप्प्रतिष्ठायाऽ

अगन्मुस्वुः सञ्ज्योतिषाभूम ॥ २५ ॥ स्वयुम्भूरंसि ॥ स्वयुम्भूरंसि
ꣳश्रेष्ठोरुश्मिर्व्वर्च्चोदाऽअसिवर्च्चोमेदेहि ॥ सूर्य्यस्यावृतुमन्वावर्त्ते ॥
॥२६॥अग्ने गृहपते ॥ सुगृहपुतिस्त्वयाग्नेहङ्गृहपतिनाभूयासꣳसुगृह
पुतिस्त्वम्मयाग्नेगृहपतिनाभूयाः ॥ अस्थूरिणौगार्हपत्त्यानिसन्तुशुत
ꣳहिमाःसूर्य्यस्यावृतुमन्वावर्त्ते ॥ २७ ॥ अग्नेव्रतपते ॥ अग्नेव्रतपते
व्रतमंचारिषन्तदशकुन्तन्मेराधीदमुहंय्यऽएवास्म्मिसोस्म्मि ॥२८॥
[५] अग्नयेकव्युवाहनायु ॥ अग्नयेकव्युवाहनायुस्वाहासोमायपि
तृमतेस्वाहा ॥ अपहताऽअसुरारक्षाꣳसिवेदिषदः ॥ २९ ॥ येरूपाणि ॥ ये

रूपाणिप्प्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्म्मात् ॥ ३० ॥ अत्त्रपितरः ॥ अत्त्रपितरोमादयध्वंय्यथाभागमावृषायध्वम् ॥ अमीमदन्तपितरोयथाभागमावृषायिषत ॥ ३१ ॥ नमोवःपितरोरसाय नमोवःपितरःशोषायनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोराय नमोवः पितरोमन्न्यवेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवः पितरोदेष्म्मैतद्वःपितरोवासऽआधत्त ॥ ३२ ॥ आधत्त । पितरोगर्ब्भंकुमारम्पुष्करस्रजम् ॥ यथेहपुरुषोसत् ॥ ३३ ॥ ऊर्ज्जं

व्वहन्तीः ॥ ऊर्ज्जंव्वहन्तीरमृतङ्घृतम्पयःकीलालम्परिस्रुतम् ॥ स्वधा
स्त्थंतर्प्पयंतमेपितॄन्॥३४॥ [६] इतिश्रीवाजसनेयसंहितायांद्विती
योऽध्यायः॥२॥ श्रीवेदपुरुषायनमः॥ अनुवाक्सूत्रम्॥ समिधाग्निम्,
भूर्भुवःस्वश्चतुष्कावाग्निर्ज्योतिर्द्धे, उपप्रयन्तःषडिंशतिर्भूर्भुवः स्वः
श्चतस्रो, गृहामातिस्रः। प्प्रघासिनः पञ्च, पूर्ण्णादर्व्विद्वे,ऽअक्षन्नमीमद
न्तषडे षतेसप्त, दश॥१०॥त्रिषष्टिः॥हरिःॐसमिधाग्निम् ॥ समिधा
ग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम् ॥ आस्मिन्हव्याजुहोतन॥१॥सुस
मिद्धायशोचिषे॥ सुसमिद्धायशोचिषेघृतन्तीव्रञ्जुहोतन॥ अग्नयेजा

तवैदसे ॥ २ ॥ तन्त्वां ॥ तन्त्वां सुमिद्भिराङ्गिरोघृतेनंवर्द्धयामसि ॥
बृहच्छोचायविष्ठ्य ॥ ३ ॥ उपंत्त्वा ॥ उपंत्त्वाग्नेहुविष्म्मंतीर्घृताचीं
र्य्यन्तुहर्य्यत ॥ जुषस्वंसुमिधोममं ॥ ४ ॥ [४] भूर्भुवः ॥ भूर्भुवः
स्वर्द्यौरिवभूम्नापृथिवीवंवरिम्मणा ॥ तस्यांस्तेपृथिविदेवयजनिपृष्ठे
ग्निमंन्नादमन्नाद्यायादधे ॥५॥ आयम् ॥ आयङ्गौः पृश्निरक्रमीदसंद
न्मातरंम्पुरः ॥ पितरंञ्चप्प्रयन्त्स्वः ॥ ६ ॥ अन्तश्चंरति ॥ अन्तश्चंर
तिरोचनास्यप्प्राणादपानती ॥ व्यंख्यन्महिषोदिवम् ॥७॥ त्रिꣳश
द्धाम ॥ त्रिꣳशद्धामविराजतिवाक्पतङ्गायंधीयते ॥ प्रतिवस्तोरहर्द्यु

भिः॥८॥ [४] अग्निर्ज्ज्योतिः ॥ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यःस्वाहा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा॥ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा९॥ सजूर्द्देवेन।सवित्रासजूरात्र्येन्द्रवत्या॥जुषाणोऽअग्निर्व्वेतुस्वाहा॥सजूर्द्देवेनसवित्रासजूरुषसेन्द्रवत्या॥जुषाणःसूर्य्योव्वेतुस्वाहा॥१०॥ [२] उपप्प्रयन्तोऽअद्ध्वरम्॥उपप्प्रयन्तोऽअद्ध्वरम्मन्त्रंव्वोचेमाग्नये॥ आरेऽअस्म्मेचशृण्वते॥११॥ अग्निर्म्मूर्द्धा।दिवःककुत्पतिःपृथिव्याऽअयम्॥ अपाꣳरेताꣳसिजिन्वति।१२॥उभावाम्। उभावामिन्द्राग्नीऽआ

हुवध्याऽउभाराधसःसहमादयध्यै ॥ उभादातारांविषाꣳरयीणामु
भाव्वाजस्यसातयेहुवेवाम् ॥ १३ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्वियोय
तोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोव्वर्द्धयारयिम् ॥ १४ ॥
अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ यम
प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेविशे ॥ १५ ॥ अस्यप्प्र
त्नाम् ॥ अस्यप्प्रत्नामनुद्युतꣳशुक्रन्दुदुह्रेऽअह्रयः ॥ पयःसहस्रसा
मृषिम् ॥ १६ ॥ तनूपाऽअग्ने । सितन्वम्मेपाह्यायुर्दाऽअग्नेस्यायुर्म्मे
देहिवर्च्चोदाऽअग्नेसिवर्च्चोमेदेहि ॥ अग्नेयन्मेतन्वाऽऊनन्तन्मऽआपृ

ण॥ १७॥ इन्धा॑नास्त्वा। श॒तꣳ हि॒मा॑ द्यु॒मन्त॒ꣳ समि॑धीमहि॥ व॒य॑स्वन्तो

व॒य॒स्कृ॒त॒ꣳ सह॑स्वन्तꣳ सह॒स्कृत॑म् ॥ अग्ने॑ सपत्न॒दम्भ॑न॒मद॑ब्धासो॒ऽ

अदा॑भ्यम्॥ चित्रा॑वसो स्व॒स्ति ते॑ पा॒रम॑शीय॥ १८॥ सन्त्वम्॥ सन्त्वम॑

ग्ने॒ सूर्य्यँ॑स्य॒ वर्च्चँ॑सागथाः॒ सम॑ृषी॑णाꣳ स्तु॒तेन॑ ॥ सम्प्रि॒येण॒ धाम्ना॒ सम॒ह

मायु॒॑षा सं वर्च्चँ॑सा स॒म्प्र॒जया॒ सꣳ रा॒यस्पोषे॑ण ग्मिषीय ॥ १९ ॥ अन्ध॑

स्थ ॥ अन्ध॑ स्था॒न्धो॑ वो भक्षीय॒ मह॑स्थ॒ महो॑ वो भक्षी॒योर्ज्ज॑स्थो॒र्ज्जँ॑ वो

भक्षीय रा॒यस्पोष॑स्थ रा॒यस्पोषं॑ वो भक्षीय ॥ २० ॥ रेव॑ती॒रम॑ध्वम्॥ रे

व॑ती॒रम॑ध्वम॒स्मिन्योना॑व॒स्मिन्गो॒ष्ठे॒ऽस्मिँल्लो॒के॒ऽस्मिन्क्षये॑ ॥ इ॒हैव

स्तुमापगात्॥२१॥सꣳहितासि । विश्श्वरूप्प्यूर्ज्जामाविशगौपत्त्येन ॥
उपत्त्वाग्ग्नेदिवेदिदोषावस्त्तर्द्धियाव्वयम् ॥ नमोभरन्तुऽएमसि॥२२॥
राजन्तमद्ध्वराणाम्॥ राजन्तमद्ध्वराणाङ्गोपामृतस्स्युदीदिविम्॥व्वर्द्धमानु
ꣳस्वेदमे॥२३॥सनः॥ सनः पितेवसूनवेग्ग्नेसूपायनोभव॥सच्चस्वानꣳ
स्वस्त्तये॥२४॥अग्ग्नेत्त्वम् ॥ अग्ग्नेत्त्वन्नोऽअन्तमऽउतत्त्राताशिवोभवा
व्वरूत्थ्यः॥व्वसुरग्ग्निर्व्वसुश्श्रवाऽअच्छानाक्षिद्द्युमत्तमꣳरयिन्दाꣳ ॥२५॥
तन्त्वा ॥ तन्त्वाशोचिष्ठदीदिवꣳसुम्म्नायनूनमीमहेसखिब्भ्यꣳ ॥ सनो
बोधिश्श्रुधीहवमुरुष्ष्याणोऽअघायतःसमस्म्मात् ॥२६॥ इडएहि॥इ

डुएह्यदिंतुऽएह्रिकाम्म्युाऽएत॥मयिँवङ्कामुधरंणम्म्भूयात् ॥ २७ ॥
सुोमानुꣳस्वरंणङ्कृणुहिब्ब्रंह्मणस्प्पते॥कुक्षीवंन्तुंय्यऽऔंशिुजः॥२८॥
घोरेुवान् ॥ घोरेुवान्न्योऽअंमीवुहाव्वंसविुत्त्पुंष्टिवर्द्धनः ॥ सनंःसिषक्कु
यस्त्तरः ॥२९॥ मानंः॥मानुःꣳशꣳसुोऽअंरुषोधुर्त्तिःप्प्रणुङ्मत्त्यंस्य ॥
रक्षांणोब्ब्रह्मणस्प्पते ॥ ३० ॥ महिंत्त्रीणाम् ॥ महिंत्त्रीणामवौंरस्तुद्द्यु
क्षम्मित्त्रस्यांय्यर्य्युम्म्णः ॥ दुराधर्षुंव्वरुणस्य ॥ ३१ ॥ नुहितेषांम्॥नुहिते
षांमुमाचुननाद्ध्वंसुव्वारुणेषुं ॥ ईशेंरिपुरुघशꣳसः ॥३२॥ तेहिपुत्त्रासुोऽ
अदिंतेःप्प्रजीवसेमत्त्यांय॥ज्योतिुर्य्यच्छुन्त्यजस्स्रम् ॥ ३३ ॥ कुदाचु

न । स्त्तुरीरांसिनेन्द्रंसश्चासिदाशुषें ॥ उपोपेन्नुमंघवन्भूयऽइन्नुतेदानंन्दे
वस्यंपृञ्च्यते ॥३४॥ तत्त्सवितु॥तत्त्सवितुर्व्वरेण्ण्युम्भर्ग्गौदेवस्यंधीम
हि॥धियोयोनं÷प्प्रचोदयात् ॥३५॥ शतम् १०० परिते॥परितेदूडभो
रथोस्म्माँ२ अंश्नोतुविश्श्वतं÷॥येनुरक्षंसिदाशुषं÷ ॥ ३६ ॥ [२६] भू
र्भुवं÷ ॥ भूर्भुवःस्व÷सुप्प्रजाःप्प्रजाभिं÷स्याꣳसुवीरोवीरैःसुपोषः
पोषैः ॥ नर्य्यप्प्रजाम्मेंपाहिशꣳस्यंपशून्मेपाह्यथर्य्यपितुम्मेपाहि
॥३७॥ आगंन्म । विश्श्ववेंदसमस्म्मभ्यंव्वसुवित्तंमम् ॥ अग्नेसम्म्रा
डभिद्द्युम्न्नमभिसहऽआयंच्छस्व॥३८॥अयमग्निः ॥ अयमग्निर्गृहप

तिग्गार्हपत्त्यꣳप्प्रजायांव्वसुवित्तमꣳ ॥ अग्ग्नेगृहपतेभिद्युम्म्नमभिस
हऽआयच्छस्व ॥३९॥ अयमग्ग्निः ॥ अयमग्ग्निःपुरीष्ष्यारायिमान्न्पु
ष्टिवर्द्धनः ॥ अग्ग्नेपुरीष्ष्याभिद्युम्म्नमभिसहऽआयच्छस्व॥४०॥[४]
गृहामा।बिभीतमावेपद्ध्वमूर्ज्जम्बिब्भ्रतऽएमसि ॥ ऊर्ज्जम्बिब्भ्रद्वꣳसु
मनाःसुमेधागृहानैमिमनसामोदमानः ॥ ४१ ॥ येषामद्ध्ये
ति । प्प्रवसन्न्येषुसौमनसोबहुः ॥ गृहानुपह्वयामहेतेनोजानन्तु
जानतः ॥ ४२ ॥ उपहूताऽइह । गावऽउपहूताऽअजावयः ॥ अथोऽ
अन्नस्यकीलालऽउपहूतागृहेषुनः ॥ क्षेमायवꣳशान्त्यैप्रपद्येशिवꣳशु

ग्ग्मङ्शंय्योःशंय्योः ॥ ४३ ॥ [३] प्रघासिनोहवामहे।मरुतंश्चरिशा
दसः ॥ करम्भेणंसजोषसः ॥ ४४ ॥ यद्ग्रामे॥यद्ग्रामेयदरण्ण्येयत्स
भायंय्यदिन्द्रिये ॥ यदेनंश्चकृमावयमिदन्तदवयजामहेस्वाहा॥४५॥
मोषूण÷ ॥ मोषूणऽइन्द्रात्रंपृत्सुदेवैरस्तिहिष्म्मांतेशुष्म्मिन्नवयाः ॥
महश्चिद्यस्यंमीढुषोयव्याहविष्म्मतोमरुतोवन्दंतेगीः ॥ ४६ ॥ अक्र
न्कर्म्मकर्म्मकृतं÷सहवाचामंयोभुवा ॥ देवेब्भ्यःकर्म्मकृत्त्वास्तम्प्रे
तंसचाभुवः ॥ ४७ ॥ अवंभृथनिचुम्पुण ॥ अवंभृथनिचुम्पुणनिचेरु
रंसिनिचुम्पुणः ॥ अवंदेवैर्देवकृतंमेनोयासिषमवमर्त्त्यैर्म्मर्त्त्यंकृतम्पु

रुराव्ण्णोदेवारिषस्प्पाहि॥४८॥ [५] पर्ण्णादर्व्वि॥ पूर्ण्णादर्व्विपरापतुसुपू
र्ण्णापुनरापत॥ व्वुस्न्नेवुव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो॥४९॥ देुहिम॥
देुहिमेुददामितुनिमेधेहिुनितेदधे ॥ निहारञ्चुहरासिमेनिहारुन्निहरा
णितुस्वाहा ॥ ५० ॥ अक्षन्नमीमदन्त ॥ अक्षन्नमीमदन्तुह्यवप्प्रियाऽ
अधूषत ॥ अस्तोषतुस्स्वभानवोुव्विप्प्रानाविष्ठयामुतीयोजान्विन्द्रतु
हरा॥५१॥ सुसुन्दृशंन्त्वा॥ सुसुन्दृशंन्त्वाव्वुयम्ममघवन्वन्दिषीमहि॥
प्रनूनम्मपूर्ण्णबन्धुरस्तुतोयासिुव्वशाँ २ अनुयोजान्विन्द्रतुहरी ॥५२॥
मनोनु ॥ मनोन्वाह्वामहेनाराशꣳसेनुस्तोमेन॥ पितृणाञ्चुमन्मभिः५३

आनः॥आनऽएतुमनःपुनःक्रत्वेदक्षायजीवसे ॥ ज्योक्चसूर्य्यँन्दृशे ॥५४॥पुनर्न्नः॥पुनर्न्नःपितरोमनोददातुदैव्योजनः॥जीवंव्रातꣳसचेमहि ॥५५॥ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेमहि ॥ ५६ ॥ एषते। रुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते रुद्रभागऽआखुस्तेपशुः ॥५७॥ अवरुद्रम्॥अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानःश्श्रेयसस्करद्यथानोव्यवसाययात् ॥ ५८ ॥ भेषजमसि। भेषजङ्गवेश्श्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ५९ ॥ त्र्यम्बकँय्यजामहे। सुगन्धिम्पुष्टिवर्द्धन

म् ॥ उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकंयय
जामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमा
मुतः ॥६०॥ एतत्ते । रुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्न्वा
पिनाकावसःकृत्तिवासाऽअहिꣳसन्नःशिवोतीहि ॥६१॥ त्र्यायुषञ्जमद
ग्नेः कश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥
॥६२॥ शिवोनामा ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तु
मामाहिꣳसीः ॥ निवर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्पोषाय
सुप्प्रजास्त्वायसुवीर्य्याय ॥६३॥ १०[७] इतिश्रीवाजसनेयसंहिता

यांत्तृतीयोऽध्यायः ॥३॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् । एदंद्वे,
महीनाम्पयश्चतस्र, आकूत्या, ऋक्सामयो, द्विंकौ, व्रतंकृणुतषड़े, षते
चसस्रो, वस्व्यासितिस्र, एषतेद्वे, शुक्रन्त्वाचतस्रो, दित्त्यास्त्वगष्टौ, दश
सप्तत्रिꣳशत् ॥१०॥ हरिः ॐ एदम् ॥ एदमगन्मदेवयजनम्पृथिव्यायत्र
देवासोऽअजुषन्तविश्वे । ऋक्सामाभ्याꣳसन्तरन्तोयजुर्भीरायस्पो
षेणसमिषामदेम ॥ इमाऽआपःशम्मेसन्तुदेवीरोषधेत्रायस्वस्वधि
तेमैनꣳहिꣳसीः ॥१॥ आपोऽअस्मान् ॥ आपोऽअस्मान्मातरःशुन्ध
यन्तुघृतेननोघृतप्वःपुनन्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदा

ब्भ्युꣳशुच्चिरापूतऽएमि॥ दीक्षातपसोस्तनूरसितान्त्वाꣳशिवाꣳशग्ग्माम्परिदधेभद्द्रंव्वर्ण्णम्म्पुष्ष्यन् ॥ २ ॥ [२] महीनाम्पयः ॥ महीनाम्पयोसिव्वर्च्चोदाऽअसिव्वर्च्चोमेदेहि ॥ व्वृत्रस्यासिकनीनकश्च्चक्षुर्द्दाऽअसिचक्षुर्म्मेदेहि ॥३॥ चित्तपतिर्म्मा ॥ चित्तपतिर्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुनात्त्वच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्त्रपतेपवित्त्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ॥ ४ ॥ आवः ॥ आवोदेवासऽईमहेव्वामम्प्रयत्त्यध्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥५॥ स्वाहायज्ञम् । स्वाहायज्ञम्मनसःस्वाहोरोरन्त

रि॑क्षात्स्वाहा॒द्यावा॑पृथिवीब्भ्याᳫं॒स्वाहा॒व्वाता॒दार॑भे॒स्वाहा॑ ॥६॥ [४] आकू॑त्त्यैप्प्रयुजे॑ ॥ आकू॑त्त्यैप्प्रयुजे॒ग्ग्नये॒स्वाहा॑मे॒धायै॒मन॑से॒ग्ग्नये॒स्वाहा॑दी॒क्षायै॒तप॑से॒ग्ग्नये॒स्वाहा॒सर॑स्वत्त्यैपू॒ष्ण्णे॒ग्ग्नये॒स्वाहा॑ ॥ आपो॑दे॒वीर्बृ॑हतीर्व्विश्वशम्म्भुवो॒द्यावा॑पृथि॒वीऽउ॒रो॑ऽअन्तरिक्ष ॥ बृह॒स्पत॑येहविषा॑व्विधेम॒स्वाहा॑ ॥ ७ ॥ व्विश्वो॑दे॒वस्य॑ ॥ व्विश्वो॑दे॒वस्य॑ने॒तुर्म्मर्त्तो॑व्वुरीतस॒क्ख्यम् ॥ व्विश्वो॑रा॒यऽइ॑षुद्ध्यतिद्यु॒म्म्नंव्वृ॑णीतपु॒ष्ष्यसे॒स्वाहा॑ ॥८॥ [२] ऋक्क्सा॒मयो॒ऽंशिल्पे॑ ॥ ऋक्क्सा॒मयो॒ऽंशि ल्पे॑स्त्थ॒स्तेव्वामार॑भे॒तेमा॑पात॒मास्यय॒ज्ञस्यो॒दृच॑ः ॥ शर्म्मा॑सि॒शर्म्म॑

मेयच्छनमस्त्तेऽअस्त्तुमामाहिꣳसीः ॥ ९ ॥ ऊर्ग्गासि ॥ ऊर्ग्गस्याङ्गिर
स्यूर्णम्म्रदाऽऊर्ज्जंमयिधेहि ॥ सोमस्यनीविरसिव्विष्ण्णोःशर्म्मासि
शर्म्मयजमानस्येन्द्रस्ययोनिरसिसुसस्याःकृषीस्कृधि ॥ उच्छ्रयस्वव्व
नस्प्पतऽऊर्द्ध्वोमापाह्यꣳहसऽआस्ययज्ञस्योदृचः ॥ १० ॥ [२] व्व्रतङ्कृ
णुत । व्व्रतङ्कृणुताग्ग्निर्ब्ब्रह्माग्ग्निर्य्यज्ञोव्वनस्प्पतिर्य्यज्ञियः ॥ दैवीन्धियम्
म्मनामहेसुमृडीकामभिष्टयेव्वर्च्चोधांय्यज्ञवाहसꣳसुतीर्त्थानोऽअसद्व
शे ॥ येदेवामनोजातामनोयुजोदक्षक्क्रतवस्त्तेनोवन्तुतेनःपान्तुतेब्भ्यः
स्वाहा ॥ ११ ॥ श्वात्त्राःपीताः ॥ श्वात्त्राःपीताभवतयूयमापोऽअस्माकम

न्तरुदरेंसुशेवाः ॥ ताऽअुस्म्मभ्यंमयुक्ष्माऽअंनमुीवाऽअनांगसुः
स्वदंन्तुदेुवीरुमृताऽऋतावृधंः ॥ १२ ॥ इयन्ते । युज्ञियांतुनूरुपोमुंश्चा
मिनप्प्रुजाम् ॥ अर्ठहोमुचुंऽस्वाहांकृताःपृथिुवीमाविंशतपृथिुव्यास
म्भंव॥१३॥अग्नेुत्त्वम्। अग्नेुत्त्वर्ठसुजांगृहिव्रुयर्ठसुमंन्दिषीमहि॥रक्षा
णोऽअप्प्रंयच्छन्नप्रबुधेंनुःपुनंस्कृधि ॥१४॥ पुनुर्म्मनंः॥पुनुर्म्मनुंऽपुनरा
युर्म्मुऽआगुन्पुनंःप्प्राणःपुनंरुात्त्मामुऽआगुन्पुनुश्चक्षुंःपुनुंःश्श्रोत्त्रंम्मु
ऽआगन् ॥ वैुश्श्वानुरोऽअदंब्धस्त्तनूपाऽअुग्निर्न्नंःपातुदुुरितादंवु
द्यात् ॥१५॥ त्वमंग्ने । व्रतुपाऽअंसिदेुवऽआमर्त्त्येुष्ष्वा ॥ त्वंय्युज्ञेष्ष्वी

हृद्यः ॥ रास्वेयत्सोमाभूयोभरदेवोनःसविताव्वसोर्द्दाताव्वस्वदात
।१६।[६]एषातेशुक्रतनूरेतद्वर्च्चस्तयासम्भवभ्राजङ्गच्छ।जूरसिधृता
मनसाजुष्टाव्विष्णवे ॥१७॥ तस्यास्ते।सत्यसवसःप्प्रसवेतन्वोयन्त्र
मशीयस्स्वाहा॥शुक्रमसिचन्द्रमस्यमृतमसिव्वैश्वदेवमसि ॥१८॥ चि
दसि । मनासिधीरसिदक्षिणासिक्षत्रियासियज्ञियास्यदितिरस्युभ
यतःशीर्ष्ण्णी ॥ सानःसुप्प्राचीसुप्प्रतीच्च्येधिमित्त्रस्त्वापदिबध्नीता
म्म्पूषाद्ध्वनस्प्पात्त्विन्द्रायाद्ध्यक्षाय॥१९॥अनुत्त्वामातामन्न्यतामनु
पितानुभ्रातासगर्भ्योनुसखासयूत्थ्यः ॥ सादेविदेवमच्छेहीन्द्राय

सोमंꣳरुद्द्रास्त्वावर्त्तंयतुस्स्वुस्त्तिसोमंसखापुनरेहिं ॥२०॥[४]वस्व्व्यं
सि॥वस्व्व्यस्यदितिरस्यादित्त्यासिंरुद्द्रासिंचन्द्द्रासिं॥बृहस्प्पतिष्ट्वासु
म्म्नेरंम्म्णातुरुद्द्रोवसुंभिराचंके ॥२१॥ अदित्त्यास्त्वा॥मूर्द्धन्नाजिघर्म्मि
देवयजंनेपृथिव्व्याऽइडांयास्प्पदमंसिघृतवत्स्वाहां ॥ अस्म्मेरंमस्वा
स्म्मेतेबन्धुस्त्वेरायोमेरायोमावयꣳरायस्प्पोषेणवियौष्म्मतोतोरा
यंः॥२२॥ समंख्ये॥देव्व्याधियासन्दक्षिणयोरुचंक्षसा॥मामऽआयुंः
प्प्रमोषीम्मोऽअहन्तववीरंविंदेयतवंदेविसन्दृशिं ॥ २३ ॥ [३]एषतें।
गायत्त्रोभागऽइतिंमेसोमांयब्रूतादेषतेत्रैष्टुंभोभागऽइतिंमेसोमांयब्रूता

देषतेजागतोभागऽइतिमेसोमायब्रूताच्छन्दोनामानाꣳसाम्म्राज्य
ङ्गच्छेतिमेसोमायब्रूतादास्म्माकोसिशुक्रस्तेग्ग्रह्योव्विचितस्त्वावि
च्चिन्न्वन्तु ॥ २४ ॥ अभित्त्यम् ॥ अभित्त्यन्देवꣳसवितारमो
ण्ण्यो÷कविक्क्रतुमर्च्चामिसत्त्यसवꣳरत्नधामभिप्प्रियम्मतिङ्कविम् ॥
ऊर्द्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनिहिरण्ण्यपाणिरमिमीतसुक्क्र
तु÷कृपास्स्व÷ ॥ प्रजाब्भ्यस्त्वाप्प्रजास्त्वानुप्प्राणन्तुप्प्रजास्त्वमनु
प्प्राणिहि ॥ २५ ॥ [२] शुक्रन्त्वा । शुक्रेणक्क्रीणामिचन्द्रञ्चन्द्रेणा
मृतममृतेन ॥ सग्मेतेगोरस्म्मेतेचन्द्राणितपसस्तनूरसिप्प्रजाप

ते॒व्वर्ण्णं॑ः प॒र॒मेण॑प॒शुना॑ङ्क्रीयसे स॒हस्र॒पो॒षम्पु॑षेयम् ॥ २६ ॥ मि॒त्त्रो
नः॑ ॥ मि॒त्त्रोन॒ऽएहि॒सुमि॑त्त्रध॒ऽइन्द्र॑स्यो॒रुमावि॑श॒दक्षि॑णमु॒शन्नु॒शन्त॑ꣳ
स्यो॒नः स्यो॒नम् ॥ स्वान॒भ्भ्राजाङ्घा॑रे॒बम्भा॑रे॒हस्त्त॒सुह॑स्त्त॒कृशा॑नवे॒तेवः॑
सो॒म॒क्क्र॒य॑णा॒स्तान्त्र॑क्षध्व॒म्मावो॑दभन् ॥२७॥ परि॑मा । ग्ग्ने॒दुश्च॑रिताद्बा
धस्वा॒मा॒सुच॑रितेभज । उदायु॑षास्वा॒युषोद॑स्त्थाम॒मृता॑ँ १ ऽअनु॑ ॥
॥ २८ ॥ प्रति॒पन्था॑म् ॥ प्रति॒पन्था॑मपद्म्महिस्व॒स्ति॒गाम॑ने॒हस॑म् ॥
ये॒न॒व्विश्वाः॒ परि॒द्विषो॑वृ॒णक्ति॑व्वि॒न्द॒ते॒व्वसु॑ ॥ २९ ॥ [४] अदि॑त्त्या
स्त्वक् ॥ अदि॑त्त्यास्त्व॒गस्यदि॑त्त्यै॒सद॒ऽआसी॑द ॥ अस्त्त॒भ्भ्नाद्द्यांवृ

ष॒भोऽअ॒न्तरि॑क्ष॒ममि॑मीतव्वरि॒माणं॑म्पृथि॒व्याः ॥ आसी॑द॒द्विश्वा॒भु
व॑नानिस॒म्म्राड्वि॑श्वे॒त्तानि॒व्वरु॑णस्यव्व्र॒तानि॑ ॥ ३० ॥ व्वने॑षुव्वि ॥ व्वने॑
षुव्य॒न्तरि॑क्षन्ततान॒व्वाज॒मर्व्वँ॑त्सुपय॑ऽउ॒स्त्रियासु ॥ हृत्सुक्रतुं॑व्वरु॑णो
व्वि॒क्क्ष्व॒ग्ग्निन्दि॒विसूर्य्यँ॑मदधा॒त्सोम॒मद्रौ॑ ॥ ३१ ॥ सूर्य्यँ॑स्य॒चक्षुः॑ ॥ सू
र्य्यँ॑स्य॒चक्षु॒रारो॑हा॒ग्नेर॒क्ष्णः॑क॒नीनकम् ॥ यत्रैतं॑शेभि॒रीयं॑से॒भ्राज॑मा
नोव्विप॒श्चिता॑ ॥ ३२ ॥ उस्त्रा॒वेतम् ॥ उस्त्रा॒वेतं॑न्धूर्षाहौयु॒ज्ज्येथा॑मन॒
१॑श्रूऽअवी॑रहणौब्रह्म॒चोद॑नौ ॥ स्व॒स्तियज॑मानस्यगृ॒हान्ग॑च्छत
म् ॥ ३३ ॥ भ॒द्रोमे॑ । सि॒प्प्रच्च्य॑वस्वभुवस्प्पते॒व्विश्श्वा॑न्य॒भिधामा॑

नि ॥ मात्त्वा॑परि॒परि॒णो॑व्विद॒न्मात्त्वा॑परि॒पन्थि॒नो॑व्विद॒न्मात्त्वा॒वृका॑ऽ
अ॒घायवो॑व्विदन् ॥ श्ये॒नोभू॒त्त्वापरा॑पत॒यज॑मानस्यग॒हान्ग॑च्छ॒तन्नौ॑
सँस्कृ॒तम् ॥ ३४ ॥ नमो॑मि॒त्त्रस्य॑ ॥ नमो॑मि॒त्त्रस्य॒व्वरु॑णस्य॒चक्ष॑सेम॒होदे॒
वायुत॒दृतꣳस॑पर्य॑त ॥ दू॒रे॒दृशे॑दे॒वजा॑ताय॒के॒तवे॑दि॒वस्पु॒त्त्राय॒सूर्या॑
य॒शꣳसत ॥ ३५ ॥ व्वरु॑णस्यो॒त्तम्भ॑नम् ॥ व्वरु॑णस्यो॒त्तम्म्भ॑नमसि॒व्व
रु॑णस्यस्कम्म्भ॒सर्ज्ज॑नीस्त्थो॒व्वरु॑णस्यऽऋत॒सद॑न्यासि॒व्वरु॑णस्स्यऽऋ
त॒सद॑नमासि॒व्वरु॑णस्यऽऋत॒सद॑न॒मासी॑द ॥ ३६ ॥ याते॑ ॥ याते॒धामा॑नि
ह॒विषा॒यज॑न्ति॒ताते॒व्विश्वा॑परि॒भूर॑स्तु॒यज्ञम् ॥ गय॒स्फानः॑÷प्र॒तर॑णः

सु॒वीरो॒वीँरहा॒प्प्रच॑रासोम॒दु॒र्य्यान् ॥ १० ॥ ३७ ॥ [८] इतिश्रीवा
वाजसनेयसंहितायांचतुर्थोऽध्यायः ॥ ४ ॥ १० ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाक्सूत्रम् ॥ अग्नेस्तनू, रापतयेचतुष्कौ, तप्तायनीद्वे;
इन्द्रघोषस्तिस्रो, युञ्जतेष्टौ, देवस्यत्वाचतस्रो, देवस्यत्वापञ्च, वि
भूरसिचतस्रो, ज्योतिरसिषडुरुव्विष्णोतिस्रो, दशात्रिचत्वारिꣳश
त् ॥ हरिःॐअ॒ग्नेस्त॒नूः ॥ अ॒ग्नेस्त्त॒नूर॑सि॒व्विष्ण॑वे॒त्त्वा॒सोम॑स्यत॒नूर॑
सि॒व्विष्ण॑वे॒त्त्वाति॒थेरा॑ति॒थ्यम॑सि॒व्विष्ण॑वे॒त्त्वाऽश्ये॒नाय॑त्त्वासोम॒भृते॒व्वि
ष्ण॑वे॒त्त्वा॒ग्नये॑त्त्वारायस्प्पोष॒दे॒व्विष्ण॑वे॒त्त्वा ॥ १ ॥ अ॒ग्नेर्ज्जनि॒त्र

मू ॥ अग्नेर्ज्जनित्त्रमसिवृषणौस्त्थऽउर्वश्यस्यायुरसिपुरूरवाऽअसि ॥
गायत्त्रेणत्त्वाच्छन्दसामन्थामित्त्रैष्टुभेनत्त्वाच्छन्दसामन्थामिजागते
नत्त्वाच्छन्दसामन्थामि ॥ २ ॥ भवतन्नः ॥ भवतन्नःसमनसौसचे
तसावरेपसौ ॥ मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसौशिवौभ
वतमद्यनः ॥ ३ ॥ अग्नावग्निः ॥ अग्नावग्निश्चरतिप्रविष्टऽऋषी
णाम्पुत्रोऽअभिशस्तिपावा ॥ सनःस्योनःसुयजायजेहदेवेभ्योह
व्यꣳसदमप्रयुच्छन्त्स्वाहा ॥ ४ ॥ [४] आपतयेत्त्वा ॥ आपतयेत्त्वा
परिपतयेगृह्णामितननप्त्रेशाक्वरायशक्वनऽओजिष्ठाय ॥ अना

धृष्टमस्यनाधृष्ष्यन्देुवानुामोजोनभिशस्त्त्यभिशास्त्तिुपाऽअनाभिश
स्त्तेुन्न्यमञ्जसासुत्त्यमुपगेषꣳस्विुतेमाधाः ॥ ५ ॥ अग्ग्नेव्व्रतपाः ॥
अग्ग्नेव्व्रतपुास्त्वेव्व्रतपुायातवंतुनूरियꣳ सामयिुयोममंतुनू रेषासात्त्व
यि ॥ सुहनौव्व्रतपतेव्व्रुतान्न्यनुमेदीक्षान्दीुक्षापतिुर्म्मन्न्यंतुामनुतपुस्त
पंस्प्पातिः ॥ ६ ॥ अꣳशुरꣳशुष्टे । देवसुोमाप्प्यायतुामिन्द्रायैक
धनुविदे ॥ आतुभ्भ्युमिन्द्रुःप्प्यायंतुामात्त्वमिन्द्रायप्प्यायस्व ॥ आ
प्प्याययुास्म्मान्त्सखीन्त्सुन्न्यामुधयास्त्वुस्तित्ततेदेवसोमसुत्त्यामं
शीय ॥ एष्टारायुःप्प्रेषेभगायऽऋुतमृतवुादिभ्भ्युोनमोद्यावापृथिवी

भ्यांम्॥७॥ यातें। यातेँऽअग्नेयꣳशुयात॒नूर्व्वाँषँष्ठागह्वरे॒ष्ठा॥उग्रंव्वचो॒ऽ
अपांवधीत्त्वे॒षंव्वचो॒ऽअपांवधी॒त्त्स्वाहां ॥ यातेँऽअग्नेरजꣳशुयात॒नूर्व्वाँषँ
ष्ठागह्वरे॒ष्ठा ॥ उग्रंव्वचो॒ऽअपांवधीत्त्वे॒षंव्वचो॒ऽअपांवधी॒त्त्स्वाहां ॥ या
तेँऽअग्नेहरिशुयात॒नूर्व्वाँषँष्ठागह्वरे॒ष्ठा ॥ उग्रंव्वचो॒अपांवधीत्त्वे॒षंव्वचो॒अ
पांवधी॒त्त्स्वाहां॥ ८ ॥ [४] तप्तायंनीमेसिव्वि॒त्तायंनीमे॒स्यवंतान्नमाना
थि॒तादवंतान्नमाव्व्यथि॒तात्॥ व्विदेद॒ग्निर्न्नभो॒नामाग्नेऽअङ्गिर॒ऽआयुना॒
नाम्नेहि॒य्यो॒स्याम्पृथि॒व्यामासि॒यत्तेनाधृष्टन्नामंयज्ञि॒यन्तेन॒त्त्वादधे
व्विदेद॒ग्निर्न्नभो॒नामाग्नेऽअङ्गिर॒ऽआयुं॒नानाम्नेहि॒योद्वितीयंस्याम्पृ

थि॒व्व्यामा॒सि॒यत्ते॑नाधृ॒ष्ट॒न्नामं॑य॒ज्ञि॒य॒न्ते॑न॒त्त्वाद॑धे॒व्वि॒द॑द॒ग्ग्निर्न्न॑भो॒नामा
ग्ने॑ऽअङ्गि॒र॒ऽआयु॑न॒ना॒नाम्ने॑हि॒यस्त्तृ॒तीयं॑स्याम्मपृथि॒व्यामा॒सि॒यत्ते॑ना॑धृ
ष्ट॒न्नामं॑य॒ज्ञि॒य॒न्ते॑न॒त्त्वाद॑धे ॥ अनुं॑त्त्वा॒दे॒ववी॑तये ॥९॥ सि॒ꣳ॒ह्य॑सि । स
पत्त्न॒सा॒ही॒दे॒वेब्भ्य॑÷ कल्प्प॑स्वा॒सि॒ꣳ॒ह्य॑सिसपत्त्न॒सा॒ही॒दे॒वेब्भ्य॑÷ शु
न्धस्स्वा॒सि॒ꣳ॒ह्य॑सिसपत्त्न॒सा॒ही॒दे॒वेब्भ्य॑÷शुम्म्भस्स्व ॥ १० ॥ [२]
इन्द्र॒घो॒षस्त्त्वा॑ ॥ इन्द्र॒घो॒षस्त्त्वा॒व्वसु॑भिःपु॒रस्त्ता॑त्त्पा॒तु॒प्प्रचे॑तास्त्त्वा॒रु
द्रैःप॒श्चा॑त्त्पा॒तु॒मनो॑जवास्त्त्वापि॒तृभि॑र्द्दक्षिण॒तःपा॑तु॒व्वि॒श्वक॑र्म्मा॒त्त्वा
दि॒त्त्यैरु॑त्तर॒तःपा॑त्त्वि॒दम॒हन्त॒प्तंव्वा॒र्ब्ब॑हि॒र्द्धा॒यु॒ज्ञान्निःसृ॑जामि ॥११॥ सि॒

ꣳऽह्यसि ॥ सिुꣳह्यासिुस्वाहांसिुꣳह्यस्यादित्त्युवनिुꣳस्वाहांसिुꣳ
ह्यसिब्ब्रह्मुवनिं÷ क्षत्त्रुवनिुꣳस्वाहांसिुꣳह्यासिसुप्प्रजावनीँरायस्पो
षुवानिुꣳस्वाहांसिुꣳह्यस्यावेहदुवान्न्यजमानायुस्वाहांभूतेभ्भ्यस्त्त्वा
॥ १२ ॥ ध्रुवोसि । पृथिवीन्दृꣳहद्ध्रुवुक्षिदस्युन्तरिक्षन्दृꣳहाच्च्युत
क्षिदंसिुदिवन्दृꣳहाुग्ग्नेःपुरीषमसि ॥ १३ ॥ [३] युञ्जतेमन÷ ॥ यु
ञ्जतेमनंऽउतयुञ्जतेुधियोविप्प्राविप्प्रस्यबृहतोविपश्चित÷ ॥ विहोत्त्रा
दधेवयुनाविदेकुऽइन्महीदुेवस्यंसवितुःपरिष्टुतिꣳस्वाहा ॥ १४ ॥ इ
दंविष्णु÷ ॥ इदंविष्णुर्विचक्रमेत्त्रेधानिदधेपदम् ॥ समूढमस्यपाꣳ

सु॒रेस्वाहा॑ ॥ १५ ॥ इरा॑वतीधेनु॒मती॑ ॥ इरा॑वतीधेनु॒मती॒हिभू॒तꣳसू॑य
व॒सिनी॒मन॑वेदश॒स्या ॥ व्य॑स्कब्भ्ना॒रोद॑सीविष्ण्णवे॒तेदा॒धर्त्थ॑पृथि॒वी
म॒भितो॑म॒यूखैः॒स्वाहा ॥ १६ ॥ दे॒व॒श्श्रुतौ॑दे॒वेषु॑ ॥ दे॒व॒श्श्रुतौ॑दे॒वेष्वाघो॑
षत॒म्प्राची॒प्प्रेत॑मद्ध्व॒रङ्क॒ल्प्पय॑न्तीऽऊ॒र्द्ध्वंय्य॒ज्ञन्न॑यत॒म्माजिह्वरतम् ॥
स्वङ्गो॒ष्ठमाव॑दत॒न्देवी॑दु॒र्य्ये॑ऽआयु॒र्म्मानि॒र्व्वा॑दिष्टम्प्र॒जाम्मानि॒र्व्वा॑दिष्ट
म॒त्त्ररमेथा॒ंव्वर्ष्म्म॑न्पृथि॒व्याः ॥ १७ ॥ व्विष्ण्णो॒र्न्नु॑ । कंव्वी॒र्य्या॑णि
प्प्रवो॑चं॒य्यःपार्त्थि॑वानिव्विम॒मेरजा॑ꣳसि ॥ योऽअस्क॑भाय॒दुत्त॑रꣳस॒
धस्त्थं॑व्विच॒क्क्रमा॒णस्त्रे॒धोरु॑गा॒योव्विष्ण्ण॑वेत्त्वा ॥ १८ ॥ दि॒वोवा॑ । व्वि

ष्णऽउतवापृथिव्यामहोवाविष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ता
वसुनापृणस्वाप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वा ॥ १९ ॥ प्रत
त् ॥ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्यो
रुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा ॥ २० ॥ विष्णो
रराटम् ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिवि
ष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा ॥ २१ ॥ [८] देवस्यत्वा
सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेना
र्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ बृहन्नसिबृहद्रवाबृहती

मिन्द्रा॑य॒व्वाचं॑व्वद ॥ २२ ॥ र॒क्षो॒हणं॑व्वल॒ग॒हनम् ॥ र॒क्षो॒हणं॑व्वल॒ग॒हनं॑
व्वैष्ण॒वी॒मि॒दम॒हन्तंव्व॑ल॒गमु॒त्त्किरा॒मि॒यम्मे॒निष्ट्यो॒यम॒मात्त्यो॑निच॒खा
ने॒दम॒हन्तंव्व॑ल॒गमु॒त्त्किरा॒मि॒यम्मे॑स॒मा॒नो॒यम॒स॑मा॒नो॒निच॒खा॒नेदम॒ह
न्तंव्व॑ल॒गमु॒त्त्किरा॒मि॒यम्मे॒सब॑न्धु॒र्यम॒स॑बन्धु॒र्न्नि॒चखा॒नेदम॒हन्तंव्व॑ल॒
गमु॒त्त्किरा॒मि॒यम्मे॑स॒जा॒तो॒यम॒स॑जा॒तो॒निच॒खा॒नोत्कृ॒त्त्याङ्कि॑रामि ॥
॥ २३ ॥ स्व॒राड॑सि ॥ स्व॒राड॑सि सपत्त्न॒हा स॑त्त्र॒राड॑स्याभिमाति॒हा॒ज
न॒राड॑सि रक्षो॒हा स॑र्व्व॒राड॑स्यामि॒त्त्र॒हा ॥ २४ ॥ र॒क्षो॒हणो॑वः ॥ र॒क्षो॒ह
णो॑वो व्वलग॒हनः॒प्प्रोक्षा॑मि व्वैष्ण॒वान्र॑क्षो॒हणो॑वो व्वलग॒हनो॑वनया॑मि व्वै

ष्ण्णुवान्त्रंक्षोहणोवोवलगुहनोवंस्तृणामिवैष्ण्णुवान्त्रंक्षोहणौवांवलगु
ह नुाऽउपंदधामिवैष्ण्णुवीरंक्षोहणौवांवलगुहनौपर्य्यूँहामिवैष्ण्णुवीवै
ष्ण्णुवमंसिवैष्ण्णुवास्त्थं ॥ २५ ॥ [४] देवस्यंत्त्वा । सवितुःप्प्र
सुवेश्विनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ताब्भ्याम् ॥ आदंदेनार्य्यँसीदमु
हꣳरक्षंसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियुवयास्म्मद्द्वेषोयुवयारांती
र्द्दिवेत्त्वान्तरिंक्षायत्त्वापृथिव्यैत्त्वाशुन्धंन्ताँल्लोकाःपितृषदंनाःपितृषदं
नमसि ॥ २६ ॥ उद्दिवंम् ॥ उद्दिवंꣳस्तभानान् रिंक्षम्म्पृणदृꣳहंस्स्व
पृथिव्यान्द्युंतानस्त्त्वांमारुतोमिनोतुमित्त्रावरुणाध्रुवेणधर्म्मणा ॥

ब्रह्मवनिंत्त्वाक्षत्त्रवनिंरायस्प्पोषवनिंपर्य्यूँहामि ॥ ब्रह्मदृꣳहक्षत्त्र
न्दृꣳहायुर्द्दृꣳहप्प्रजान्दृꣳह॥२७॥ध्रुवासि । ध्रुवोयंय्यजमानोस्मिन्
न्नायतनेप्प्रजयापशुभिर्भूयात् ॥ घृतेनद्यावापृथिवीपूर्य्येथामिन्द्र
स्यच्छदिरसिविश्वजनस्यच्छाया ॥ २८ ॥ परित्वा । गिर्वणोगि
रऽइमाभवन्तुविश्वतः ॥ वृद्धायुमनुवृद्धयोजुष्टाभवन्तुजुष्टयः ॥
॥ २९ ॥ इन्द्रस्यस्यूः ॥ इन्द्रस्यस्यूरसीन्द्रस्यध्रुवोसि ॥ ऐन्द्रमसिवै
श्वदेवमसि ॥ ३० ॥ [५] विभूरसि । प्प्रवाहणोवन्हिरसिहव्यवाह
नः ॥ श्वात्रोसिप्प्रचेतास्तुथोसिविश्ववेदाऽउशिगसि ॥ ३१ ॥ उ

शिगसि। कविरङ्घारिरसिबम्भारिरवस्यूरसिदुवस्स्वाञ्छुन्ध्यूरसिमा
र्ज्जालीयःसम्म्राडसिकृशानुःपरिषद्द्योसिपवमानोनभोसिप्प्रतक्क्वामृ
ष्टोसिहव्व्यसूदनऽऋतधामासिस्वर्ज्ज्योतिꣳसमुद्द्रोसि ॥ ३२ ॥ समु
द्द्रोसि । विश्श्वव्व्यचाऽअजोस्येकपादहिरसिबुद्ध्न्योवागस्स्यैन्द्रमसिस
दोस्स्यृतस्स्यद्द्वारौमामासन्ताप्प्तमद्ध्वनामद्ध्वपतेप्प्रमातिरस्स्वस्त्तिमे
स्म्मिन्पथिदेवयानेभूयान्मित्त्रस्यमा ॥ ३३ ॥ मित्त्रस्यमा । चक्षु
षेक्षद्ध्वमग्नयꣳसगराꣳसगरास्त्थसगरेणनाम्म्नारौद्द्रेणानीकेनपातमा
ग्नयꣳपिपृतमाग्नयोगोपायतमानमोवोस्त्तुमामाहिꣳसिष्ट ॥ ३४ ॥

[४] ज्योतिरसि । विश्वरूपंविश्वेषान्देवानांꣳसमित् ॥ त्वꣳसो
मतनकृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयन्तासिवरूथꣳस्वाहांजुषा
णोऽअप्तुराज्यस्यवेतुस्वाहा ॥ ३५ ॥ शतम् ॥ २०० ॥ अग्नेनय । सु
पथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जु
हुराणमेनोभूयिष्ठान्तेनमऽउक्तिंविधेम ॥ ३६ ॥ अयन्नः ॥ अयन्नोऽअग्नि
र्वरिवस्कृणोत्वयम्मृधः पुरऽएतुप्रभिन्दन् ॥ अयंवाजाञ्जयतुवाजसा
तावयꣳशत्रूँञ्जयतुजर्हृषाणःस्वाहा ॥ ३७ ॥ उरुविष्णो ॥ उरुवि
ष्णोविक्रमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्रप्रयज्ञ

संहि.

॥३०॥

पंतिन्तिरस्वाहा ॥ ३८ ॥ देवंसवितः ॥ देवंसवितरेषतेसोमस्तꣳरंक्ष
स्वमात्त्वांदभन् ॥ एतत्त्वन्दैवसोमदेवोदेवाँ २ उपांगाऽइदमहम्मंनु
ष्यान्त्सहरायस्पोषेणस्वाहानिर्व्वरुणस्यपाशान्मुच्चये ॥ ३९ ॥ अ
ग्नेर्व्व्रतपाः ॥ अग्नेर्व्व्रतपास्त्वेव्व्रंतपायातवंतनूर्म्मंय्यभूदेषासात्त्वयियो
ममंतनूस्त्वय्यभूंदियꣳसामयिं ॥ यथायथन्नौव्व्रतपतेव्व्रतान्यनुमेदी
क्षान्दीक्षापंतिरमꣳस्तानुतपस्तपस्पतिः ॥ ४० ॥ [६] उरुव्विष्णो ॥
उरुव्विष्णोव्विक्रंमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्प्रप्प्रंय
ज्ञपंतिन्तिरस्वाहां ॥ ४१ ॥ अत्त्यन्न्यान् ॥ अत्त्यन्न्याँ २ अगान्नान्न्याँ २

पू.अ.

५

उपांगामुर्व्वांकर्त्तापरेब्भ्योविदम्पुरोवरेब्भ्यः ॥ तन्त्वांजुषामहेदेव
ब्वनस्प्पतेदेवयुज्ज्यायैदेवास्त्त्वादेवयुज्ज्यायैजुषन्तांव्विष्ण्णवेत्वा ॥
ओषधेत्त्रायस्वस्वधितेमैनꣳहिꣳसीः ॥४२॥ द्याम्मा ॥ द्याम्मालेखीर
न्तरिक्षम्माहिꣳसीःपृथिव्यासम्भव ॥ अयꣳहित्त्वास्वधितिस्त्तेति
जानःप्प्रणिनायमहतेसौभगाय ॥ अतस्त्त्वन्देवव्वनस्प्पतेशतवल्शो
व्विरोहसहस्रवल्शाव्वियꣳरुहेम ॥ ४३ ॥ [३] १० इतिश्रीवाजसनेय
संहितायांपञ्चमोऽध्यायः ॥ ५ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसू
त्रम् ॥ देवस्यत्वाषडुपावीरसिपञ्च माहिःषट् सन्तेतिस्त्रःसमुद्रंगच्छ

हविष्मतीर्द्धिकौहृदेत्वापश्चदेवस्यत्वाष्टावष्टौसप्तत्रिꣳशत् ॥ हरिःॐ
देवस्यत्वा ॥ सवितुःप्प्रसुवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम् ॥
आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियु
वयास्म्मद्द्वेषोयुवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँ
ल्लोकाःपितृषदनाःपितृषदनमसि ॥ १ ॥ अग्ग्रेणीरसि । स्वा
वेशऽउन्नेतॄणामेतस्यवित्तादधित्त्वास्त्थास्यतिदेवस्त्त्वासवितामद्ध्वान
क्तुसुपिप्पलाब्भ्यस्त्त्वौषधीब्भ्यः ॥ द्यामग्ग्रेणास्पृक्षऽआन्तरिक्षम्म
द्ध्येनाप्प्राःपृथिवीमुपरेणादृꣳहीः ॥ २ ॥ याते ॥ यातेधामान्युश्मसिग

मंद्ध्यैयत्रुगावोभूरिंशृङ्गाऽअुयासंः ॥ अत्राहुतदुंरुगायस्युविष्ष्णोंः
परुमम्पुदमवंभारिुभूरिं ॥ ब्रुह्मवुनित्त्वाक्षत्रुवनिंरायस्पोषुवनुिपर्य्यूं
हामि ॥ ब्रह्मंदृꣳहक्षुत्रन्दृꣳहायुंर्दृꣳहप्प्रुजान्दृꣳह ॥ ३ ॥ विष्ष्णोःकर्म्माँ
णि । पश्यतुयतोंव्व्रुतानिंपस्पुशे ॥ इन्द्रंस्युयुज्ज्यःसखां ॥ ४ ॥ तद्वि
ष्ष्णोंः । परुमम्पुदꣳसदांपश्श्यान्तिसूरयंः । दिवीवुचक्षुरातंतम् ॥ ५ ॥ पु
रिवीरंसि ॥ पुरिवीरंसिुपरिंत्त्वादैवीर्व्विंशोंव्ययन्ताम्म्पुरीमंय्यजमानुꣳ
रायोंमनुष्ष्याणाम् ॥ दिवःसूनुरंस्येषतेंपृथिव्याँल्लोकऽआरुण्ण्यस्तें
पुशुः ॥ ६ ॥ [६] उपावीरसि ॥ उपावीरस्युपंदेवान्दैवीर्व्विंशःप्प्रागुरु

शि॒जो॒व्वा॒न्हि॑तमान्॥दे॒व॑स्त्व॒ष्टा॒व्वसु॑र॒मह॒व्यातैं॑स्वदन्ताम् ॥७॥ रेव॑ती॒रम॑
ध्व॒म् ॥ रेव॑ती॒रम॑ध्व॒म्बृ॒हद्रू॑प्पते॒धा॒रया॒व्वसू॑नि ॥ ऋ॒तस्यं॑त्वादे॒वह॒वि॒ःपाशे॑
न॒प्प्रति॑मु॒ञ्चा॒मि॒धर्षा॑मानु॒षः ॥८॥ दे॒वस्यं॑त्वा । स॒वि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्बा
हु॒भ्या॑म्पू॒ष्णोहस्ता॑भ्याम्॥अ॒ग्नीषोमा॑भ्यां॒जुष्ट॒न्नियु॑नज्मि ॥ अ॒
द्भ्यस्त्वौष॑धी॒भ्यो॒नु॒त्वामा॒ता॒म॑न्यता॒मनु॑पि॒तानु॒भ्रा॒ता॒सग॒भ्यो॑नु
स॒खा॒सयू॑थ्यः ॥ अ॒ग्नीषोमा॑भ्यान्त्वा॒जुष्ट॒म्प्रोक्षा॑मि ॥९॥ अ॒पाम्पे॒
रुः ॥ अ॒पाम्पे॒रु॒र॒स्यापो॑दे॒वीः स्व॑दन्तु॒स्वा॒त्तञ्चि॒त्सद्दे॑वह॒विः॥ सन्तें॑प्प्रा॒
णो॒व्वाते॑नगच्छता॒ꣳसमङ्गा॑नि॒यज॑त्रैः संय्य॒ज्ञप॑तिरा॒शिषा॑ ॥ १० ॥

धृते॒नाक्तौ । प॒शूँस्त्रा॑येथा॒ᳫंरे॒व॑ति॒यज॑मा॒नेप्प्रि॒यन्धाऽआवि॑श ॥ उ॒रो
र॒न्तरि॑क्षात्स॒जूर्द्दे॒वेन॒व्वाते॑नास्यह॒विष॒स्त्मना॑यज॒सम॑स्यत॒न्वा॒भव ॥
व॒र्षोँव्वर्षीँयसियज्ञे॒यज्ञप॑तिन्धाः स्वाहा॑दे॒वेभ्योँदे॒वेभ्यः स्वाहा॑ ॥११॥
[५] माहिः ॥ माहि॑र्भूर्म्मा॑पृदा॑कु॒र्न्नम॑स्तऽआतानानु॒र्व्वा॑प्प्रेहि॑ ॥ घृ
तस्य॑कु॒ल्ल्याऽउप॑ऽऋ॒तस्य॒पत्थ्या॒ऽअनु ॥ १२ ॥ देवीरापः ॥ देवीरा
पः शु॒द्धावो॑ड्ढ्वᳫंसु॒परि॑विष्टादे॒वेषु॒परि॑विष्टाव्व॒यम्परि॑वे॒ष्टारो॑भूयास्म ॥
॥ १३ ॥ व्वाच॑न्ते ॥ व्वाच॑न्तेशु॒न्धामि॒प्प्रा॒णन्ते॑शु॒न्धामि॒चक्षु॑स्ते
शु॒न्धामि॒श्रोत्र॑न्तेशु॒न्धामि॒नाभि॑न्तेशु॒न्धामि॒मेढ्र॑न्तेशु॒न्धामि॒पायु॑न्ते

शुन्धामिचरित्राँस्तेशुन्धामि ॥ १४ ॥ मनस्ते ॥ मनस्तऽआ
प्प्यायतांवाक्तऽआप्प्यायताम्प्राणस्तऽआप्प्यायताञ्चक्षुस्तऽआ
प्प्यायताꣳश्रोत्रन्तऽआप्प्यायताम् ॥ यत्तेक्रूरंयदास्थितन्तत्तऽआ
प्प्यायतान्निष्ट्यायतान्तत्तेशुद्ध्यतुशमहोभ्यः ॥ ओषधेत्रायस्व
स्वधितेमैनꣳहिꣳसीः ॥ १५ ॥ रक्षसाम्भागः ॥ रक्षसाम्भागोसिनि
रस्तꣳरक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोध
मन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्प्रोर्ण्णुवाथांवायोवेस्तोकानां
मग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥

॥ १६ ॥ इ॒दमा॑पः ॥ इ॒दमा॑प॒ःप्प्रव॑हताव॒द्यञ्च॒मलं॑च॒यत् ॥ यच्चा॑भिदु॒
द्द्रोहानृ॑त॒ंय्यच्च॑शे॒पेऽअ॑भी॒रुण॑म् ॥ आपो॑मा॒तस्म्मा॒देन॑स॒ःपव॑मान
श्चमुञ्चतु ॥ १७ ॥ [६] सन्ते॑ ॥ सन्ते॒मनो॒मन॑सा॒साम्प्रा॒णःप्प्रा॒णेन॑
गच्छताम् ॥ रेड॑स्य॒ग्निष्ट्वा॑श्श्रीणात्वाप॑स्त्वा॒समा॑रिण॒न्वात॑स्यत्त्वा॒
द्ध्राज्यै॑पू॒ष्ण्णोरᳫंह्यां॑ऊ॒ष्म्मणो॑व्यथिष॒त्त्प्रयु॑त॒न्द्द्वेष॑ः ॥ १८ ॥ घृ॒त
ᳫं॑तपावानः ॥ घृ॒तᳫं॑तपावानःपिबत॒व्वसां॑व्वसापावानःपिबतान्तरि॑क्षस्य
ह॒विर॑सि॒स्वाहा॑ ॥ दिशः॑प्प्र॒दिश॑ऽआ॒दिशो॑व्वि॒दिश॑ऽउ॒द्दिशो॑दि॒ग्ग्भ्यः
स्वाहा॑ ॥ १९ ॥ ऐ॒न्द्रःप्प्रा॒णः ॥ ऐ॒न्द्रःप्प्रा॒णोऽअङ्गे॑ऽअङ्गे॒नि

दी॒र्घय॒दै॑न्द्रऽउ॑दा॒नोऽअङ्ग॒ऽअङ्गे॑नि॒धी॑तः ॥ दे॒वं॑त्त्व॑ष्ट॒र्भूरि॑ते॒सꣳस॑मे॒तु
स॒ल॑क्ष्मा॒यद्वि॑षु॒रूपं॒भवा॑ति ॥ दे॒व॒त्रा यन्त॒मव॑से॒सखा॒योऽनु॑त्त्वा॒मा॒ता
पि॒तरो॑मदन्तु ॥ २० ॥ [३] स॒मु॒द्रङ्ग॑च्छ ॥ स॒मु॒द्रङ्ग॑च्छ॒स्वाहा॒
न्तरि॑क्षङ्गच्छ॒स्वाहा॑दे॒वꣳस॑वि॒तार॑ङ्गच्छ॒स्वाहा॑मि॒त्रावरु॑णौ॒गच्छ॒स्वा
हा॑होरा॒त्रेग॑च्छ॒स्वाहा॒च्छन्दाꣳ॑सि॒गच्छ॒स्वाहा॒द्यावा॑पृथि॒वीग॑च्छ॒स्वाहा॑
य॒ज्ञङ्ग॑च्छ॒स्वाहा॒सोम॑ङ्गच्छ॒स्वाहा॑दि॒व्यन्नभो॑गच्छ॒स्वाहा॒ग्निंवै॑श्वान॒र
ङ्ग॑च्छ॒स्वाहा॒मनो॑मे॒हार्दि॑यच्छ॒दिवं॑ते॒धूमो॑गच्छतु॒स्व॒र्ज्योतिः॑पृथि
वीम्भ॒स्म॑नापृण॒स्वाहा॑ ॥ २१ ॥ मापः ॥ मापो॑मौष॑धीर्हिꣳसी

द्धांम्म्नोधाम्म्नोराजुँस्त्ततोंव्वरुणनोमुञ्च ॥ यदाहुरुग्घ्न्याऽइतिुव्वरुणे
तिुशपांमहेुततोंव्वरुणनोमुञ्च ॥ सुमिुत्त्रियानुऽआपुऽओषधयःसन्तु
दुर्म्मित्त्रियास्त्तस्म्मैंसन्तुयोुस्म्मान्द्वेष्टियञ्चवुयन्द्विुष्म्मः ॥ २२ ॥
[२] हुविष्ष्मंतीरिुमाः ॥ हुविष्म्मंतीरिुमाऽआपोहुविष्मांऽआ
विवासति ॥ हुविष्म्मान्देुवोऽअंध्वुरोहुविष्म्मा २ ऽअस्तुसूर्य्यः ॥
॥ २३ ॥ अुग्ग्नेर्वः ॥ अुग्ग्नेर्वोपन्नगृहस्युसदंसिसादयामीन्द्राग्ग्न्यो
र्ब्भागुधेयींस्त्थमित्त्रावरुणयोर्ब्भागुधेयींस्त्थुविश्श्वेषान्देुवानाम्भागु
धेयींस्त्थ ॥ अमूर्य्याऽउपुसूर्य्येुयाभिर्व्वासूर्य्यःसुह ॥ तानोंहि

ह्वन्त्वद्ध्व॒रम् ॥ २४ ॥ [२] हृ॒देत्वा॑ ॥ हृ॒देत्वा॒मन॑सेत्वादि॒वेत्वा॒
सूर्य्याँयत्वा ॥ ऊ॒र्द्ध्वमि॒मम॑द्ध्व॒रङ्कृदि॒वि॒दे॒वेषु॒होत्त्रा॑यच्छ ॥ २५ ॥ सोम॑
राजन् ॥ सोम॑राज॒न्विश्श्वा॒स्त्वम्प्र॒जाऽउ॒पाव॑रोह॒विश्श्वा॒स्त्वा॒म्प्र॒
जाऽउ॒पाव॑रोहन्तु ॥ शृ॒णोत्त्व॒ग्निः स॒मिध॒ाहव॑म्मेशृ॒ण्वन्त्वापोँधि॒ष
णा॑श्श्चदे॒वीः ॥ श्रोता॑ग्ग्रावाणोवि॒दु॒षोनय॒ज्ञꣳशृ॒णोतु॑दे॒वः स॑वि॒ताह॒व॑
म्मे॒स्वाहा ॥ २६ ॥ दे॒वीँराप॒ः ॥ दे॒वीँरापोऽ अपान्नपा॒द्योव॑ऊ॒र्म्मिँर्हँवि॒
ष्य॒ऽइन्द्रि॒यावा॑न्म॒दिन्त॑मः ॥ तन्दे॒वेभ्यो॑देव॒त्त्राद॑त्तशु॒क्र॒पेभ्यो॒ये॑
षा॑म्भा॒गस्त्थ॒स्वाहा॑ ॥ २७ ॥ काँर्षिरसि ॥ काँर्षिरसिसमु॒द्रस्य॒त्त्वा

क्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ॥
॥ २८ ॥ यमग्ग्ने ॥ यमग्ग्नेपृत्त्सुमर्त्त्यमवाव्वाजेषुयञ्जुनाः ॥ सयन्ताश
श्वतीरिषःस्वाहा ॥ २९ ॥ [५] देवस्यत्त्वा ॥ देवस्यत्त्वासवितुःप्प्र
सवेश्विनोर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ताब्भ्याम् ॥ आददेरावासिगभीर
मिममध्वरङ्कृधीन्द्रायसुषूत्तमम् ॥ उत्तमेनपविनोर्ज्जस्वन्तम्मधुम
न्तम्पयस्वन्तन्निग्ग्राब्भ्यास्त्थदेवश्रुतस्त्तर्प्पयतमामनोमे ॥ ३० ॥
मनोमे । तर्प्पयतव्वाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुर्म्मेतर्प्पय
तश्श्रोत्रम्मेतर्प्पयतात्त्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्मेतर्प्प

यतगणान्मेतर्प्पयतगणाममावितृषन् ॥ ३१ ॥ इन्द्रायत्त्वा ॥ इ
न्द्रायत्त्वावसुमतेरुद्रवतऽइन्द्रायत्त्वादित्त्यवतऽइन्द्रायत्त्वाभिमाति
ग्घ्ने ॥ श्येनायत्त्वासोमभृतेग्नयेत्त्वारायस्पोषदे ॥ ३२ ॥ यत्ते । सो
मदिविज्ज्योतिर्य्यत्पृथिव्यांय्यदुरावन्तरिक्षे ॥ तेनास्म्मैयजमाना
योरुरायेकृद्ध्यधिदात्रेवोचः ॥ ३३ ॥ श्वात्रास्त्थ ॥ श्वात्रास्त्थवृ
त्रतुरोराधोगूर्त्ताऽअमृतस्यपत्क्नीः ॥ तादेवीर्द्देवत्रेमंय्यज्ञन्नयतोपहूताः
सोमस्यपिबत ॥ ३४ ॥ माभेः ॥ माभेर्म्मासंविक्क्थाऽऊर्ज्जन्धत्स्वधि
षणेवीड्वीसतीवीडयेथामूर्ज्जन्दधाथाम् ॥ पाप्माहतोनसोमः ॥

॥ ३५॥ प्रागपांक् ॥ प्रागपागुदंगधुराक्सुर्व्वंतंस्त्वादिशुऽआधांवन्तु ॥
अम्म्बुनिष्पर्परुसमुरीर्व्विंदाम् ॥३६॥ त्वमुङ्ग ॥ त्वमुङ्गप्प्रशंꣳसिषोदेवः
शंविष्ठुमर्त्यम् ॥ नत्त्वदुन्न्योर्मघवन्नास्त्तिमर्ड्डितेन्द्रुब्ब्रवीमितुव्वचः ॥
॥ ३७ ॥ ८ ॥ इतिश्रीवाजसनेयसंहितायांषष्ठोऽध्यायः ॥ ६ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ वाचस्पतय उप
यामगृहीतोसि त्रिकावावायोयंवा द्विकौ यस्तएका प्राणायतिस्त्रो
मघवइन्द्राग्नी आगतमाघौमासश्चर्षणीधृतो विश्वेदेवासऽआगते
न्द्रमरुत्वो मरुत्वन्तंवृषभं मरुतान्त्वौजसे सजोषाइन्द्रमरुत्वाँ

संहि. २ँ इन्द्र महाँ २ँ इन्द्रो महाँ २ँ इन्द्र एकैकोदुत्यमष्टौ पञ्चविᳪ
॥३७॥ शतिरष्टाचत्त्वारिᳪशत् ॥ हरिः ॐ व्वाचस्पतये ॥ व्वाचस्पतयेपव
स्वव्वृष्ण्णोऽअᳪशुब्भ्याङ्गभस्तिपूतः ॥ देवोदेवेब्भ्यः पवस्वयेषा
म्भागोसि ॥ १ ॥ मधुमतीर्न्नः ॥ मधुमतीर्न्नऽइषस्कृधियत्तेसोमादा
ब्भ्यन्नामजागृवितस्म्मैतेसोमसोमायस्वाहास्वाहोर्व्वन्तरिक्षमन्वे
मिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृतोसि । व्विश्वेब्भ्यऽइन्द्रियेब्भ्यो
पृ.अ. दिव्व्येब्भ्यः पार्त्थिवेब्भ्योमनस्त्वाष्टुस्वाहात्त्वासुभवसूर्य्यायदेवेब्भ्य
७ स्त्वामरीचिपेब्भ्योदेवाᳪशोयस्म्मैत्त्वेडेतत्सत्यमुपरिप्प्रुताभङ्गेन

हुतोसौफट्प्राणायत्त्वाव्युानायत्त्वा ॥३॥ [३] उपुयामगृहीतोसि ॥
उपुयामगृहीतोस्युन्तर्य्यँच्छमघवन्पाहिसोमम् ॥ उरुष्ष्यरायुऽएषो
यजस्व॥४॥ अुन्तस्तै॥ अुन्तस्तेुद्यावापृथिुवीदधाम्म्युन्तर्द्दधाम्म्युुर्व्व
न्तरिक्षम् ॥ सुजूर्द्देवेभिुरवरैुः परैश्चान्तर्य्युामेमघवन्मादयस्व ॥ ५ ॥
स्वाङ्कृतोसि ॥ स्वाङ्कृतोसिुविश्वेभ्युऽइन्द्रिुयेभ्योदिुव्येभ्युःपार्त्थि
वेभ्युोमनस्त्त्वाष्टुस्वाहात्त्वासुभवुसूर्य्यायदेुवेभ्यस्त्त्वामरीचिुपे
भ्युऽउदानायत्त्वा ॥६॥ [३] आवायो ॥ आवायोभूषशुचिपाऽउप
नःसुहस्रन्तेनियुतोविश्ववार ॥ उपोतेुऽअन्धोमद्यमयामियस्यदेवद

धि॒षेपू॑र्व्व॒पेयँव्वा॒यवे॑त्त्वा ॥ ७ ॥ इन्द्र॑वायूऽइ॒मे । सु॒ताऽउप॒प्प्रयो॑भि॒रा
ग॑तम् ॥ इन्द॑वोवामु॒शन्ति॒हि ॥ उ॒प॒या॒मगृ॑हीतोसि॒व्वा॒य॑वऽइन्द्रवा॒यु
ब्भ्यान्त्वै॒षते॒योनि॑÷स॒जोषो॑ब्भ्यान्त्वा।८।[२]अ॒यंव्वा॑म्।अ॒यंव्वा॑म्मि॒त्त्रा
वरु॑णासु॒तःसोम॑ऽऋता॒वृधा ॥ ममे॑दि॒हश्श्रु॑त॒ꣳहव॑म् ॥ उ॒प॒या॒मगृ॑हीतो
सिमि॒त्त्रावरु॑णाब्भ्यान्त्वा ॥ ९ ॥ रा॒याव्व॒यम् ॥ रा॒याव्व॒यꣳस॑स॒वाꣳसो
मदेमह॒व्व्येन॑दे॒वायव॑से॒नगाव॑÷ ॥ तान्धे॒नुम्मि॑त्त्रावरुणाय॒वन्नो॑व्वि॒श्वाहा॑
धत्त॒मन॑पस्फु॒रन्तीमे॒षते॒योनि॑र्ऋ॒तया॒ब्भ्यां॑न्त्वा ॥ १० ॥ [२] या
वा॑म् ॥ याव॒ङ्कशा॒मधु॑म॒त्त्याश्श्वि॑नासू॒नृता॑वती ॥ तया॑य॒ज्ञम्मि॑मिक्ष

तम् । उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयोनिर्म्माद्ध्वीभ्यान्त्वा ॥
॥ ११ ॥ [१] तम्प्रत्नथा । पूर्वथाविश्वथेमथाज्ज्येष्ठतातिम्बर्हिष
दꣳस्वर्व्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्ध
से ॥ उपयामगृहीतोसिशण्डायत्त्वैषतेयोनिर्व्वीरताम्पाह्यपमृष्टꣳशण्डो
देवास्त्त्वाशुक्रपाःप्प्रणयन्त्वनाधृष्टासि ॥ १२ ॥ सुवीरोव्वीरान् ॥ सु
वीरोव्वीरान्प्रजनयन्परीह्यभिरायस्प्पोषेणयजमानम् ॥ सञ्जग्मा
नोदिवापृथिव्याशुक्रःशुक्रशोचिषानिरस्तꣳशण्डःशुक्रस्याधिष्ठानम
सि ॥ १३ ॥ अच्छिन्नस्यते । देवसोमसुवीर्यस्यरायस्प्पोषस्य

दाद्वितारःस्याम ॥ साप्प्रंथमासंस्कृंतिर्व्विंश्श्ववांरासप्प्रंथमोव्वरुंणोमि
त्त्रोऽअग्निः ॥ १४ ॥ सप्प्रथमः ॥ सप्प्रंथमोबृहस्प्पांतिश्चिकित्वाँस्त्त
स्म्माऽइन्द्रांयसुतमाजुंहोतुस्वाहां ॥ तृम्म्पन्तुहोत्त्रामद्ध्वोयाःस्विष्टा
याःसुप्प्रीताःसुहुंतायत्त्स्वाहायांडग्ग्नीत् ॥१५॥ [४] अयंव्वेनः ॥अयं
व्वेनश्चोदयत्त्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायूरजंसोव्विमाने ॥ इममपा
ᳪसंङ्गमेसूर्य्यंस्यशिशुन्नव्विप्प्रांमतिर्भीरिहन्ति ॥ उपयामगृंहीतोसि
मर्क्कांयत्वा ॥ १६ ॥ मनोन । येषुहवंनेषुतिग्ग्मंव्विपःशच्चयांव्वनुथोद्द्र
वन्ता ॥ आयःशर्य्याभिस्त्तुविनृम्म्णोऽअस्याश्श्रीणीतादिशंङ्गभे

स्तावेषतेयोनिः प्प्रजाः पाह्यपमृष्टोमर्क्कोँदेवास्त्वामन्थिपाः प्प्रणयु
न्त्वनाधृष्टासि ॥ १७ ॥ सुप्प्रजाः प्प्रजाः प्प्रजनयन्न्परीह्यभिराय
स्प्पोषेणयजमानम् ॥ सञ्जग्मानोदिवापृथिव्यामन्थीमन्थिशोचि
षानिरस्तोमर्क्कोँमन्थिनोधिष्ठानमसि ॥ १८ ॥ [३] येदेवासः ॥ येदे
वासोदिव्येकादशस्त्थपृथिव्यामद्ध्येकादशस्त्थ ॥ अप्प्सुक्षितोमहि
नैकादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्वम् ॥ १९ ॥ उपयामगृहीतोसि ॥
उपयामगृहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणः ॥ पाहियज्ञम्पाहियज्ञपतिं
विष्ण्णुस्त्वामिन्द्रियेणपातुविष्ण्णुन्त्वम्पाह्यभिसवनानिपाहि २० ॥

सोम॑÷पवते ॥ सोम॑÷पवते॒सोम॑÷पवते॒स्म्मै॒ब्ब्रह्म॑णे॒स्म्मै॒क्षत्त्राया॒स्म्मै
सु॒न्व॒ते॒यज॑मानायपवतऽइ॒षऽऊ॒र्ज्जेप॑वते॒द्भ्यऽओष॑धीब्भ्य॒ःपवते॒द्यावा॑
पृथि॒वीब्भ्यां॒म्पव॑तेसु॒भू॒ताय॒पव॑तेवि॒श्श्वेब्भ्य॑स्त्वादे॒वेब्भ्य॑ऽए॒षते॒यो
नि॒र्व्वि॒श्श्वेब्भ्य॑स्त्वादे॒वेब्भ्य॑÷ ॥ २१ ॥ [३] उ॒प॒या॒मगृ॑हीतोसि ॥ उ॒
प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाबृ॒हद्व॑ते॒वय॑स्वतऽउ॒क्थाव्यङ्गृह्णामि ॥ यत्तँ
ऽइन्द्रबृ॒हद्व॒यस्त॒स्म्मैत्त्वा॒विष्ण॑वेत्त्वै॒षते॒योनि॑रु॒क्थेब्भ्य॑स्त्वादे॒वेब्भ्य॑
स्त्वादे॒वा॒व्व्यंय॒ज्ञस्या॒यु॑षेगृह्णामिमि॒त्त्रावरु॑णाब्भ्यान्त्वा ॥ २२ ॥ मि॒त्त्रा
वरु॑णाब्भ्यान्त्वा । दे॒वा॒व्व्यंय॒ज्ञस्या॒यु॑षेगृह्णामीन्द्रा॑यत्त्वादे॒वा॒व्व्यंय॒ज्ञ

स्यायु॑षेगृह्णा॒मीन्द्रा॒ग्निब्भ्यां॑न्त्वादे॒वा॒व्व्यं॑य्य॒ज्ञस्यायु॑षेगृह्णा॒मीन्द्रा॒वरु
णाब्भ्यान्त्वादे॒वा॒व्व्यं॑य॒ज्ञस्या॒यु॑षेगृ॒ह्णा॒मीन्द्रा॒बृह॒स्पति॑ब्भ्यान्त्वादे॒वा
व्व्यं॑य्य॒ज्ञस्यायु॑षेगृह्णा॒मीन्द्रा॒विष्णु॒ब्भ्यान्त्वादे॒वा॒व्व्यं॑य्य॒ज्ञस्यायु॑षेगृ
ह्णामि॥२३॥[२]मूर्द्धान॑न्दि॒वः॥मूर्द्धान॑न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्यावै॑श्वा
न॒रमृ॒तऽआजा॒तम॒ग्निम्॥ क॒विꣳस॒म्म्राज॒मति॑थि॒ञ्जना॑नाम॒ासन्ना॒पा
त्र॑ञ्जनयन्तदे॒वाः॥ २४ ॥ उ॒प॒या॒मगृ॑हीतोसि । ध्रु॒वो॑सिध्रु॒वक्षि॑तिर्ध्रु॒वा
णा॑न्ध्रु॒वत॒मोच्च्यु॑ताना॒मच्च्यु॒त॒क्षित्त॑मऽए॒षते॒यो॒निर्वै॑श्वान॒राय॑त्त्वा॥ ध्रु॒व
न्ध्रु॒वेण॒मन॑सा॒वा॒चासो॑म॒मव॑नयामि ॥ अथा॑नु॒ऽइन्द्र॒इद्विशो॑सप॒त्नाः

सम॑नस॒स्कर॑त् ॥ २५ ॥ [२] यस्ते॑ । द्र॒प्सस्स्कन्द॑ति॒यस्ते॑ऽअ॒ꣳशुर्ग्ग्राव॑च्च्युतोधि॒षण॑योरु॒पस्था॑त् ॥ अ॒द्ध्व॒र्य्योर्व्वा॒परि॑व्वा॒यः॑प॒वित्रा॒त्तन्ते॑जुहोमि॒मन॑सा॒व्वष॑ट्कृत॒ꣳस्वाहा॑दे॒वाना॑मु॒त्क्रम॑णमासि ॥ २६ ॥ [१] प्रा॒णाय॑मे । व्व॒र्च्चो॒दाव्वर्च्च॑सेपवस्वव्व्या॒नाय॑मेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्वोदा॒नाय॑मेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्वव्वा॒चेमे॑व्वर्च्चो॒दाव्वर्च्च॑सेपवस्वक्क्रतू॒दक्षा॑भ्याम्मेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्वश्श्रोत्त्रा॑यमेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्वचक्षु॑र्भ्याम्मेव्वर्च्चो॒दसौ॒व्वर्च्च॑सेपवेथामा॒त्मने॑मे ॥ २७ ॥ आ॒त्मने॑मे । व्वर्च्चो॒दाव्वर्च्च॑सेपवस्वौज॑सेमेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्वायु॑षेमेव्वर्च्चो॒दाव्वर्च्च॑सेपवस्व

विश्वांभ्योमेप्रजाभ्योवर्च्चोदसौवर्च्चसेपवेथाम् ॥२८॥ कोसि । कतमोसिकस्यासिकोनामासि ॥ यस्यंतेनामामन्महियन्त्वा सोमेनातीतृपाम॥भूर्भुवःस्वःसुप्रजाःप्रजाभिःस्याꣳसुवीरोवीरैःसुपोषःपोषैः ॥२९॥ [३] उपयामगृहीतोसि ॥ उपयामगृहीतोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयामगृहीतोसिशुक्रायत्त्वोपयामगृहीतोसिशुचयेत्त्वोपयामगृहीतोसिनभसेत्त्वोपयामगृहीतोसिनभस्यायत्त्वोपयामगृहीतोसीषेत्त्वोपयामगृहीतोस्यूर्ज्जेत्त्वोपयामगृहीतोसिसहसेत्त्वोपयामगृहीतोसिसहस्यायत्त्वोपयामगृहीतोसितपसेत्त्वो

प॒या॒मगृ॑हीतो॑सितप॒स्याय॒त्त्वोप॒या॒मगृ॑हीतोस्यꣳहसस्प॒तये॑त्त्वा ॥
॥ ३० ॥ [१] इन्द्रा॑ग्नी॒ऽआग॑तम् ॥ इन्द्रा॑ग्नी॒ऽआग॑तꣳसु॒तङ्गी॒र्भि
र्न्न॒भो॑व्वरे॑ण्यम् ॥ अ॒स्यपा॑तान्धि॒ये॒षि॒ता ॥ उ॒प॒या॒मगृ॑हीतोसी॒न्द्रा॒ग्नि
ब्भ्या॑न्त्वै॒षते॒यो॑नि॑रि॒न्द्रा॒ग्निब्भ्या॑न्त्त्वा ॥ ३१ ॥ [१] आघ॑ ॥ आघा॒ये
ऽअ॒ग्निमि॑न्ध॒तेस्त्तणन्ति॑ब॒र्हिरा॑नु॒षक् ॥ ये॒षा॒मिन्द्रो॒यु॒वा॒सखा॑ ॥ उ॒प॒
या॒मगृ॑हीतोस्य॒ग्नी॒न्द्राब्भ्या॑न्त्वै॒षते॒यो॑निर॒ग्नी॒न्द्राब्भ्या॑न्त्वा ॥ ३२ ॥
[१] ओमा॑सश्चर्षणीधृतः ॥ ओमा॑सश्चर्षणीधृ॒तो॒व्विश्वे॑देवा॒सऽआ
ग॑त ॥ दा॒श्वाꣳसो॑दा॒शुषः॑सु॒तम् ॥ उ॒प॒या॒मगृ॑हीतो॒सि॒व्विश्वे॑ब्भ्य

स्त्वादेुवेब्भ्यंऽएषतेुयोनिुर्व्विश्वैब्भ्यस्त्वादेुवेब्भ्यं÷ ॥ ३३ ॥ [१] व्वि
श्वैदेवासः ॥ व्विश्वैदेवासुऽआगंतशृणुतामऽइमꣳहवंम् ॥ एदम्बुर्हि
र्न्निषींदत ॥ उपुयामगृंहीतोसिुव्विश्वैब्भ्यस्त्वादुवेब्भ्यंऽएषतेुयोनिुर्व्वि
श्वैब्भ्यस्त्वादेुवेब्भ्यं÷ ॥ ३४ ॥ [१] इन्द्रंमरुत्त्वः ॥ इन्द्रंमरुत्त्वऽइुह
पांहिुसोमुंय्यथांशार्य्युातेऽअपिबंःसुतस्यं ॥ तवुप्प्रणींतुीतवंशूरुशर्म्मु
न्नाविंवासन्तिकुवयं÷सुयुज्ञाः ॥ उपुयामगृंहीतुोसीन्द्रांयत्त्वामुरुत्त्वंत
ऽएषतेुयोनिुरिन्द्रांयत्त्वामुरुत्त्वंते ॥ ३५ ॥ [१] मुरुत्त्वन्तंव्वृषुभंव्वावृधान
मकंवारिन्दिुव्व्यꣳशासमिन्द्रम् ॥ व्विश्वासाहुमवंसेनूतंनायोग्ग्रꣳसं

होदामिहतꣳहुवेम ॥ उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ॥ उपयामगृहीतोसिमरुतान्त्वौजसे ॥ ॥ ३६ ॥ [१] सजोषाऽइन्द्र ॥ सजोषाऽइन्द्रसगणोमरुद्भिꣳसोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ १ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥ उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ॥ ३७ ॥ [१] मरुत्वाँ २ ऽइन्द्र । वृषभोरणायपिबसोममनुष्ष्वधम्मदाय ॥ आसिञ्चस्वजठरेमध्वऽऊर्म्मिन्त्वꣳराजासिप्प्रतिपत्सुतानाम् ॥ उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽएषते

योनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३८ ॥ [१] महाँ२इन्द्रः ॥ महाँ२ऽइ
न्द्रोनृवदाचर्षणिप्प्राऽउतद्विबर्हाऽअमिनःसहोभिः ॥ अस्म्मद्र्यग्ग्वावृ
धेव्वीर्य्यायोरुःपृथुःसुकृतःकर्त्तृभिर्भूत् ॥ उपयामगृहीतोसिमहेन्द्राय
त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥ ३९ ॥ [१] महाँ२इन्द्रः ॥ महाँ२ इन्द्रो
यऽओजसापर्ज्जन्न्योवृष्टिमाँ२ऽइव ॥ स्तोमैर्व्वत्त्सस्यव्वावृधे ॥ उपयामगृ
हीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥ ४० ॥ [१] उदुत्त्यम् ॥
उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेव्विश्श्वायसूर्य्यꣳस्वाहा ॥
॥ ४१ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य

व्वरु॑णस्या॒ग्नेः ॥ आप्प्रा॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्ष॒ꣳसूर्य्य॑ऽआ॒त्त्मा जग॑
त॒स्त॒त्त्स्थु॒ष॑श्च॒स्वाहा॑ ॥ ४२ ॥ अग्ने॒नय॑ । सु॒पथा॑रा॒येऽअ॒स्म्मान्त्विश्श्वा॑
नि दे॑व व॒युना॑नि व्वि॒द्वान् ॥ यु॒योद्ध्य॒स्म्मज्जु॑हुरा॒णमेनो॒भूयि॑ष्ठान्त॒नम॑
ऽउ॒क्तिं व्वि॒धेम॒स्वाहा॑ ॥४३॥ अ॒यन्नः॑ ॥ अ॒यन्नो॑ऽअ॒ग्निर्व्वरि॑वस्कृणोत्त्व॒य
म्मृधः॑पु॒रऽए॑तु॒प्प्रभि॒न्दन् ॥ अ॒यंव्वाजा॑ञ्जयतु॒व्वाजे॑सा॒ताव॒यꣳशत्रू॑ञ्जय
तु॒जर्हृ॑षाण॒ःस्स्वाहा॑ ॥४४॥ रू॒पेण॑वः ॥ रू॒पेण॑वोरू॒पम॒ब्भ्यागा॑न्तु॒थोवो॑
व्वि॒श्श्ववे॑दा॒व्विभ॑जतु ॥ ऋ॒तस्य॑पु॒थाप्प्रेत॑चु॒न्द्रद॑क्षिणा॒व्विस्व॒ःपश्श्य॒व्व्यु॒न्त
रि॑क्षंय्य॑त॒स्स्वसद॒स्यैः ॥४५॥ ब्राह्म॒णम॒द्य । व्विदे॑यम्पि॒तृम॑न्तम्पैतृम॒त्त्य

मृषिमार्षेयꣳसुधातुदक्षिणम् ॥ अस्म्मद्राता देवत्रागच्छत प्प्रदातार
माविशत ॥ ४६ ॥ अग्नयेत्त्वा ॥ अग्नयेत्त्वामह्यꣳव्वरुणोददातुसोमृत
त्त्वमशीयायुर्दात्त्रऽएधिमयोमह्यम्प्रतिग्ग्रहीत्त्रेरुद्रायत्त्वामह्यंव्वरुणो
ददातुसोमृतत्त्वमशीयप्प्राणोदात्त्रऽएधिव्वयोमह्यम्प्रतिग्ग्रहीत्त्रेबृह
स्प्पतयेत्त्वामह्यंवरुणोददातुसोमृतत्त्वमशीयत्त्वग्ग्दात्त्रऽएधिमयो
मह्यम्प्रतिग्ग्रहीत्त्रेयमायत्त्वामह्यंव्वरुणोददातुसोमृतत्त्वमशीयह
योदात्त्रऽएधिव्वयोमह्यम्प्रतिग्ग्रहीत्त्रे ॥ ४७ ॥ कोदात् ॥ कोदात्कस्म्माऽ
अदात्कामोदात्कामायादात् ॥ कामोदाताकामःप्प्रतिग्ग्रहीताकामै

तत्तें ॥ ४८ ॥ [८] ॥ २५ ॥ इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः ॥ ७ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ उपयामगृहीतोसि आदित्त्येभ्यः पञ्च वाममद्य द्वे सुशर्मास्येका बृहस्पतिसुतस्य द्वे हरिरसिचतस्रः समिन्द्रणोष्टौ माहिरेजतुदशमास्यःपञ्चकावातिष्ठयुक्ष्वाहीन्द्रामिदेकैका यस्मान्नद्वेग्नेपवस्वोत्तिष्ठन्नऽहश्चमुदुत्त्यमेकैकाजिघ्रद्वे विनइन्द्रवाचस्पतिंविश्वकर्मन्नेकैकाग्नयेत्त्वाचतस्र इहरातिस्तिस्रः परमेष्ठीदश त्रयोविꣳशतिस्त्रिषष्टिः ॥ हरिः ॐ उपयामगृहीतोसि ॥ उपयामगृहीतोस्यादित्त्येभ्यस्त्वा ॥

व्विष्णव॑ऽउरुगायै॒षते॒सोम॒स्तꣳर॑क्षस्व॒मात्त्वा॑दभन् ॥ १ ॥ क॒दाच॒न ।
स्त॒री॑रासि॒नेन्द्र॑सश्चासि॒दा॒शुषे॑ ॥ उपो॒पेन्नु॒म॑घव॒न्भूय॒ऽइन्नु॒ते॒दान॑न्दे॒
वस्य॑पृच्च्यतऽआदि॒त्त्येभ्य॑स्त्त्वा ॥ २ ॥ क॒दाच॒न । प्प्रयु॑च्छस्यु॒भे॑
निपा॑सि॒जन्म॑नी ॥ तुरी॑यादि॒त्त्य॒सव॑नन्तऽइन्द्रि॒यमा॑तस्त्थाव॒मृत॑
न्दि॒व्व्या॒दि॒त्त्येभ्य॑स्त्त्वा ॥ ३ ॥ य॒ज्ञोदे॒वाना॑म् ॥ य॒ज्ञोदे॒वाना॒म्प्प्र
त्त्ये॑तिसु॒म्नमादि॒त्त्यासो॒भव॑तामृ॒ड॒यन्त॑ः ॥ आवो॒र्व्वाची॑सुम॒तिर्व्व॑वृ
त्त्याद॒ꣳहो॑श्चि॒द्याव्व॑रिवो॒वित्त॒रास॑दादि॒त्त्येभ्य॑स्त्त्वा ॥ ४ ॥ व्विव॑स्व
न्नादित्त्य ॥ व्विव॑स्वन्नादि॒त्त्यै॒षते॑सोमपी॒थस्त्तस्मि॑न्मत्त्स्व ॥ श्रद॑

स्म्मैनरोव्वर्चसेदधातनयदाशीर्दादम्पतीव्वाममश्नुतः ॥ पुमान्पुत्रो
जायतेव्विन्दतेव्वस्वधाव्विश्वाहारपऽएधतेगृहे ॥ ५ ॥ [५] व्वाममद्य ।
सवितर्व्वाममुश्वोदिवेदिवेव्वाममस्म्मभ्यꣳसावीः ॥ व्वामस्यहिक्षय
स्यदेवभूरेरयाधियाव्वामभाजःस्याम ॥ ६ ॥ उपयामगृहीतोसि ।
सावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि ॥ जिन्वयज्ञञ्जिन्व
यज्ञपतिम्भगायदेवायत्वासवित्रे ॥ ७ ॥ [२] शतम् ३०० ॥
उपयामगृहीतोसि । सुशर्म्मासिसुप्प्रतिष्ठानोबृहदुक्षायनमः ॥ विश्वे
भ्यस्त्वादेवेभ्यऽएषतेयोनिर्व्विश्वेभ्यस्त्वादेवेभ्यः ॥ ८ ॥ [१]

उपयामगृहीतोसि ॥ उपयामगृहीतोसिबृहस्प्पतिसुतस्यदेवसोमत
ऽइन्द्रोरिन्द्रियावतःपत्क्नीवतोग्ग्रहाँ २ । ऽऋद्ध्यासम् । अहम्पुर
स्तादहमवस्ताद्यदन्तरिक्षन्तदमेपिताभूत् ॥ अहꣳसूर्यमुभय
तोददर्शाहन्देवानाम्म्परमङ्गुहायत् ॥ ९ ॥ अग्ग्ना३ऽइपत्क्नीवन् ॥
अग्ना३ऽइपत्क्नीवन्त्सजूर्देवेनत्वष्ट्रासोमम्पिबस्वाहा ॥ प्रजापतिर्वृ
षासिरेतोधारेतोमयिधेहिप्प्रजापतेस्तेवृष्ण्णोरेतोधसोरेतोधामशीय
॥ १० ॥ [२] उपयामगृहीतोसि ॥ उपयामगृहीतोसिहरिरसि
हारियोजनोहरिभ्यान्त्वा ॥ हर्य्योर्द्धानास्त्थसहसोमाऽइन्द्राय ॥

॥ ११ ॥ यस्त्तै ऽअश्वुसानिर्भुक्षोयोगोसनिस्त्तस्यंतइष्टयंजुषस्तु
तस्त्तोंमस्यशुस्त्तोक्थुस्योपंहूतुस्योपंहूतोभक्षयामि ॥ १२ ॥ देुवकृ
तुस्यैनंसः ॥ देुवकृंतुस्यैनंसोवुयजंनमासिमनुष्यकृतुस्यैनंसोवुय
जंनमासिपितृकृंतुस्यैनंसोवुयजंनमस्यात्त्मकृंतुस्यैर्नंसोवुयजंनमुस्ये
नंसऽएनसोवुयजंनमासि ॥ यच्चाहमेनोविद्वाँश्चुकारुयच्चाविद्वाँस्त्त
स्यसर्वुस्यैनंसोवुयजंनमासि ॥ १३ ॥ संवर्च्चँसा ॥ संवर्च्चँसापयंसा
सन्तुनूभिरगंन्महिमनंसासꣳशिवेनं ॥ त्वष्टांसुदत्त्रोविदंधातुरायोनु
मार्ष्टुंतन्वोयद्विलिष्टम् ॥ १४ ॥ [४] समिन्द्र । णोमनंसानेषिगो

भिःसꣳसूरिभिर्म्मघवन्त्सꣳस्वस्त्या ॥ सम्ब्रह्मणादेवकृतंय्यद
स्तिसन्देवानाꣳसुमतौयज्ञियानाꣳस्वाहा ॥ १५ ॥ संव्वर्च्चसा ॥ सं
व्वर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्रो
व्विदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १६ ॥ धातारातिःसविते
दञ्जुषन्ताम्म्प्रजापतिर्न्निधिपादेवोऽअग्निः ॥ त्वष्टाव्विष्ण्णु÷प्प्रजया
सꣳरराणायजमानायद्रविणन्दधातस्वाहा ॥ १७ ॥ सुगाव÷ ॥ सुगा
वोदेवाःसदनाऽअकर्म्मयऽआजग्ग्मेदꣳसवनञ्जुषाणाः ॥ भरमाणाव्वह
मानाहवीꣳष्ष्यस्मेधत्तव्वसवोव्वसूनिस्स्वाहा ॥ १८ ॥ याँ२ आवहः ॥

याँ२ आवहऽउशतोदेवदेवाँस्त्तान्प्रेरयस्वेऽअग्नेसधस्त्थे ॥ जक्षिवाꣳ
स÷पपिवाꣳसश्च व्विश्वेसुङ्घर्म्मꣳस्वरातिष्ठतानुस्वाहा ॥ १९ ॥ व्वय
ꣳहि । त्त्वाम्प्प्रयतियज्ञेऽअस्म्मिन्नग्नेहोतारमवृणीमहीह ॥ ऋधग
याऽऋधगुताशमिष्ठाःप्रजानन्यज्ञमुपयाहिव्विद्वान्त्स्वाहा ॥ २० ॥
देवागातुविदः ॥ देवागातुविदोगातुंव्वित्त्वागातुमित ॥ मनसस्पतऽ
इमन्देवयज्ञꣳस्वाहाव्वातेधाः ॥२१॥ यज्ञंयज्ञम् ॥ यज्ञंयज्ञङ्गच्छयज्ञ
पतिङ्गच्छस्वाय्योनिङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः
सर्व्ववीरस्तञ्जुषस्वस्वाहा ॥ २२ ॥ [८] माहि÷ ॥ माहिर्भूर्म्मापृ

दाकुः। उरुꣳहिराजाव्वरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ ॥ अप
देपादाप्प्रतिधातवेकरुतापवक्ताहृदयाव्विधश्चित् ॥ नमोव्वरुणायाभि
ष्ठितोव्वरुणस्यपाशः ॥ २३ ॥ अग्नेरनीकम् ॥ अग्नेरनीकमपऽआवि
वेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेसमिधंयक्ष्यग्नेप्प्रतिते
जिह्वाघृतमुच्चरण्यत्स्वाहा ॥२४॥ समुद्रेत ॥ समुद्रेतेहृदयमप्स्वन्तः
सन्त्वाव्विशन्त्वोषधीरुतापः ॥ यज्ञस्यत्त्वायज्ञपतेसूक्तोक्तौनमोवाके
व्विधेमयत्स्वाहा ॥२५॥ देवीरापः ॥ देवीरापऽएषवोगर्ब्भस्तꣳसुप्प्री
तꣳसुभृतम्बिभृत ॥ देवसोमैषतेलोकस्तस्मिञ्छञ्चव्वक्ष्वपरिचव्व

क्ष्व ॥ २६ ॥ अव॑भृथनिचम्पुण । निचेरुरा॑सिनिचम्पुणः ॥ अव॑देवै
र्देवकृ॑तमेनो॑यासिषमवुमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णोदेवारिषस्पा॑हि
देवाना॑ꣳसुमिदा॑सि ॥ २७ ॥ [५] एज॑तुदश॑मास्यः ॥ एज॑
तुदश॑मास्योगर्भोजुरायु॑णासुह ॥ षथायंव्वायुरेजा॑तिषथा॑समुद्रए
ज॑ति ॥ एवायन्दश॑मास्योऽअस्त्र॑ज्जुरायु॑णासुह ॥ २८ ॥ षस्यैते ॥ षु
ज्ञिषोगर्भोषस्यैषोनिर्हिरण्ययी ॥ अङ्गान्यहुताषस्युतम्मात्रासम॑
जीगमुꣳस्वाहा॑ ॥ २९ ॥ पुरुदस्म्मोव्विषु॑रूपः ॥ पुरुदस्म्मोव्विषु॑
रूपऽइन्दुरन्तम्महिमान॑मानञ्जुधार॑ः ॥ एक॑म्पदीन्द्विपदीन्त्रिपदीञ्च

तु॒ष्प॑दीम॒ष्टाप॑दीम्भुव॒नानु॑प्प्रथन्ता॒ꣳस्वाहा॑ ॥ ३० ॥ मरु॑तो॒यस्य॑॥
मरु॑तो॒यस्य॒हिक्षये॑पा॒थादि॒वोवि॑महसः ॥ ससु॑गो॒पात॑मो॒जनः॑ ॥३१॥
म॒हीद्यौः। पृ॑थि॒वी॑चनऽइ॒मय्ँय॒ज्ञम्मि॑मिक्षताम्॥ पि॒पृ॒तान्नो॒भरी॑मभिः॥
॥ ३२ ॥ [५] आतिष्ठ। वृत्रह॒न्रथय्ँयु॒क्ता ते॒ब्रह्म॑णा॒हरी॑ ॥ अ॒र्वा॑ची
न॒ꣳसु॒ते॒मनो॒ग्ग्रावा॑कृणोतुव॒ग्नुना॑ ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा
षो॒ड॒शिन॑ऽएषते॒योनि॒रिन्द्रा॑यत्त्वाषो॒ड॒शिने॑ ॥ ३३ ॥ [१] यु
क्ष्वाहि । के॒शिना॒हरी॒वृष॑णाकक्ष्य॒प्प्रा ॥ अथा॑नऽइन्द्रसोमपा
गि॒राम॒प॑श्रुतिञ्चर ॥ उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाषो॒ड॒शिन॑ऽएषते॒

१५१२८

योनि॒रिन्द्रा॑यत्त्वाषोड॒शिने॑ ॥ ३४॥ [१] इन्द्र॒मित् ॥ इन्द्र॒मिद्धरी॑
वह॒तोप्प्र॑तिधृष्टशवसम् ॥ ऋषी॑णाश्चस्त्तु॒तीरुप॑य॒ज्ञश्च॒मानु॑षाणाम् ॥
उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वाषोड॒शिन॑ऽएषते॒योनि॒रिन्द्रा॑यत्त्वाषोड॒
शिने॑ ॥ ३५ ॥ [१] यस्मा॒न्न । जा॒तःपरो॑ऽअ॒न्योऽअस्त्तियऽआ॑वि॒
वेश॒भुव॑नानि॒विश्वा ॥ प्र॒जाप॑तिःप्प्र॒जया॑सꣳररा॒णस्त्रीणि॒ज्ज्योती॑
ꣳषिसचते॒सषो॑ड॒शी ॥ ३६ ॥ इन्द्र॑श्च । स॒म्म्राड्व॒रु॑णश्च॒राजा॒
तौते॑भ॒क्षश्च॑क्रतु॒रग्ग्र॑ऽएतम् ॥ तयो॑र॒हमनु॑भ॒क्षम्म्भ॑क्षयामि॒वाग्ग्दे॒वी
जु॑षा॒णासोम॑स्यतृप्प्यतु॒स॒हप्प्रा॒णेन॒स्वाहा ॥ ३७ ॥ [२] अग्ग्ने॒पव॑

स्व ॥ अग्नेपवस्वस्वपाऽअस्मेब्बर्च्चःसुवीर्य्यम् ॥ दधद्द्रयिम्म
यिपोषम् ॥ उपयामगृहीतोस्यग्नयेत्त्वाब्बर्च्चसऽएषतेयोनिरग्नयेत्त्वाब्ब
र्च्चसे ॥ अग्नेब्बर्च्चस्विन्वर्च्चस्वाँस्त्वन्देवेष्ष्वसिवर्च्चस्वानहम्मनुष्ष्ये
षुभूयासम् ॥३८॥ [१] उत्तिष्ठन्नोजसा ॥ उत्तिष्ठन्नोजसासहपीत्वीशि
प्प्रेऽअवेपयः ॥ सोममिन्द्रचमूसुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वौ
जसऽएषतेयोनिरिन्द्रायत्त्वौजसे ॥ इन्द्रौजिष्ठौजिष्ठस्त्वन्देवेष्ष्वस्यो
जिष्ठोहम्मनुष्ष्येषुभूयासम् ॥ ३९ ॥ [१] अदृश्श्रमस्य ॥ अदृश्श्रम
स्यकतवोव्विरश्म्मयोजनाँ२ अनु ॥ भ्राजन्तोऽअग्ग्नयोयथा ॥

उपयामगृहीतोसिसूर्य्यायत्त्वाभ्भ्राजायैषतेयोनिꣳसूर्य्यायत्त्वाभ्भ्रा
जायं ॥ सूर्य्यंभ्भ्राजिष्ठभ्भ्राजिष्ठस्त्त्वन्देवेष्ष्वसिभ्भ्राजिष्ठोहम्मनु
ष्ष्येषुभूयासम् ॥ ४० ॥ [१] उदुत्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्व
हन्तिकेतवः ॥ दृशेविश्श्वायसूर्य्यम् ॥ उपयामगृहीतोसिसूर्य्यायत्त्वा
भ्भ्राजायैषतेयोनिꣳसूर्य्यायत्त्वाभ्भ्राजायं ॥ ४१ ॥ [१] आजिग्घ्र ।
आजिग्घ्रकलशम्महय्यात्त्वाव्विशन्त्त्विन्दवꣳ ॥ पुनरूर्ज्जानिवर्त्तस्वसा
नःसहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥ ४२ ॥ इडे
रन्ते ॥ इडेरन्तेहव्व्येकाम्म्येचन्द्रेज्ज्योतेदितिसरस्वतिमहिव्विश्श्रुति ॥

एतातैंऽअग्घ्न्युेनामाँनिदुवेब्भ्योंमासुकृतंम्ब्रूतात् ॥ ४३ ॥ [२] व्विं
न÷ ॥ व्विनंऽइन्द्रुमृधोंजहिनुीचायंच्छपृतन्न्युतः ॥ योऽअुस्म्माँ२अं
भिदासुत्त्यधंरङ्गमयुातमं÷ ॥ उपयामगृंहीतुोसीन्द्रांयत्त्वाव्विुमृधऽएष
तुयोंनिुरिन्द्रांयत्त्वाव्विुमृधें ॥ ४४ ॥ [१] व्वाुच्चस्प्पतिं । व्विश्श्वकंर्म्मा
णमूतयेंमनुोजुवंव्वाजेंऽअद्याहुंवेम ॥ सनोुव्विश्श्वांनिहवंनानिजोषद्व्वि
श्श्वशंम्भूरवंसेसाधुकंर्म्मा ॥ उपयामगृंहीतुोसीन्द्रांयत्त्वाव्विुश्श्वकंर्म्म
णऽएषतुयोनिुरिन्न्द्रांयत्त्वाव्विुश्श्वकंर्म्मणे ॥ ४५ ॥ [१] व्विश्श्वंक
र्म्मंन्न्हुविषां ॥ विश्श्वंकर्म्मंन्न्हुविषाव्वर्द्धंनेनत्त्रातारुमिन्न्द्रंमकृणोरवु

ह्व्यम् ॥ तस्म्मैविशःसमनमन्तपूर्व्वीरयमुग्ग्रोविहव्योयथासत् ॥ उप
यामगृहीतोसीन्न्द्रायत्त्वाविश्श्वकर्म्मणऽएषतेयोनिरिन्न्द्रायत्त्वावि
श्श्वकर्म्मणे ॥ ४६ ॥ [१] उपयामगृहीतोसि ॥ उपयामगृहीतोस्य
ग्नयेत्त्वागायत्रच्छन्दसङ्गृह्णामीन्द्रायत्त्वात्रिष्टुप्प्छन्दसङ्गृह्णामिवि
श्वेब्भ्यस्त्त्वादेवेब्भ्योजगच्छन्दसङ्गृह्णाम्म्यनुष्टुप्तेभिगरः ॥ ४७ ॥
व्रेशीनान्त्त्वा ॥ व्रेशीनान्त्त्वापत्त्मन्नाधूनोमिकुकूननानान्त्त्वापत्त्म
न्नाधूनोमिभन्दनानान्त्त्वापत्त्मन्नाधूनोमिमदिन्तमानान्त्त्वापत्त्म
न्नाधूनोमिमधुन्तमानान्त्त्वापत्त्मन्नाधूनोमिशुक्रन्त्त्वाशुक्रआधूनो

म्म्यन्न्हौरूुपेसूर्य्यँस्यरुश्मिम्मषुँ ॥ ४८॥ कुकुभꣳरूुपं । वृषुभस्यरोच
तेबृहच्छुक्रःशुक्रस्यपुरुोगाःसोमुःसोमस्यपुरुोगाः ॥ यत्तेंसुोमादाब्भ्यु
न्नामुजागृंविुतस्म्मैत्त्वागृह्णामिुतस्म्मैतेसोमुसोमायुस्वाहा ॥ ४९ ॥ उु
शित्कम् ॥ उुशित्कन्देंवसोमुाग्नेःप्प्रियम्म्पाथोपींहिुवशीत्त्वन्न्देंवसुो
मेन्न्द्रंस्यप्प्रियम्म्पोथोपींह्युस्म्मत्त्सखुात्त्वन्न्देंवसोमुव्विश्श्वेंषान्न्देुवाना
म्प्प्रियम्पाथोपींहि ॥ ५० ॥ [४] इहरति÷ ॥ इहरतिंरिुहरंमद्ध्वमिुहधृ
तिंरिुहस्वधृतिुꣳस्वाहा ॥ उुपसृजन्धुरुणंम्मुात्त्रेधुरुणोंमुातरुन्न्धयंन् ॥
रायस्प्पोषंमुस्मासुंदीधरुत्त्स्वाहा ॥ ५१ ॥ सुत्त्रस्युऽऋद्धि÷ ॥ सुत्त्र

स्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम ॥ दिवंम्पृथिव्याऽअद्ध्या
रुहामाविदामदेवान्त्स्वर्ज्ज्योति÷ ॥ ५२ ॥ युवन्तम् ॥ युवन्तमिन्द्रा
पर्व्वतापुरोयुधायोन÷पृतन्यादपतन्तमिद्धतंवज्ज्रेणतन्तमिद्धतम् ॥
दूरेचत्तायच्छन्त्सद्गहनंयदिनक्षत् ॥ अस्म्माकंशत्रून्परिशूरवि
श्वतोदर्म्मादर्षीष्टविश्वत÷ ॥ भूर्भुवःस्व÷सुप्रजाःप्रजाभि÷स्या
मसुवीरोवीरैःसुपोषःपोषैः ॥ ५३ ॥ [३] परमेष्ठ्यभिधीतः । प्रजाप
तिर्व्वाचिव्याहृतायामन्धोऽअच्छेतःसवितासन्यांविश्वकर्म्मादीक्षा
यांपूषासोमक्रयण्यामिन्द्रश्च ॥ ५४ ॥ इन्द्रश्च । मरुतश्चक्रयायो

पोत्त्थितोसुंरःपुण्ण्यमांनोमित्त्रःक्क्रीतोव्विष्ष्णु÷शिपिविष्टऽऊरावासंन्नो
व्विष्ष्णुर्न्नुरन्न्धिषःप्प्रोह्यमांणः ॥ ५५ ॥ प्प्रोह्यमांणुःसोमुऽआगंतो
व्वरुंणऽआसुन्न्द्यामासंन्नोग्ग्निराग्नीध्रुऽइन्न्द्रोंहविर्द्धानेथंर्व्वोपावह्रियमा
णोविश्श्वैंदेवाः ॥ ५६ ॥ व्विश्श्वैंदेवाः ॥ व्विश्वैंदेवाऽअंशुषुन्न्यु
प्प्तोव्विष्ण्णुराप्प्रीतुपाऽआंप्प्याय्यमानोयुमःसूयमांनोव्विष्ण्णु÷सम्भ्रि
यमांणोव्वायुःपूयमांनःशुक्क्रःपूतःशुक्क्रःक्षीरश्श्रीम्मुन्न्थीसंक्तुश्श्रीर्व्विश्श्वे
देवाः ॥ ५७ ॥ व्विश्श्वैंदेवाः ॥ व्विश्श्वैंदेवाश्चंमुसेषून्न्नीतोसुर्हो
मायोद्यंतोरुद्द्रोहूयमांनोव्वातोब्भ्यावृत्तोनृचक्षाःप्प्रतिंक्ख्यातोभुक्षो

भक्ष्यमाणꣳपितरोनाराशꣳसाः ॥ ५८ ॥ सन्नःसिन्धुः ॥ सन्नःसिन्धु
रवभृथायोद्यतꣳसमुद्रोऽभ्यवह्रियमाणꣳसलिलःप्रप्लुतोययोरोजसा
स्कभितारजाꣳसिवीर्येभिर्वीरतमाशविष्ठा ॥ यापत्येतेऽअप्रती
तासहोभिर्विष्णूऽअगन्वरुणापूर्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥ देवा
न्दिवमगन्यज्ञस्ततोमाद्रविणमष्टुमनुष्यानन्तरिक्षमगन्यज्ञस्ततो
माद्रविणमष्टुपितॄन्पृथिवीमगन्यज्ञस्ततोमाद्रविणमष्टुयङ्कञ्चलोकम
गन्यज्ञस्ततोमेभद्रमभूत् ॥ ६० ॥ चतुस्त्रिꣳशत्तन्तव ॥ चतुस्त्रिꣳ
शत्तन्तवोयेवितत्निरेयऽइमंयज्ञꣳस्वधयाददन्ते ॥ तेषाञ्छिन्नꣳ

सम्म्बेतद्दंधामिस्वाहांघुम्मौंऽअप्प्यैतुदेवान् ॥ ६१ ॥ यज्ञस्युदोहं ॥ यज्ञस्युदोहोव्वितंतꣳपुरुत्त्रासोऽअंष्टुधादिवंमुन्वातंतान ॥ सयंज्ञधुक्ष्वुमहिंमेप्प्रजायांꣳरायस्प्पोषंव्विश्श्वुमायुंरशीयुस्वाहां ॥ ६२ ॥ आपंवस्व ॥ आपंवस्वुहिरंण्ण्यवुदश्श्वंवत्त्सोमव्वीरवंत् ॥ व्वाजुङ्गोमंन्तुमाभंरुस्वाहां ॥ ६३ ॥ [१०] ॥ २३ ॥ इतिश्रीवाजसनेयसंहितायामष्टमोऽध्यायः॥८॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ देवसवितश्चतस्त्रःइन्द्रस्यवज्रःपञ्चदेवस्याहंदशआपयोतिस्त्रःवाजस्येममष्टौ अग्निरेकाक्षरेणैषतेचतुष्कौसविताद्वे अष्टौचत्वारिꣳशत् । हरिःॐ देव

साऽवितꣳ ॥ देव॑सवित॒ऽप्प्रसु॑वय॒ज्ञम्प्रसु॑वय॒ज्ञप॑ति॒म्भगा॑य ॥ दि॒व्यो॑ग
न्ध॒र्व्वःके॑त॒पूःके॒तंन्नऽपुनातुव्वा॒चस्पति॒र्व्वाजं॑न्नऽस्वदतु॒स्वाहा॑ ॥ १ ॥
ध्रु॒व॒सदं॑न्त्वा । नृ॒षदं॑म्मन॒ऽसद॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जुष्टं॑ङ्गृ॒ह्णा
म्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम् ॥ अ॒प्प्सु॒षदं॑न्त्वाघृत॒सदं॑व्योम॒
सद॑मुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जुष्टं॑ङ्गृ॒ह्णाम्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒
जुष्ट॑तमम् ॥ पृ॒थि॒वीसदं॑न्त्वान्तरिक्ष॒सदं॑न्दिवि॒सदं॑न्देव॒सदं॑न्नाक॒सद॑
मुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जुष्टं॑ङ्गृ॒ह्णाम्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑
तमम् ॥ २ ॥ अपाꣳरसम् ॥ अ॒पाꣳरस॒मुद्द्व॑यस॒ꣳसूर्य्ये॒सन्त॒ꣳसमा॒

हितम् ॥ अ॒पाꣳरस॑स्य॒योरस॒स्तंवो॑गृह्णाम्म्युत्त॒ममुप॑या॒म॑गृहीतो॒सी
न्द्रा॑यत्त्वा॒जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम् ॥ ३ ॥ ग्रहा॑ऽ
ऊर्ज्जा॑हुतयः ॥ ग्रहा॑ऽऊर्ज्जा॑हुतयो॒ब्यन्तो॒बिप्प्रा॑यम॒तिम् ॥ तेषा॒ं॑बि
शि॑प्प्रियाणाबो॒हमिष॒मूर्ज्ज॒ꣳसम॑ग्ग्रभमुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जु
ष्ट॑ङ्गृह्णाम्म्ये॒षते॒यानि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम् ॥ स॒म्म्पृचौ॑स्त्थ॒ꣳस
म्मा॑भ॒द्द्रेणं॑पृङ्क्तंबिपृचौ॑स्त्थो॒बिमा॑पाप्प्मना॑पृङ्क्तम् ॥ ४ ॥ [४] इन्द्र॑स्य॒ब
ज्ज्र॑ः ॥ इन्द्र॑स्य॒बज्ज्रो॑सिबाज॒सास्त्वया॒यंबाजꣳसेत् ॥ बाज॑स्य॒नुप्प्र॑स॒वे
मा॒तर॑म्म॒हीमदि॑ति॒न्नाम॒बच॑साकरामहे ॥ यस्या॑मि॒दंबिश्श्व॒म्म्भुब॑न

मा॒वि॒वे॑श॒तस्यां॑न्नो दे॒वः सं॑वि॒ता धर्म्मं॑ साविषत्।५।।अ॒प्प्स्व॒न्तः।।अ॒प्प्स्व॒
न्त॒रमृतं॑म॒प्प्सु भे॑ष॒जम॒पामु॒तप्प्रश॑स्ति॒ष्वश्श्वा॒भव॑तव्वाजिनः ॥ दे॒
वी॑रापो॒यो व॑ऽऊ॒र्म्मिः प्प्रतू॑र्त्तिः क॒कुन्मा॑न्वाज॒सास्ते॑ना॒यंव्वाजꣳसेत् ॥
॥ ६ ॥ व्वातो॑ वा ॥ व्वातो॑ वा॒ मनो॑ वा ग॒न्ध॒र्व्वाः स॒प्तवि॑ꣳशतिः ॥ ते॒ऽअग्रे॑
श्वं॑मयुञ्जँस्ते॒ऽअ॑स्मिञ्ज॒वमा द॑धुः ॥ ७ ॥ व्वातं॑रꣳहा भव॒व्वाजि॑न्यु
ज्यमा॑न॒ऽइन्द्र॑स्येव॒दक्षि॑णः श्श्रि॒यैधि ॥ यु॒ञ्जन्तु॒त्त्वा म॒रुतो॑ व्वि॒श्ववे॑द
स॒ऽआ त॒त्त्वष्टा॑ प॒त्त्सु ज॒वन्द॑धातु ॥ ८ ॥ ज॒वो यः ॥ ज॒वो यस्ते॑ व्वाजि॒न्नि
हि॑तो॒ गुहा॒ यः श्ये॒ने परी॑त्तो॒ऽअच॑रच्च॒ व्वाते॑ ॥ ते॒नंनो॑ व्वाजि॒न्बल॑वा॒न्बले॑न

व्वाज॒जिच्च॒भव॒समर्ने चपारायि॒ष्ण्ण॒ः ॥ व्वाजिनोव्वाजजितो॒व्वाजꣳसरि॒
ष्यन्तो॒ब्बृह॒स्प्पतेर्ब्भा॒गमवंजिग्घ्रत ॥ ९ ॥ [५] दे॒वस्या॒हम् ॥ दे॒व
स्याहꣳसंवि॒तु॒ःसु॒वेसु॒त्त्यसंवसोब्बृह॒स्प्पतेरु॒त्त॒मन्नाकꣳरु॒हेयम् ॥ दे॒व
स्याहꣳसंवि॒तु॒ःसु॒वेसु॒त्त्यसंवसु॒ऽइन्न्द्रंस्योत्त॒मन्नाकꣳरु॒हेयम् ॥ दे॒व
स्याहꣳसंवि॒तु॒ःसु॒वेसु॒त्त्यप्प्रंसवसोब्बृह॒स्प्पतेरु॒त्त॒मन्नाकंमरुहम् ॥ दे॒व
स्याहꣳसंवि॒तु॒ःसु॒वेसु॒त्त्यप्प्रंसवसु॒ऽइन्द्रंस्योत्त॒मन्नाकंमरुहम् ॥ १० ॥
बृहस्प्पतेव्वाजंम् ॥ बृहस्प्पते॒व्वाजंज्जय॒ब्बृह॒स्प्पत॒येव्वाचंव्वदत॒ब्बृह॒स्प्पतिं॒
व्वाजंज्जापयत ॥ इन्द्र॒व्वाजंज्जयेन्द्रायव्वाचंव्वदतेन्द्रं॒व्वाजंज्जापयत ॥ ११ ॥

एषाव॑÷ ॥ एषाव॒ङ्सास॒त्त्यास॒ंव्वाग॑भूद्द्ययाबृह॒स्प्पति॒ंव्वाज॒मजीजप॒ता
जीजप॒तबृह॒स्पति॒ंवाज॒ंव्वन॑स्प्पतयो॒व्विमु॑च्च्यद्ध्वम् ॥ एषाव॒ङ्सास॒त्त्या
स॒ंव्वाग॑भूद्द्ययेन्द्र॒ंव्वाज॒मजीजप॒ताजीजप॒तेन्द्र॒ंव्वाज॒ंव्वनस्प्पतयो॒व्विमु॑च्च्य
द्ध्वम् ॥ १२ ॥ दे॒वस्या॒हम् ॥ दे॒वस्या॒हꣳस॑वि॒तुःस॒वेस॒त्यप्प्र॑सव
सो॒बृह॒स्प्पतेर्व्वा॑ज॒जितो॒व्वाज॑ञ्जेषम् ॥ व्वाजिनो॒वाज॒जितो॒द्ध्वं॒नस्क॒भ्नु
वन्तो॒यो॒जनं॒मि॒मा॑ना॒ङ्काष्ठा॑ङ्ग॒च्छत ॥ १३ ॥ एषस्य॑ ॥ एषस्य॒व्वाजी
क्षि॒प॒णिन्तु॑रण्ण्यतिग्ग्री॒वाया॑म्ब॒द्धोऽअ॑पिक॒क्षऽआ॒सनि॑ ॥ क्रतु॑न्दधि॒
क्राऽअनु॑स॒ꣳसनि॑ष्ष्यदत्त्प॒थामङ्का॒ꣳस्यन्वा॒पनी॑फण॒त्त्स्वाहा॑ ॥ १४ ॥

उतस्म्मं ॥ उतस्मास्यद्द्रवतस्तुरण्ण्यतः पर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः÷
श्येनस्येवद्ध्रजतोऽअङ्कसम्परिदधिक्क्राव्ण्णः÷सहोर्ज्जातरित्रतꣳस्वाहा ॥
॥ १५ ॥ शन्नः÷ ॥ शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवꣳस्व
र्क्काः ॥ जम्भयन्तोहिंवृकꣳरक्षाꣳसिसनेम्म्यस्म्मद्युयवन्नमीवाः ॥
॥ १६ ॥ तेनः÷ ॥ तेनोऽअर्व्वन्तोहवनश्श्रुतोहवंविश्श्वेशृण्ण्वन्तुव्वाजि
नोमितद्द्रवꣳ ॥ सहस्रसामेधसातासनिष्ष्यवोमहोयेधनꣳसमिथेषु
जब्भ्रिरे ॥ १७ ॥ व्वाजेवाजेवत । व्वाजिनोनोधनेषुव्विप्प्राऽअमृताऽ
ऋतज्ञाः ॥ अस्यमद्ध्वः÷पिबतमादयद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानैः ॥

॥ १८ ॥ आमाव्वाजस्यप्प्रसवोजगम्म्यादेमेद्यावापृथिवीव्विश्व
रूपे ॥ आमांगन्ताम्पितरांमातराचामासोमोऽअमृतत्त्वेनगम्म्या
त् ॥ व्वाजिनोव्वाजजितोव्वाजꣳससृवाꣳसोबृहस्प्पतेर्भागमवजि
घ्रतनिमृजानाः ॥ १९ ॥ [१०] आपयेस्वाहा । स्वापयेस्वाहापि
जायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहाह्नेमुग्धायस्वाहा
मुग्धायव्वैनꣳशिनायस्वाहाव्विनꣳशिनऽआन्त्यायनायस्वाहान्त्या
यभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहा ॥ २० ॥ आ
युर्य्यज्ञेनं । कल्प्पताम्प्राणोयज्ञेनंकल्प्पताञ्चक्षुर्य्यज्ञेनंकल्पताꣳ

ꣳश्श्रोत्त्रंय्यज्ञेनकल्पताम्पृष्ठंय्यज्ञेनकल्पतांय्यज्ञोयज्ञेनकल्पताम् ॥
प्रजापतेःप्प्रजाऽअभूमस्वर्द्देवाऽअगन्मामृताऽअभूम ॥ २१ ॥
अस्म्मेवः ॥ अस्म्मेवोऽअस्त्त्विन्द्रियमस्म्मेनृम्म्णमुतक्क्रतुरस्म्मेव
र्च्चाꣳसिसन्तुवः ॥ नमोमात्त्रेपृथिव्यैनमोमात्त्रेपृथिव्याऽइयन्तेराड्य
न्तासियमनोध्रुवोसिधरुणः ॥ कृष्ष्यैत्त्वाक्षेमायत्त्वारय्यैत्त्वापोषा
यत्त्वा ॥ २२ ॥ [३] व्वाजस्येमम् ॥ व्वाजस्येमम्प्प्रसवःसुषुवेग्ग्रेसोम
ꣳराजानमोषधीष्ष्वप्प्सु ॥ ताऽअस्म्मब्भ्यम्मधुमतीर्ब्भवन्तुव्वयꣳ
राष्ट्रेजागृयामपुरोहिताःस्वाहा ॥ २३ ॥ व्वाजस्येमाम् ॥ व्वाजस्येमा

म्प्रसवःशिश्रियेदिवमिमाचव्विश्वाभुवनानिसम्म्राट् ॥ अदित्स
न्तन्दापयतिप्प्रजानन्त्सनोरयिꣳसर्व्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥
वाजस्यनु । प्प्रसवऽआबभूवेमाचव्विश्वाभुवनानिसर्व्वतः ॥ सने
मिराजापरियातिव्विद्वान्प्रजाम्पुष्टिँव्वर्द्धयमानोऽअस्मेस्वाहा ॥ २५ ॥
सोमꣳराजानम् ॥ सोमꣳराजानमवसेग्निमन्वारभामहे ॥ आदि
त्यान्विष्णुꣳसूर्यम्ब्रह्माणञ्चबृहस्पतिꣳस्वाहा ॥ २६ ॥ अर्य्यमण
म्बृहस्प्पतिम् ॥ अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानायचोदय ॥ व्वाचं
व्विष्णुꣳसरस्वतीꣳसवितारञ्चव्वाजिनꣳस्वाहा ॥ २७ ॥ अग्नेऽअच्छ ॥

अग्नेऽअच्छावद्देहनःप्रतिनःसुमनाभव ॥ प्रनोयच्छसहस्रजित्त्वꣳ
हिधनदाऽअसिस्वाहा ॥२८॥ प्रनः ॥ प्रनोयच्छत्वर्यमाप्रपूषाप्र
बृहस्पतिः ॥ प्रवाग्देवीददातुनःस्वाहा ॥ २९ ॥ देवस्यत्त्वासवितुः
प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्त्यैव्वाचोयन्तु
र्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्म्राज्येनाभिषिञ्चाम्म्यसौ ॥ ३० ॥
[८] अग्निरेकाक्षरेण । प्राणमुदजयत्तमुज्जेषमश्विनौद्व्यक्षरेणद्वि
पदोमनुष्यानुदजयतान्तानुज्जेषंविष्णुस्त्र्यक्षरेणत्रील्लोँकानुदजयत्ता
नुज्जेषꣳसोमश्चतुरक्षरेणचतुष्पदःपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्ष

रेण ॥ ३१ ॥ पूषापञ्चाक्षरेण । पञ्चदिशऽउदजयत्ताऽउज्जेषꣳ
सविताषडक्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेण सप्त
ग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेणगायत्रीमुदज
यत्तामुज्जेषम्मित्रोनवाक्षरेण ॥ ३२ ॥ मित्रो नवाक्षरेण । त्रिवृ
तꣳस्तोममुदजयत्तमुज्जेषंव्वरुणोदशाक्षरेणव्विराजमुदजयत्तामुज्जेष
मिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदजयत्तामुज्जेषंव्विश्वेदेवाद्वादशाक्षरेण
जगतीमुदजयँस्तामुज्जेषंव्वसवस्त्रयोदशाक्षरेण ॥ ३३ ॥ वस
वस्त्रयोदशाक्षरेण । त्रयोदशꣳस्तोममुदजयँस्तमुज्जेषꣳरुद्राश्च

तु॒र्द॑शाक्षरेणचतु॒र्द॑श॒ꣳस्तोम॒मु॒द॑जय॒ँस्तमु॒ज्जे॑षमा॒दि॒त्याःपञ्च॑दशाक्ष
रेणपञ्च॒द॒श॒ꣳस्तोम॒मु॒द॑जय॒ँस्तमु॒ज्जे॑षमादि॑ति॒ःषो॑डशाक्षरेणषो॒ड॒श॒ꣳ
स्तोम॒मु॒द॑जय॒त्तमु॒ज्जे॑षम्प्र॒जाप॑तिः   स॒प्तद॑शाक्षरेणसप्त॒द॒श॒ꣳस्तो
म॒मु॒द॑जय॒त्तमु॒ज्जे॑षम् ॥ ३४ ॥ [४] ए॒षते॑ । निर्ऋ॑तेभा॒गस्त
ञ्जु॑षस्व॒स्वाहा॒ग्निने॑त्रेभ्योदे॒वेभ्य॑ᳶपु॒रः॒सद्भ्यः॒स्वाहा॑य॒मने॑त्रेभ्योदे॒व
भ्यो॑दक्षि॒णा॒सद्भ्यः॒स्वाहा॑वि॒श्वदे॑वनेत्रेभ्योदे॒वेभ्य॑ᳶप॒श्चा॒त्सद्भ्यः॒
स्वाहा॑मि॒त्रावरु॑णनेत्रेभ्योवाम॒रुन्ने॑त्रेभ्योवादे॒वेभ्य॑ऽउत्त॒रा॒सद्भ्यः॒
स्वाहा॒सोम॑नेत्रेभ्योदे॒वेभ्य॑ऽउप॒रि॒सद्भ्यो॒दु॒व॑स्वद्भ्यः॒स्वाहा ॥ ३५ ॥

येदेवाऽअग्निनेत्त्राःपुरःसदस्त्तेब्भ्यःस्वाहायेदेवायमनेत्त्रादक्षिणासद
स्त्तेब्भ्यःस्वाहायेदेवाविश्श्वदेवनेत्त्राःपश्श्चात्त्सदस्त्तेब्भ्यःस्वाहायेदेवा
मित्त्रावरुणनेत्त्रावामरुन्नेत्त्रावोत्त्तरासदस्त्तेब्भ्यःस्वाहायेदेवाःसोमने
त्त्राऽउपरिसदोदुवस्वन्तस्त्तेब्भ्यःस्वाहा ॥ ३६ ॥ अग्नेसहस्व ॥
अग्नेसहस्वपृतनाऽअभिमातीरपास्य ॥ दुष्ष्टरस्तरन्नरातीर्व्वर्च्चो
धायज्ञवाहसि ॥ ३७ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्श्विनोर्ब्बा
हुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम् ॥ उपाꣳशोर्व्वीर्य्येणजुहोमिहतꣳरक्षः
स्वाहारक्षसान्त्वावधायावधिष्ष्मरक्षोवधिष्ष्मामुमसौहतः ॥ ३८ ॥

[४] सुवितात्त्वासुवानाꣳसुवतामुग्निग्गृहपतीनाꣳसोमोव्वनु
स्पतीनाम् ॥ बृहुस्पतिर्व्वाचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रःपुशुभ्योमि
त्त्रःसुत्त्योव्वरुणोधर्म्मपतीनाम् ॥ ३९ ॥ इमन्देवाः ॥ इम
न्देवाऽऽअसपुत्त्नꣳसुवद्ध्वम्महुतेक्षुत्त्रायमहुतेज्ज्यैष्ठ्यायमहुतेजानरा
ज्ज्यायेन्द्रस्येन्द्रियाय ॥ इममुमुष्ष्यपुत्त्रमुमुष्ष्यैपुत्त्रमुस्यैव्विशऽ
एषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा ॥ ४० ॥ [२]
८ इतिश्रीवाजसनेयसंहितायांनवमोऽध्यायः ॥ ९ ॥ श्रीवेदपुरु
षायनमः ॥ अनुवाक्सूत्रम् ॥ अपोदेवाश्वतस्रः सोमस्यत्त्विषिः

पञ्च अवेष्टाःसप्त सोमस्यत्वाचतस्रः इन्द्रस्यवज्रःपञ्च स्योनासिच
तस्रः सवित्रेकाश्विभ्यांचतस्रः अष्टौचतुस्त्रिꣳशत् ॥ हरिःॐ अपोदे
वाः ॥ अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः ॥ या
भिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १ ॥
वृष्ण्णऽऊर्म्मिः ॥ वृष्ण्णऽऊर्म्मिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वा
हावृष्ण्णऽऊर्म्मिरसिराष्ट्रदाराष्ट्रममुष्म्मैदेहिवृषसेनोसिराष्ट्रदाराष्ट्र
म्मेदेहिस्वाहावृषसेनोसिराष्ट्रदाराष्ट्रममुष्म्मैदेह्यर्त्थेतस्त्थ ॥ २ ॥
अर्त्थेतस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहार्त्थेतस्त्थराष्ट्रदाराष्ट्रममुष्म्मैद

तौजंस्वतीस्त्थराष्ट्रदाराष्ट्रम्मैंदत्तस्वाहौजंस्वतीस्त्थराष्ट्रदाराष्ट्रममुष्मैंदत्तापःपरिवाहिणीस्त्थराष्ट्रदाराष्ट्रम्मैंदत्तस्वाहापःपरिवाहिणीस्त्थराष्ट्रदाराष्ट्रममुष्मैंदत्तापाम्पतिरसिराष्ट्रदाराष्ट्रम्मेंदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममुष्मैंदेह्यपाङ्गर्भौसिराष्ट्रदाराष्ट्रम्मेंदेहिस्वाहापाङ्गर्भौसिराष्ट्रदाराष्ट्रममुष्मैंदेहिसूर्य्यँत्त्वचसस्त्थ ॥ ३ ॥ सूर्य्यँत्त्वचसस्त्थ । राष्ट्रदाराष्ट्रम्मैंदत्तस्वाहासूर्य्यँत्त्वचसस्त्थराष्ट्रदाराष्ट्रममुष्मैंदत्तसूर्य्यँवर्च्चसस्त्थराष्ट्रदाराष्ट्रम्मैंदत्तस्वाहासूर्य्यँवर्च्चस

स्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तमान्दास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहामा
न्दास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्रजक्षितस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वा
हाव्रजक्षितस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तवाशास्त्थराष्ट्रदाराष्ट्रम्मेदत्त
स्वाहावाशास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तशविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्त
स्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तशक्क्वरीस्त्थराष्ट्रदाराष्ट्रम्मे
दत्तस्वाहाशक्क्वरीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्त्थराष्ट्रदाराष्ट्र
म्मेदत्तस्वाहाजनभृतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तविश्वभृतस्त्थराष्ट्र

दा॒रा॒ष्ट्रम्मे॑दत्त॒स्वाहा॑विश्व॒भृत॑स्त्थराष्ट्र॒दा॒रा॒ष्ट्र॒म॒मु॒ष्मै॑द॒त्ताप॑ःस्व॒राज
स्त्थराष्ट्र॒दा॒रा॒ष्ट्र॒म॒मु॒ष्मै॑दत्त ॥ मधु॑मती॒र्म्मधु॑मतीभिः॑पृच्यन्ता॒
म्महि॑क्ष॒त्त्रङ्क्ष॒त्त्रिया॑य॒वन्न्वा॒नाऽअना॑धृष्टाः॑सीदत॒सहौ॑जसो॒महि॑क्ष॒त्त्रङ्क्ष॒त्त्रि
या॑य॒दध॑तीः ॥ ४ ॥ [४] शतम् ४०० ॥ सोम॑स्य॒त्त्विषि॑ः ॥ सोम॑स्य॒
त्त्विषि॑रसि॒तवे॑वमे॒त्त्विषि॑र्भूयात् ॥ अ॒ग्नये॒स्वाहा॒सोमा॑य॒स्वाहा॑
स॒वि॒त्त्रे॒स्वाहा॒सर॑स्वत्त्यै॒स्वाहा॑पू॒ष्णणे॒स्वाहा॒बृह॒स्प्पत॑ये॒स्वाहेन्द्रा॑य॒स्वा
हा॒घोषा॑य॒स्वाहा॒श्लोका॑य॒स्वाहा॒ꣳशा॑य॒स्वाहा॒भगा॑य॒स्वाहा॑र्य्य॒म्म्णे
स्वाहा॑ ॥ ५ ॥ प॒वित्त्रे॑स्त्थः ॥ प॒वित्त्रे॑स्त्थोवै॑ष्णव्व्यौ॑सवि॒तुर्व्वः॒प्प्रस॒

वऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्म्मिभिः ॥ अनिभृष्टमसि
वाचोबन्धुस्तपोजाःसोमस्यदात्त्रमसिस्वाहाराजस्स्वः ॥ ६ ॥ सध
मादोद्द्युम्म्निनीः ॥ सधमादोद्द्युम्म्निनीरापऽएताऽअनाधृष्टाऽअपस्योव
सानाः ॥ पस्त्त्यासुचक्क्रेवरुणःसधस्त्थमपाꣳशिशुर्म्मातृतमास्वन्तः
॥ ७ ॥ क्षत्त्रस्योल्बमसिक्षत्त्रस्यजराय्वसिक्षत्त्रस्ययोनिरसिक्षत्त्र
स्यनाभिरसीन्द्द्रस्यवार्त्त्रग्घ्नमसिमित्त्रस्यासिवरुणस्यासित्त्वयायंवृ
त्त्रंवधेत् ॥ दृवासिरुजासिक्षुमासि ॥ पातैनम्प्प्राञ्चम्पातैनम्प्प्रत्यञ्च
म्पातैनन्तिर्य्यञ्चन्दिग्ग्भ्यःपात ॥८॥ आविर्म्मर्य्याः ॥ आविर्म्म

ष्ठ्योऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रोवृद्धश्रवाऽआवित्तौमित्रा
वरुणौधृतव्रतावावित्तःपूषाविश्ववेदाऽआवित्तेद्यावापृथिवीविश्वशम्भु
वावावित्तादितिरुरुशर्म्मा ॥ ९ ॥ [५] अवेष्टादन्दशूकाः ॥ अवे
ष्टादन्दशूकाःप्राचीमारोहगायत्रीत्त्वावतुरथन्तरꣳसामत्रिवृत्स्तोमो
वसन्तऽऋतुर्ब्रह्मद्रविणन्दक्षिणामारोह ॥ १० ॥ दक्षिणामारो
हत्रिष्टुप्त्वावतुबृहत्सामपञ्चदशस्तोमोग्रीष्म्मऽऋतुःक्षत्रन्द्रविण
म्प्रतीचीमारोह ॥ ११ ॥ प्रतीचीमारोह । जगतीत्त्वावतुवैरूपꣳसाम
सप्तदशस्तोमोवर्षाऽऋतुर्विड्द्रविणमुदीचीमारोह ॥ १२ ॥ उदीची

मारोहानुष्टुप्त्वावतुवैराजꣳसामैकविꣳशस्तोमःशरदृतुःफलन्द्रवि
णमूर्द्ध्वामारोह ॥ १३ ॥ ऊर्द्ध्वामारोह । पङ्क्तिस्त्वावतुशाक्वररैवतेसाम
नीत्रिणवत्रयस्त्रिꣳशौस्तोमौहेमन्तशिशिरावृतूवर्च्चोद्रविणम्प्रत्यस्तन्न
मुचेःशिरः ॥ १४ ॥ सोमस्यत्त्विषिः ॥ सोमस्यत्त्विषिरसितवेव
मेत्त्विषिर्भूयात् ॥ मृत्योःपाह्योजोसिसहोस्यमृतमसि ॥ १५ ॥
हिरण्यरूपाऽउषसः ॥ हिरण्यरूपाऽउषसोविरोकऽउभाविन्द्राऽउ
दिथःसूर्य्यश्च ॥ आरोहतंवरुणमित्रगर्त्तन्ततश्चक्षाथामदितिन्दि
तिश्चमित्रोसिवरुणोसि ॥ १६ ॥ [७] सोमस्यत्वाद्युम्नेनाभिषि

ञ्चाम्म्युग्ग्नेर्ब्भ्राजंसुासूर्य्यँस्युवर्च्चँसेन्द्रस्येन्द्रियेणं। क्षुत्राणाङ्क्षुत्रपंति
रेद्ध्यतिदिद्यून्पाहि ॥ १७ ॥ इमन्देवाऽ ॥ इमन्देवाऽअसपत्नꣳ
सुवद्ध्वम्महुतेक्षुत्रायंमहुतेज्ज्यैष्ठ्यायंमहुतेजानंराज्ज्युायेन्द्रस्येन्द्रि
यायं ॥ इममुमुष्ष्यंपुत्रममुष्ष्यैंपुत्रमुस्यैव्विुशऽएषवोमुीराजुासोमुो
स्म्माकंम्ब्राह्मुणानुाꣳराजां ॥ १८ ॥ प्रपर्व्वँतस्य। वृषुभस्यंपृष्ठान्ना
वंश्च्चरन्तिस्वुासिँचंऽइयुानाः ॥ ताऽआवंवृत्रन्नधुरागुदक्क्ताऽऽअहिँम्बु
ध्न्युमनुरीयंमाणाऽ ॥ व्विष्ण्णोर्व्विुक्क्रमणंमासिुव्विष्ण्णोर्व्विक्क्रांन्तमासिु
व्विष्ण्णोऽक्क्रुान्तमंसि ॥ १९ ॥ प्रजांपतुेन। त्त्वदुेतान्न्युन्न्योव्विश्श्वां

रूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्त्वयममुष्ष्य
पितासावस्यपितावयथंस्यामपतयोरयीणाथंस्वाहा ॥ रुद्रयत्तेक्रि
विपरन्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा ॥ २० ॥ [४] इ
न्द्रस्यवज्ज्रः ॥ इन्द्रस्यवज्ज्रोसिमित्रावरुणयोस्त्वाप्प्रशास्त्रोः प्प्र
शिषायुनज्मि ॥ अव्यथायैत्त्वास्वधायैत्त्वारिष्टोऽअर्ज्जुनोमरुता
म्प्रसवेनजयापाममनसासमिन्द्रियेण ॥ २१ ॥ माते ॥ मातऽ
इन्द्रतेवयन्तुराषाडयुक्तासोऽअब्ब्रह्मताविदसाम ॥ तिष्ठारथमधियं
वज्ज्रहस्तारश्मीन्देवयमसेस्वश्श्वान् ॥ २२ ॥ अग्नयेगृहपतये ॥

अग्नयेगृहपतयेस्वाहासोमायवनस्पतयेस्वाहामरुतामोजसेस्वाहे
न्द्रस्येन्द्रियायस्वाहा ॥ पृथिविमातर्म्मामाहिꣳसीर्म्मोऽअहन्त्वाम् ॥
॥ २३ ॥ हꣳसꣳशुचिषत् ॥ हꣳसःशुचिषद्वसुरन्तरिक्षसद्धोताव्वेदि
षदतिथिर्द्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽ
अद्रिजाऽऋतम्बृहत् ॥ २४ ॥ इयदसि ॥ इयदस्यायुरस्यायुर्म्म
यिधेह्युङ्ङसिव्वर्च्चोसिव्वर्च्चोमयिधेह्यूर्ग्गस्यूर्ज्जम्मयिधेहि ॥ इन्द्रस्य
वांव्वीर्य्यकृतोबाहूऽअभ्युपावहरामि ॥ २५ ॥ [५] स्योनासि ।
सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासीदसुषदामासीदक्षत्रस्ययो

निमासीद ॥ २६ ॥ निषंसाद । धृतव्व्रंतोव्वरुणऽपस्त्त्यास्वा ॥ साम्म्रां
ज्ज्यायसुक्क्रतुः ॥ २७ ॥ अभिभूरंसि ॥ अभिभूरंस्स्येतास्स्तेपञ्च्चदि
शःकल्पन्ताम्म्ब्रह्मँस्त्त्वम्म्ब्रह्मासिसवितासिसत्यप्प्रंसवोव्वरुणो
सिसत्त्यौजाऽइन्द्रोसिव्विशौंजारुद्द्रोसिसुशेवः ॥ बहुंकारश्श्रेयंस्क्कर
भूयंस्क्करेन्द्द्रंस्यव्वज्ज्रोसितेनंमेरद्ध्य ॥ २८ ॥ अग्ग्निऽपृथुः ॥ अग्ग्निः
पृथुर्द्धर्म्मणस्प्पतिर्ज्जुषाणोऽअग्ग्निः ॥ पृथुर्द्धर्म्मणस्प्पतिराज्ज्यंस्यव्वेतु
स्वाहास्वाहांकृताःसूर्य्यंस्यरश्श्मिभिर्य्यतद्ध्वँसजातानांम्मद्ध्यमे
ष्ठ्यांय ॥ २९ ॥ [४] सवित्त्राप्प्रंसवित्त्रा । सरंस्वत्त्याव्वाचात्त्वष्ट्रांरू

पै॒ःपू॒ष्ष्णाप॒शुभि॒रिन्द्रे॒णा॒स्म्मे॒बृह॒स्प्पति॑ना॒ब्ब्रह्म॑णा॒व्वरु॑णे॒नौज॑सा॒ग्ग्नि
ना॒तेज॑सा॒सोमे॑न॒राज्ञा॒व्विष्ष्णु॑ना॒दश॒म्म्या॒दे॒वत॑या॒प्प्रसू॑तः॒प्प्रस॑र्प्पामि
॥ ३० ॥ [१] अ॒श्श्विभ्भ्यां॑म्पच्यस्व ॥ अ॒श्श्विभ्भ्यां॑म्पच्यस्व॒
सर॑स्स्वत्त्यै॒पच्य॒स्स्वेन्द्रा॑यसु॒त्त्राम्म्णे॑पच्यस्व ॥ व्वा॒युःपू॒तःप॒वित्त्रे॑ण
प्प्र॒त्त्यङ्क्सो॒मो॒ऽअति॑स्स्रु॒तः ॥ इन्द्र॑स्य॒यु॒ज्ज्य॒ꣳसखा॑ ॥ ३१ ॥ कु॒विद॒ङ्ग । यव॑मन्तो॒यवं॑श्चि॒द्द्यथा॒दान्त्य॑नुपू॒र्व्वंव्वि॒यूय॑ ॥ इ॒हेहै॑षाङ्कृणु॒हि॒भोज॑ना
नि॒ये॒ब॒र्हिषो॒नम॑ऽउ॒क्क्तिँय्य॒जन्ति ॥ उ॒प॒या॒मगृ॑हीतो॒स्य॒श्श्विभ्भ्या॒न्त्वा॒
सर॑स्स्वत्त्यै॒त्त्वेन्द्रा॑यत्त्वासु॒त्त्राम्म्णे॑ ॥ ३२ ॥ यु॒व॒ꣳसु॒राम॑म् ॥ यु॒व॒ꣳसु॒

रामेममश्विनानमुंचावासुरेसचा ॥ व्विपिपानाशुंभस्पतीऽइन्द्रङ्कर्म्मँ
स्वावतम् ॥ ३३ ॥ पुत्रमिवपितरौ ॥ पुत्रमिवपितरावश्विनोभे
न्द्रावथुःकाव्यैर्द्दँसनाभिः ॥ यत्त्सुराममुंव्यापिबःशचीभिःसरस्वती
त्त्वामघवन्नभिष्ष्णक् ॥ ३४ ॥ [४] ॥ ८ ॥ इतिश्रीवाजसनेयसं
हितायांदशमोऽध्यायः ॥ १० ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसू
त्रम् ॥ युञ्जानएकादश प्रतूर्त्तँषोडश देवस्यत्त्वादश आपोदेवी
द्वादश आपोह्येकादश अदितिष्ट्वापञ्चआकूतिमष्टादश सप्तत्र्यशी
तिः ॥ हरिः ॐ युञ्जानःप्प्रथमम् ॥ युञ्जानःप्प्रथमम्मनस्तत्त्वायसवि

ताधिय॑÷॥ अ॒ग्ग्नेर्ज्ज्योति॑र्न्नि॒चाय्य॑पृथि॒व्याऽअद्ध्याभ॑रत्॥ १ ॥ यु॒क्तेन॒
मन॑सा । व्व॒यन्दे॒वस्य॑सवि॒तुःस॒वे ॥ स्व॒र्ग्ग्या॑य॒शक्त्या॑ ॥ २ ॥ यु॒क्त्वा
य॑सवि॒ता । दे॒वान्त्स्व॑र्य्य॒तोधि॒यादि॒व॑म् ॥ बृ॒हज्ज्योति॑÷करिष्य॒तः
स॑वि॒ताप्प्रसु॑वाति॒तान्॥ ३ ॥ यु॒ञ्जते॒मन॑÷ ॥ यु॒ञ्जते॒मन॑ऽउ॒तयु॑ञ्जते॒धि
यो॒व्विप्प्रा॒व्विप्प्र॑स्यबृह॒तोव्वि॑प॒श्श्चित॑÷ ॥ व्विहोत्त्रा॑दधेव्वयुना॒विदेक॒ऽइ
न्म॒हीदे॒वस्य॑सवि॒तुःपरि॑ष्टुतिः ॥ ४ ॥ यु॒जेवा॑म् ॥ यु॒जेवा॒म्ब्रह्म॑पू॒र्व्य॑
न्नमो॑भि॒र्व्विश्श्लोक॑ऽएतुप॒थ्ये॑वसू॒रेः ॥ शृ॒ण्वन्तु॒व्विश्श्वे॑ऽअ॒मृत॑स्यपु॒त्त्राऽ
आयेधामा॑निदि॒व्यानि॑त॒स्त्थुः ॥ ५ ॥ यस्य॑प्प्र॒याण॑म् ॥ यस्य॑प्प्र॒या

ण॒मन्व॒न्यऽइद्य॒युर्दे॒वा दे॒वस्य॑ म॒हि॒मान॒मोज॑सा ॥ यः पार्थि॑वानि वि॒म॒
मे सऽएत॑शो॒ रजा॑ꣳसि दे॒वः स॑वि॒ता म॑हित्व॒ना ॥ ६ ॥ देव॑ सवितः ॥ दे॒व
सवितः प्रसु॑व य॒ज्ञम्प्रसु॑व य॒ज्ञप॑तिम्भगा॑य ॥ दि॒व्यो ग॑न्ध॒र्वः के॑त॒पूः केत॑
न्नः पुनातु वा॒चस्पति॒र्वाच॑न्नः स्वदतु ॥ ७ ॥ इ॒मन्न॑÷ ॥ इ॒मन्नो॑ दे॒व सवित॒र्य॒
ज्ञम्प्रण॑य दे॒वाव्य॒ꣳ सखि॒विद॑ꣳ सत्रा॒जित॑न्धन॒जित॑ꣳ स्व॒र्जित॑म् ॥
ऋ॒चा स्तोम॒ꣳ सम॑र्द्धय गाय॒त्रेण॑ रथन्त॒रम्बृ॒हद्गा॑यत्रव॑र्त्तनि॒ स्वाहा॑ ॥ ८ ॥
दे॒वस्य॑ त्वा । स॒वि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्या॑म्पू॒ष्णो हस्ता॑भ्याम् ॥
आद॑दे गाय॒त्रेण॒ च्छन्द॑साङ्गिर॒स्वत्पृ॑थि॒व्याः स॒धस्था॑द॒ग्निम्पु॑री

ष्य॒मा॑ङ्गिर॒स्वदाभ॑र॒त्त्रैष्टु॑भेन॒च्छन्द॑साङ्गिर॒स्वत् ॥ ९ ॥ आ॒ब्भ्रिर॑
सि॒। नार्य॑सि॒त्त्वया॑व्व॒यम॒ग्निꣳश॑केम ख॒नि॒तुꣳस॒धस्थ॒ऽआ ॥ जाग॑ते
न॒च्छन्द॑साङ्गिर॒स्वत् ॥ १० ॥ हस्त॑ऽआ॒धाय॑। स॒वि॒ता बिभ्र॑द॒ब्भ्रिꣳहि॒र
ण्ययी॑म् ॥ अ॒ग्नेर्ज्योति॑र्नि॒चाय्य॑ पृथि॒व्व्याऽअद्ध्याभ॑र॒दानु॑ष्टुभेन॒च्छ
न्द॑साङ्गिर॒स्वत् ॥ ११ ॥ [११] प्रतू॑र्त्तंव्वाजि॒न् ॥ प्रतू॑र्त्तंव्वाजि॒न्नाद्र॑
व॒व्वरि॑ष्ठा॒मनु॑ सं॒व्वत॑म् ॥ दि॒वि ते॒ जन्म॑ पर॒मम॒न्तरि॑क्षे॒ तव॒ नाभि॑ः पृथि॒व्व्या
मधि॒ योनि॒रित् ॥ १२ ॥ यु॒ञ्जाथा॒ꣳरास॑भम् ॥ यु॒ञ्जाथा॒ꣳरास॑भंयु॒
वम॒स्मिन्या॒मे॑ वृ॑षण्वसू ॥ अ॒ग्निम्भर॑न्तमस्म॒युम् ॥ १३ ॥ योगे॑यो

गेतुवस्त्तंरम् ॥ योगेंयोगेतुवस्त्तंरुंवाजेवाजेंहवामहे॥सखायुऽइन्द्रमूत
यें॥ १४॥प्रतूर्व्वुन्नेहिं ॥ प्रतूर्व्वुन्नेह्यंवुक्रामुन्नशंस्तीरुद्रस्युगाणपत्त्यम्म
योभूरेहिं ॥ उर्व्वुन्तरिक्षुंव्वीहिस्वुस्तिगंव्यूतिरभंयानिकृण्ण्वन्पूष्णा
सुयुजांसुह ॥ १५ ॥ पृथिव्याःसुधस्त्थात् ॥ पृथिव्याःसुधस्त्थांदुग्नि
म्पुंरीष्ष्यमङ्गिरुस्वदाभंराग्निम्पुंरीष्ष्यमङ्गिरुस्वदच्छेमोग्निम्पुंरी
ष्ष्यमङ्गिरुस्वद्भंरिष्यामः॥ १६ ॥ अन्वुग्निः ॥ अन्वुग्निरुषसा
मग्र्यंमख्युदन्वहांनिप्रथुमोजातवेदाः ॥ अनुसूर्य्यँस्यपुरुत्राचंरु
श्मीननुद्यावापृथिवीऽआततन्थ ॥ १७ ॥ आगत्त्यंव्वाजी ॥ आगत्त्य

व्वा॒ज्ज्यद्ध्वा॑नु॒ᳬस॒र्व्वा॑मृ॒धो॒व्विधू॑नुते ॥ अ॒ग्निᳬस॒धस्त्थे॑मह॒तिच॒क्षु॒षा
निच्चि॑कीषते ॥ १८ ॥ आ॒क्क्रम्म्य॑व्वाजिन् ॥ आ॒क्क्रम्म्य॑व्वाजिन्पृ
थि॒वीम॒ग्निमि॑च्छरु॒चात्वम् ॥ भूम्म्या॑व्वृ॒त्त्वाय॑नोब्रू॒हि॒यत॒ᳵखने॑
म॒तंव्व॒यम् ॥ १९ ॥ द्यौस्ते॑ । पृ॒ष्ठम्पृ॑थि॒वीस॒धस्त्थ॑मा॒त्त्मान्त
रि॑क्षᳬस॒मु॒द्रोयोनि॑ः ॥ व्वि॒ख्याय॒चक्षु॑षा॒त्त्वम॒भिति॑ष्ठपृतन्य॒तः
॥ २० ॥ उत्क्रा॑म । मह॒तेसौभ॑गाया॒स्म्मादा॒स्त्थाना॑द्द्रविणोदा॒व्वा
जिन् ॥ व्व॒यᳬस्या॑मसु॒म॒तौपृ॑थि॒व्व्याऽअ॒ग्निङ्ख॑नन्तऽउ॒पस्त्थे॑ऽआस्याः
॥ २१ ॥ उद॑क्क्रमीत् ॥ उद॑क्क्रमीद्द्रविणोदा॒व्वाज्ज्यर्व्वा॑कु॒ᳬसु॒लो॒कᳬसु

कृतम्पृथिव्याम् ॥ ततःखनेमसुप्रतीकमग्निꣳस्वोरुहाणाऽअधि
नाकमुत्तमम् ॥ २२ ॥ आत्वा । जिघर्म्मिमनसाघृतेनप्रतिक्षिय
न्तम्भुवनानिविश्वा ॥ पृथुन्तिरश्चावयसाबृहन्तंव्यचिष्ठमन्नैरभ
सन्दृशानम् ॥ २३ ॥ आविश्वतः । प्रत्त्यञ्चञ्जिघर्म्म्यरक्षसाम
नसातज्जुषेत ॥ मर्य्यश्श्रीस्पृहयद्वर्णोऽअग्निर्न्नाभिमृशेतन्वाजर्भु
राणः ॥ २४ ॥ परिवाजपतिः ॥ परिवाजपतिःकविरग्निर्हव्यान्यक्क्र
मीत् ॥ दधद्रत्नानिदाशुषे ॥ २५ ॥ परित्वाग्नेपुरंवयंविप्रꣳसह
स्यधीमहि ॥ धृषद्वर्णन्दिवेदिवेहन्तारम्भङ्गुरावताम् ॥ २६ ॥ त्व

मंग्ग्ने । द्युभिस्त्वमांशुशुक्षाणिस्त्वमुद्भ्यस्त्वमश्म्मनुस्प्परिं ॥ त्वं
वनैब्भ्युस्त्वमोषंधीब्भ्युस्त्वन्नृणान्नृंपतेजायसेशुच्चिः ॥ २७ ॥
[१६] देवस्यंत्त्वा । सवितुःप्प्रंसुवेश्विनोर्ब्बाहुब्भ्यांम्पूष्ष्णोहस्ता
ब्भ्याम् ॥ पृथिव्व्याःसुदस्त्थांदग्ग्निम्पुरीष्ष्यमाङ्गिरस्वत्त्वंनामि ॥
ज्योतिष्ष्मन्तन्त्वाग्ग्नेसुप्प्रतीकुमजंस्त्रेणभानुनादीद्द्यंतम् ॥ शिवम्प्र
जाब्भ्योहिंꣳसन्तम्पृथिव्व्याःसुधस्त्थांदग्ग्निम्पुरीष्ष्यमाङ्गिरस्वत्त्वं
नामꣳ ॥ २८ ॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमंसियोनिरग्ग्नेःसंमुद्द्रमुभितꣳ
पिन्न्वंमानम् ॥ वर्द्धमानोमुहाꣳ । ऽआच्चपुष्क्करेदिवोमात्त्रंयावरिम्म्णा

प्प्रथस्स्व ॥ २९ ॥ शर्म्मंच ॥ शर्म्मंचुस्त्थोव्वर्म्मंचुस्त्थोच्छिद्द्रेबहुले ऽउभे ॥ व्व्यचंस्वतीसंव्वंसाथाम्भृतमग्निम्पुरीष्ष्यम् ॥ ३० ॥ संव्वंसाथाम् ॥ संव्वंसाथाꣳस्वर्व्विदासमीचीऽउरसात्त्मना ॥ अग्निमन्तर्ब्भरिष्ष्यन्तीञ्ज्योतिष्म्मन्तमजस्त्रमित् ॥ ३१ ॥ पुरीष्ष्योसि । व्विश्श्वम्भराऽअथर्व्वात्त्वाप्प्रथमोनिरमन्त्थदग्ने ॥ त्वामग्ग्नेपुष्क्करादद्ध्यथर्व्वानिरमन्त्थत ॥ मूर्द्ध्नोव्विश्श्वस्स्यव्वाघतः ॥ ३२ ॥ तमुत्त्वा । दद्ध्यङ्ङृषिःपुत्रऽईधेऽअथर्व्वणः ॥ व्वृत्रहणम्पुरन्दरम् ॥ ३३ ॥ तमुत्त्वा । पांत्थ्योव्वृषासमीधेदस्युहन्तमम् ॥ धनञ्जयꣳरणेरणे ॥ ३४ ॥ सीदहो

तऽं । सीद॑होत॒ऽंस्वऽउ॑लो॒केचि॑कि॒त्त्वान्त्सा॒दया॑य॒ज्ञर्ठंसु॑कृ॒तस्य॒योना॥
दे॒वावीर्द्दे॒वान्ह॒विषा॑यजा॒स्यग्ग्ने॑बृ॒हद्य्यज॑माने॒व्वयो॑धाः ॥ ३५ ॥ निहो
ता । हो॒तृ॒षद॑ने॒व्विदा॑न॒स्त्वे॒षोदी॑दि॒वाꣳ२ ऽअसद॒त्सु॒दक्षः÷ ॥ अद॑ब्ध
व्व्रतप्प्रम॑ति॒र्व्वसि॑ष्ठऽंसहस्रम्भ॒रःशु॒चिजि॑ह्वोऽअ॒ग्ग्निः ॥ ३६ ॥ सर्ठंसीद
स्व ॥ सर्ठंसीद॑स्वम॒हाꣳ२ ऽअसि॒शोच॑स्वदे॒ववी॑तमः ॥ व्विधू॒मम॑ग्ग्नेऽ
अरु॒षम्मि॑येद्ध्य॒सृज॒प्प्र॑शस्त॒दर्श॒तम् ॥ ३७ ॥ [१०] अपो॒दे॒वीऽं ॥
अपो॒दे॒वीरु॒प॑सृज॒मधु॑मतीरय॒क्ष्माय॑प्प्र॒जाभ्य॑÷ ॥ तासा॑मा॒स्त्थाना॒दु
ज्जि॑हता॒मोष॑धयऽंसु॒पिप्प॒लाः ॥ ३८ ॥ सन्ते॑ । व्वा॒युर्म्मा॒त॒रिश्श्वा॑दधा

संहि. तूत्तानायाहृदंयुंछ्याद्विकंस्त्तम् । योदेवानाश्श्वरांसिप्प्राणथैनुकस्म्मै
॥७३॥ देवुव्वषंडस्त्तुतुब्भ्यंम् ॥ ३९ ॥ सुजांतोज्ज्योतिषा । सुहशर्म्मुंव्वरूथु
मासंदुत्त्स्वं÷ ॥ व्वासोऽअग्ग्नेव्विश्श्वरूपुर्ठ्ठसँव्ययंयस्स्वव्विभावसो ॥ ४० ॥
उदुतिष्ठ । स्वद्धरावांनोदेव्याधिया ॥ हृशेचंभासाबृंहुतासुशुक्क्वनिरा
ग्ग्नेयाहिसुशस्त्तिभिं÷ ॥ ४१ ॥ ऊर्द्ध्वऽऊषुणं÷ ॥ ऊर्द्ध्वऽऊषुणंऽऊतयु
तिष्ठादेवोनसंवुिता ॥ ऊर्द्ध्वोव्वाजंस्स्युसानितायदुञ्जिभिर्व्वाघाद्भिर्व्विह्वयां
शु.अ. महे ॥ ४२ ॥ सजातः । सजातोगब्भौंअसिरोदंस्योरग्ग्नेचारुर्व्वि
११ मृंतुऽओषंधीषु ॥ चित्रःशिशुःपरितमांत्थंस्युक्क्तून्प्रमातृब्भ्योऽअधि

कनिँक्क्रदद्द्वाः ॥ ४३ ॥ स्त्थिरोभव । व्वीड्ड्वङ्गऽआशुर्ब्भँवव्वाज्ज्यर्व्वन् ॥
पृथुर्ब्भँवसुषदस्त्वमग्ग्नेः पुरीषवाहणः ॥ ४४ ॥ शिवाभव । प्प्रजा
ब्भ्योमानुषीब्भ्यस्त्वमाङ्गिरः ॥ माद्यावापृथिवीऽअभिशोचीर्म्मान्त
रिक्षम्मावनस्प्पतीन् ॥ ४५ ॥ प्रैतु । व्वाजीकनिक्क्रदन्नानदद्द्रासभःप
त्त्वा ॥ भरन्नग्ग्निम्पुरीष्ष्यम्मापाद्यायुषःपुरा ॥ वृषाग्ग्निव्वृषणम्भ
रन्नपाङ्गर्ब्भँꣳसमुद्रियम् । अग्नऽआयाहिव्वीतये ॥ ४६ ॥ ऋतꣳसु
त्त्यमृतꣳसत्त्यमग्ग्निम्पुरीष्ष्यमङ्गिरस्वद्भरामः ॥ ओषधयःप्प्रतिमो
दद्ध्वमग्ग्निमेतꣳशिवमायन्तमब्भ्यत्त्रयुष्ष्माः ॥ व्व्यस्यन्विश्श्वाऽअ

निराऽअमीवानिषीदन्नोऽअपदुर्म्मतिञ्जहि ॥ ४७ ॥ ओषधयःप्प्र
ति ॥ ओषधयःप्प्रतिगृभ्णीतपुष्पवतीःसुपिप्पलाः ॥ अयंव्वोग
र्भऽऋत्त्वियःप्प्रत्नꣳसधस्त्थमासदत् ॥ ४८ ॥ विपाजसा । पृथुना
शोशुचानोबाधस्वद्विषोरक्षसोऽअमीवाः ॥ सुशर्म्मणोबृहतःशर्म्म
णिस्यामग्नेरहꣳसुहवस्यप्प्रणीतौ ॥ ४९ ॥ [१२] आपोहिष्ठा
मयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ५० ॥ योवः
शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ ५१ ॥
तस्म्माऽअरम् ॥ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आ

पोजुनयथाचनः ॥ ५२ ॥ मित्त्रुःसुꣳसृज्ज्य । पृथिुवीम्भूमिञ्च्चुज्ज्यो
तिषासुह ॥ सुजांतज्जातवेंदसमयुक्ष्मायंत्त्वुासꣳसृंजामिप्प्रुजाभ्भ्यंः
॥ ५३ ॥ रुद्द्राःसुꣳसृज्ज्यं । पृथिुवीम्बृहज्ज्योतिुःसमीधिरे ॥ ते
षाम्भानुरजंस्त्रुऽइच्छुक्क्रोदुवेषुरोचते ॥ ५४ ॥ सꣳसृंष्टांव्वसुंभिः ॥
सꣳसृंष्टांव्वसुंभीरुद्द्रैर्द्धीरैःकम्मुंण्ण्युाम्मृदम् ॥ हस्त्ताभ्भ्याम्मृद्द्वीङ्कृ
त्त्वासिनीवुालीकृंणोतुताम् ॥ ५५ ॥ सिनुीवुालीसुकपुर्द्दा ॥ सुकुरीं
रास्वौपुशा ॥ सातुभ्भ्यंमदितेमुह्योखान्दधातुहस्त्तयोः ॥ ५६ ॥
उखाङ्कृंणोतु । शक्क्याबुाहुभ्भ्युामदितिर्द्धिया ॥ मातापुत्त्रंय्यथुोपस्त्थे

साग्निम्बिभर्त्तुगर्ब्भुऽआ ॥ मुखस्युशिरोंसि ॥ ५७ ॥ व्वसंवस्त्त्वा ।
कृण्ण्वन्तुगायुत्त्रेणुच्छन्दंसाङ्गिरुस्वद्ध्रुवासिपृथिव्यासिधारयुामायिप्प्र
जाꣳरायस्प्पोषंङ्गौपुत्त्यꣳसुवीर्य्यꣳसजुातान्न्यजंमानायरुद्द्रास्त्त्वा
कृण्ण्वतुत्त्रैष्टुभेनुच्छन्दंसाङ्गिरुस्वद्ध्रुवास्युन्तरिक्षमासिधारयुामायि
प्प्रजाꣳरायस्प्पोषंङ्गौपुत्त्यꣳसुवीर्य्यꣳसजुातान्न्यजंमानायादुित्त्या
स्त्त्वांकृण्ण्वन्तुजागंतेनुच्छन्दंसाङ्गिरुस्वद्ध्रुवासिद्द्यौरंसिधारयुामायि
प्प्रजाꣳरायस्प्पोषंङ्गौपुत्त्यꣳसुवीर्य्यꣳसजुातान्न्यजंमानायुव्विश्श्वेंत्त्वा
देवावैश्श्वानुराःकृण्ण्वुन्त्त्वानुंष्टुभेनुच्छन्दंसाङ्गिरुस्वद्ध्रुवासिदिशोंसिधा

रय्य॒ामायै॑प्प्र॒जाꣳर॒ायस्प्पोष॑ङ्गौप॒त्त्यꣳसुवीर्य्य॑ꣳसज॒ातन्न्यज॑मानाय॥
॥ ५८ ॥ अदि॑त्त्यै॒रास्न्ना॑ ॥ अदि॑त्त्यै॒रास्न्न॒ास्स्यदि॑तिष्ट्टे॒बिलङ्गृ
ब्भ्णातु ॥ कृत्त्वाय॒साम॒हीमुखाम्मृ॒न्न्मयी॑य्योनि॑म॒ग्ग्नये॑ ॥ पुत्त्रे॒ब्भ्य॒ꣳ
प्प्राय॑च्छद॒ादि॑तिꣳश्श्र॒पयानिति॑ ॥ ५९ ॥ व्वस॑वस्त्त्वा ॥ धूपयन्तुगाय॒
त्त्रेण॒च्छन्द॑साङ्गिर॒स्वद्रु॒द्द्रास्त्त्वा॑धूपयन्तुत्त्रैष्ट्टु॑भेन॒च्छन्द॑साङ्गिर॒स्वद॒ादि॒
त्त्यास्त्त्वा॑धूपयन्तुजाग॑तेन॒च्छन्द॑साङ्गिर॒स्वाद्विश्श्वे॑त्त्वादे॒वावै॑श्श्वान॒राधू॑
पयन्त्त्वानु॑ष्ट्टुभेन॒च्छन्द॑साङ्गिर॒स्वदिन्द्द्र॑स्त्त्वाधूपयतुव्वरु॑णस्त्त्वाधूपयतु
व्विष्ष्णु॑स्त्त्वाधूपयतु ॥ ६० ॥ [११] अदि॑तिष्ट्वा ।

संहि. देवीर्विश्वदेव्यावतीपृथिव्याःसधस्त्थेऽअङ्गिरस्वत्खनत्ववटदेवानां
॥७६॥ न्त्वापत्नीर्देवीर्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअङ्गिरस्वद्दधतूखे
धिषणास्त्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअङ्गिरस्वदभी
न्धतामुखेवरूत्रीष्ट्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअङ्गिर
स्वच्छ्रपयन्तूखेऽग्नास्त्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्त्थेऽअ
ङ्गिरस्वत्पंचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्विश्वदेव्यावतीःपृथि
पू.अ. व्याःसधस्त्थेऽअङ्गिरस्वत्पंचन्तूखे ॥ ६१ ॥ मित्रस्यंचर्ष
११ णीधृतः ॥ मित्रस्यंचर्षणीधृतोवोँदेवस्यंसानसि ॥ द्युम्नाश्चि

त्रश्श्रंवस्तमम् ॥ ६२ ॥ दुेवस्त्वां । सवितोद्वंपतुसुपाणिः
स्वंङ्गुरिःसुंबाहुरुशक्त्यां ॥ अव्यंथमानापृथिव्यामाशादिशुऽआ
पृंण ॥ ६३ ॥ उुत्थायंबृहुती । भुवोदुत्तिष्ठध्रुवात्त्वम् ॥ मित्त्रैतान्तऽ
उुखाम्परिंददुम्म्याभित्त्याऽएषामाभेंदि ॥ ६४ ॥ वुसंवुस्त्वा । च्छृं
न्दन्तुगायुत्त्रेणुच्छन्दंसाङ्गिरुस्वद्रुद्रास्त्वाच्छृंन्दन्तुत्रैष्टुंभेनुच्छन्दंसा
ङ्गिरुस्वदांदित्यास्त्वाच्छृंन्दन्तुजागंतेनुच्छन्दंसाङ्गिरुस्वद्विश्श्वेत्त्वादु
वावैंश्श्वानराऽआच्छृंन्दुन्त्त्वानुंष्टुभेनुच्छन्दसाङ्गिरुस्वत् ॥ ६५ ॥ [५]
आकूंतिमुग्ग्निम् ॥ आकूंतिमुग्ग्निम्प्रयुजꣳस्वाहामनोंमुधामुग्ग्निम्प्र

युजꣳस्वाहाच्चित्तंविज्ञातमग्निम्प्रयुजꣳस्वाहाव्वाचोव्विधृतिमग्निम्प्र
युजꣳस्वाहाप्प्रजापतयेमनवेस्वाहाग्नयेव्वैश्श्वानरायस्वाहा ॥ ६६ ॥
व्विश्श्वोदेवस्य ॥ नेतुर्म्मर्त्तोव्वुरीतसक्ख्यम् ॥ व्विश्श्वोरायऽइषु
द्ध्यतिद्युम्म्नंव्वृणीतपुष्ष्यसेस्वाहा ॥ ६७ ॥ मासु । भित्त्थामासु
रिषोम्बधृष्ष्णुव्वीरयस्वसु ॥ अग्निश्श्चेदङ्करिष्ष्यथः ॥ ६८ ॥ दृꣳ
हस्वदेवि । पृथिविस्वस्तयऽआसुरीमायास्वधयाकृतासि ॥ जुष्ट
न्देवेब्भ्यऽइदमस्तुहव्व्यमरिष्टात्त्वमुदिहियज्ञेऽअस्म्मिन् ॥ ६९ ॥
द्व्यन्नःसर्प्पिरासुतिःप्प्रत्नोहोताव्वरेण्यः ॥ सहसस्प्पुत्रोऽअद्भुतः ॥

॥ ७० ॥ शतम् ॥ ५०० ॥ परस्याऽअधि । संब्वतोवराँ२ऽअभ्या
तर ॥ यत्राहमस्म्मिताँ२ऽअव ॥ ७१ ॥ परमस्याःपरावत÷ ॥ प
रमस्याःपरावतोरोहिदश्श्वऽइहागहि ॥ पुरीष्ष्य÷पुरुप्प्रियोग्ग्नेत्त्व
न्तरामृध÷ ॥ ७२ ॥ यदग्ग्ने ॥ यदग्ग्नेकानिकानिचिदातेदारूणिद
ध्ध्मसि ॥ सर्ब्बन्तदस्तुतेघृतन्तज्जुषस्वयविष्ठ्य ॥ ७३ ॥ यदत्ति ॥ यद
त्त्युपजिह्विकायद्द्वम्म्रोऽअतिसर्प्पति ॥ सर्ब्बन्तदस्तुतेघृतन्तज्जुषस्व
यविष्ठ्य ॥ ७४ ॥ अहरहरप्प्रयावम् ॥ अहरहरप्प्रयावम्भरन्तोश्श्वा
येवतिष्ठतेघासमस्म्मै ॥ रायस्प्पोषेणसमिषामदन्तोग्ग्नेमातेप्प्रतिवे

शारिषाम ॥ ७५ ॥ नाभापृथिव्याः । संमिधानेऽअग्नौरायस्पोषा
यबृहतेहवामहे ॥ इरम्मदम्बृहदुक्थंय्यजत्रञ्जेतारमग्निम्पृतनासुसा
सहिम् ॥ ७६ ॥ याःसेनाः ॥ याःसेनाऽअभीत्वरीराव्याधिनीरुग
णाऽउत ॥ येस्तेनायेचतस्करास्तांस्तेऽअग्नेपिदधाम्यास्ये ॥ ७७ ॥
दंष्ट्राभ्याम्मलिम्लून् ॥ दंष्ट्राभ्याम्मलिम्लूञ्जम्भ्यैस्तस्कराँ
२ँऽउत ॥ हनुभ्यांस्तेनान्भगवस्ताँस्त्वङ्खादसुखादितान् ॥
॥ ७८ ॥ येजनेषु । मलिम्लवस्तेनासस्तस्कराव्वने ॥ येकक्षेष्वघा
यवस्ताँस्तेदधामिजम्भयोः ॥ ७९ ॥ योऽअस्मभ्यम् । योअस्म

ब्भ्यंमराती॒याद्यश्चंनो॒द्वेषंते॒जनं÷ ॥ निन्दा॒द्योऽअस्म्मान्धिप्प्सांच्च॒स
र्व॒न्तम्भस्म्म॒साकु॒रु ॥ ८० ॥ सꣳशितम्मे ॥ सꣳशितम्मे॒ब्रह्म॒सꣳ
शितंवीर्य्य॒म्बलम् ॥ सꣳशितङ्क्षत्रञ्जिष्णु॒यस्याहमस्म्मिपु॒रोहितः ॥
॥ ८१ ॥ उदेषाम् ॥ उदेषाम्बा॒हूऽअतिर॒मुद्वर्च्चोँऽअथो॒बलम् ॥ क्षिणो
मि॒ब्रह्मणा॒मित्राननु॒न्नयामि॒स्वाँ २ ऽअहम् ॥८२॥ अन्नपतेन्नस्य। नोदे
ह्यनमी॒वस्यंशु॒ष्म्मिणं÷ । प्रप्प्रदा॒तारंन्तारि॒षऽऊर्ज्जन्नोधेहिद्वि॒पदे॒चतु
ष्पदे ॥ ८३ ॥ [१८] इतिशुक्लयजुस्संहितायामेकादशोऽध्यायः ॥
॥ ११ ॥ ॥ श्रीवेदपुरुषायनमः ॥ ॥ अनुवाकसूत्रम् ॥ दृशानः

सप्तदश दिवस्परि द्वादश समिधाग्निं पञ्चदश आपेत सप्तदशआसु
न्वन्तं त्रयोदश याओषधीः सप्तविꣳशतिः मामाःषोडश सप्तसप्तद
शꣳशतम् ॥ हरिःॐ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यद्यौद्दुर्म्म
र्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनन्द्यौरजन
यत्सुरेताः ॥ १ ॥ नक्तोषासासमनसा । विरूपेधापयेतेशिशुमेकꣳस
मीची ॥ द्यावाक्षामारुक्मोऽअन्तर्विभातिदेवाऽअग्निन्धारयन्द्रविणो
दाः ॥२॥ विश्वारूपाणि ॥ विश्वारूपाणिप्प्रतिमुञ्चतेकविःप्प्रासावी
द्भद्रंद्विपदेचतुष्पदे । विनाकमख्यत्सवितावरेण्योनुप्प्रयाणमुषसो

द्विराजति ॥ ३ ॥ सुपर्णोसि । गरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्र
थन्तरेपक्षौ ॥ स्तोमऽआत्माच्छन्दाᳬस्यङ्गानियजूᳬषिनाम ॥ सा
मतेतनूर्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याऽशफाः ॥ सुपर्णोसि
गरुत्मान्दिवङ्गच्छस्वः पत ॥ ४ ॥ विष्णोऽक्रमः ॥ विष्णोऽक्र
मोसिसपत्नहागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्रमस्वविष्णोऽ
क्रमोस्यभिमातिहात्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनुविक्रमस्ववि
ष्णोऽक्रमोस्यरातीयतोहन्ताजागतञ्छन्दऽआरोहदिवमनुविक्रम
स्वविष्णोऽक्रमोसिशत्रूयतोहन्तानुष्टुभञ्छन्दआरोहदिशोनुविक्रम

स्व ॥ ५ ॥ अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयन्निवद्यौःक्षा
मारेरिहद्वीरुधःसमञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारो
दसीभानुनाभात्यन्तः ॥ ६ ॥ अग्नेऽभ्यावर्त्तिन् ॥ अग्नेऽभ्या
वर्त्तिन्नभिमानिवर्त्तस्वायुषावर्च्चसाप्प्रजयाधनेन ॥ सन्यामेधयार
य्यापोषेण ॥ ७ ॥ अग्नेऽअङ्गिरः ॥ शतन्तेसन्त्वावृतः सहस्रन्तऽउ
पावृतः ॥ अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि ॥
॥ ८ ॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नःपाह्यꣳ
हसः ॥ ९ ॥ सहरय्या ॥ निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ वि

श्वपप्स्न्या॑व्वि॒श्वत॒स्प्परि॑ ॥ १० ॥ आत्त्वा॑ । हार्ष॒मन्तर॑भूर्द्ध्रुव
स्तिष्ठावि॑चाचलिः ॥ व्वि॒श॑स्त्त्वा॒सर्व्वा॑व्वाञ्छन्तु॒मात्त्वद्रा॒ष्ट्रमधि॑भ्रश
त् ॥ ११ ॥ उदु॑त्त॒मम् ॥ उदु॑त्त॒मँव्व॑रुण॒पाश॑म॒स्म्मदवा॑ध॒मंविम॑द्ध्य॒
मꣳश्श्र॑थाय । अथा॑व्व॒यमा॑दित्त्यव्व्र॒तेतवाना॑गसो॒ऽअदि॑तयेस्याम ॥
॥ १२ ॥ अग्ग्रे॑बृ॒हन् ॥ अग्ग्रे॑बृ॒हन्नु॒षसा॑मू॒र्द्ध्वोऽअ॑स्त्थान्निर्ज्जग॒न्वा
न्तम॑सो॒ज्ज्योति॒षागा॑त् ॥ अ॒ग्निर्भा॒नुना॒रुश॑ता॒स्वङ्ग॒ऽअजा॒तोव्वि
श्वा॒सद्द्मा॑न्यप्प्राः ॥ १३ ॥ ह॒ꣳसःशु॑चि॒षत् ॥ ह॒ꣳसःशु॑चि॒षद्व॒
सु॑रन्तरिक्ष॒सद्धोता॑व्वेदि॒षदति॑थिर्दु॒रोण॒सत् ॥ नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒स

द॒ब्ब्जागो॒जाऽऋ॑त॒जाऽअ॑द्रि॒जाऽऋ॒तम्बृ॒हत् ॥ १४ ॥ सी॑द॒त्त्वम् । सी
द॒त्त्वम्मा॒तुर॒स्याऽउ॒पस्त्थे॒व्विश्वा॑न्यग्ग्नेव्व॒युना॑निव्वि॒द्द्वान् । मैना॒न्त
प॑सा॒मार्च्चि॒षा॒भिशो॑चीर॒न्तर॑स्याꣳशु॒क्रज्ज्यो॑ति॒र्व्वि॑भा॑हि ॥ १५ ॥
अ॒न्तर॑ग्ग्ने । रु॒चात्त्वमु॒खाया॒ःसद॑ने॒स्वे ॥ त॒स्या॒स्त्त्व॒ꣳहर॑सा॒तप॒ञ्जा
त॑वेदःशि॒वोभ॑व ॥ १६ ॥ शि॒वोभू॒त्त्वा । मह्य॑मग्ग्ने॒ऽअथो॑सीदा॒शि॒व
स्त्त्वम् ॥ शि॒वाःकृ॒त्त्वादि॒शःस॒र्व्वाःस्वंय्योनि॑मि॒हास॑दः ॥ १७ ॥
[१७] दि॒वस्प्परि॑ ॥ प्प्रथ॒मञ्ज॑ज्ज्ञेऽअ॒ग्ग्निर॒स्म्मद्द्वि॒तीय॒म्परि॑जा॒तवे॑
दाः ॥ तृ॒तीय॑म॒प्प्सुनृ॒म्मणाऽअज॑स्र॒मिन्धा॑नऽएनञ्जरतेस्स्वा॒धीः ॥

॥ १८ ॥ व्विद्द्मातें । अग्ग्नेत्त्रेधात्त्रयाणिंव्विद्द्मातेधामुव्विभृंतापुरुत्त्रा ॥
व्विद्द्मातेनामंपरङ्गुहायाद्विद्द्मातमुत्त्सुंठ्यतंऽआजुगन्त्थं ॥ १९ ॥ सु
मुद्रेत्त्वां ॥ नृम्मणांऽअप्प्स्वुन्तर्न्नृचक्षांऽईधेदिवोऽअंग्ग्नुऽऊधंन् ॥ तृतीयें
त्त्वारजांसितस्त्थिवाꣳसंमुपामुपस्त्थेंमाहिषाऽअंवर्द्धन् ॥ २० ॥ अ
क्क्रन्ददुग्ग्निः ॥ अक्क्रंन्ददुग्ग्निस्त्तुनयंन्निवद्द्यौःक्षामारेरिंहद्वीरुधंःसमु
ञ्जन् ॥ सुद्द्योजंज्ज्ञानोव्विहीमिद्धोऽअक्ख्युदारोदंसीभानुनांभात्त्युन्तः
॥ २१ ॥ श्रीणामुंदारः ॥ श्रीणामुंदारोधुरुणोरयीणाम्मंनीषाणा
म्प्राप्पंणुःसोमंगोपाः ॥ व्वसुंःसूनुःसहंसोऽअप्प्सुराजाव्विभात्त्यग्ग्रं

ऽउुषसांमिधानः ॥ २२ ॥ व्विश्श्वस्यकेतुः ॥ व्विश्श्वस्यकेतुर्भुवन
स्युगर्ब्भुऽआरोदसीऽअपृणाज्जायमानः । व्वीडुञ्चिदद्रिमभिनत्पराय
ञ्जनायदुग्निमयजन्तुपञ्च ॥ २३ ॥ उशिक्पावुकः ॥ उशिक्पाव
कोऽअरुतिःसुमेधामर्त्येष्वुग्निरमृतोनिधायि ॥ इयर्त्तिधूममरुषम्भ
रिब्भ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन् ॥ २४ ॥ दृशानोरुक्मः ॥ दृ
शानोरुक्मऽउुर्व्याव्यद्यौद्दुर्म्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽ
अभवुद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्ते । अद्यकृण
वद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्प्रतुरंव्वस्योऽअच्छाभि

सुम्नन्देुवभंक्तंयविष्ठ ॥ २६ ॥ आतम् ॥ आतम्भंजसौःश्रवुसेष्व
ग्नऽउुक्थऽउुक्थुऽआभंजशुस्यमांने ॥ प्प्रियःसूर्य्यौप्प्रियोऽअुग्ना
भंवात्युज्जातेनंभिुनदुदुज्जानिंत्त्वैः ॥ २७ ॥ त्त्वामंग्ने ॥ त्त्वामंग्नु
यजंमानाऽअनुद्यून्विःश्वावसुंदधिंरेुव्वार्य्याँणि ॥ त्त्वयांसुहद्द्रविण
मिुच्छमांनाव्व्रुजङ्गोमंन्तमुुशिजोव्विवंव्व्रुः ॥ २८ ॥ अस्त्तांव्युग्ग्निः ।
अस्त्तांव्व्युग्ग्निन्नृरांःशुुशेवोव्वैःश्वानुरऽऋषिंभिुःसोमंगोपाः ॥ अुद्वुषे
द्यावांपृथिुवीहुुवेमुदेवांधुत्तरुयिमुस्म्मेसुुवीरंम् ॥ २९ ॥ [१२] सु
मिधाग्ग्निम् ॥ सुमिधाग्ग्निन्दुुवस्यतघृतैर्बोंधयुतातिंथिम् ॥ आस्स्मिन्न

न्हव्याजुंहोतन ॥ ३० ॥ उदुंत्त्वा ॥ उदुंत्त्वाविश्श्वेंदेवाऽअग्नेभर
न्तुचित्तिंभिः ॥ सनोंभवशिवस्त्वꣳसुप्प्रतींकोविभावंसुः ॥ ३१ ॥
प्रेत ॥ प्रेदंग्नेज्ज्योतिंष्म्मान्न्याहिशिवेंभिरर्च्चिभिष्ट्वम् ॥ बृहद्भिंर्भानु
भिर्भासन्माहिꣳसीस्तन्न्वाप्प्रजाः ॥ ३२ ॥ अक्रंन्ददग्निः ॥ अक्रं
न्ददग्निस्तनयंन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन् ॥ सद्योजंज्ञा
नोविहीमिद्धोऽअख्यदारोदंसीभानुनांभात्यन्तः ॥ ३३ ॥ प्रप्प्रा
यम् ॥ प्रप्प्रायमग्निर्भरतस्यंशृण्वेवियत्त्सूर्य्योनरोचंतेबृहद्भाः ॥
अभियःपूरुम्पृतंनासुतस्त्थौदीदायदैव्योऽअतिथिःशिवोनः ॥ ३४ ॥

आपोँदेवीः ॥ आपोँदेवीऽम्प्रतिगृब्भ्णीतुभस्म्मैतत्स्योनेकृंणुद्ध्वँसु
रभाऽउंलोके ॥ तस्म्मैनमन्ताञ्जनंयऽंसुपत्त्नीम्मातेवपुत्त्रम्बिभृता
प्प्स्वेनत् ॥३५॥ अप्प्स्वग्ग्ने ॥ अप्प्स्वग्ग्नेसधिष्ट्वसौषधीरनुरुद्ध्य
से ॥ गब्भेँसञ्जायसेपुनः ॥ ३६ ॥ गब्भोँऽआसि ॥ गब्भोँऽअस्योषधी
नाङ्गब्भोँव्वनस्प्पतीनाम् ॥ गब्भोँव्विश्श्वस्स्यभूतस्स्याग्ग्नेगब्भोँऽअपा
मंसि ॥ ३७ ॥ प्रसद्ध्यभस्म्मना ॥ प्रसद्ध्यभस्म्मनायोनिमपश्च्चपृ
थिवीमग्ग्ने ॥ सँसृज्ज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनराऽसदः ॥ ३८ ॥
पुनरासद्द्य ॥ पुनरासद्द्यसदनमपश्च्चपृथिवीमग्ग्ने ॥ शेषेमातुर्य्यथो

पस्त्थेन्तरंस्याꣳशिवतंमः ॥ ३९ ॥ पुनरूर्ज्जां । निवर्त्तंस्वपुनंरग्न
ऽइषायुंषा ॥ पुनर्न्नंःपाह्यꣳहसः ॥ ४० ॥ सुहरुय्या । निवर्त्तंस्वा
ग्नेपिन्वंस्वुधारंया ॥ व्विश्वप्प्स्न्यांव्विश्वतुस्परिं ॥ ४१ ॥ बोधां
मे । ऽअस्यव्वचंसोयविष्ठमꣳहिंष्ठस्युप्प्रभृंतस्यस्वधावः ॥ पीयंति
त्त्वोऽअनुंत्त्वोगृणातिव्वन्दारुंष्टेतुन्न्वं व्वन्देऽअग्ने ॥ ४२ ॥ सबोंधि ।
सूरिर्म्मुघवाव्वसुंपतेव्वसुंदावन् ॥ युयोद्ध्यस्म्मद्द्वेषांꣳसिव्विश्वकंर्म्म
णेस्वाहां ॥ ४३ ॥ पुनंस्त्वा । दित्त्यारुद्द्राव्वसवःसमिन्न्धताम्पुनंर्ब्र
ह्माणोव्वसुनीथयुज्ञैः ॥ घृतेनुत्त्वन्तुन्न्वँव्वर्द्धंयस्वसुत्त्याःसन्तुयजंमा

नस्युकामाः ॥ ४४ ॥ [१५] अपेत ॥ अपेतुव्वीतुव्विचंसर्प्पुतातुोयेत्त्र
स्त्थपुंराणायेचुनूतनाः ॥ अदांद्यमोव्वुसानम्पृथिव्याऽअक्रांन्निमाम्पु
तरौल्लोकमंस्म्मै ॥ ४५ ॥ सुँज्ञानंमासि । कामुधरंणुम्मायिंतेकामुधरं
णम्भूयात् ॥ अुग्नेर्ब्भस्म्मास्युग्नेःपुरीषमासुिचितंस्त्थपारिुचितंऽऊर्द्ध्वं
चितं÷श्रयद्ध्वम् ॥ ४६ ॥ अयꣳसः ॥ अयꣳसोऽअुग्निर्य्यस्मिन्त्सो
मुमिन्द्रं÷सुतन्दुधेजुठरेवावशानः ॥ सुहस्त्रियम्वाजमत्त्युन्नसाप्तिꣳ
ससुवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७ ॥ अग्नेयत् ॥ अग्नेयत्तेदिुविव्व
र्च्चः÷पृथिव्यांय्यदोषधीष्ष्वुप्प्स्वायंजत्र ॥ येनान्तरिक्षमुर्व्वातुतन्थंत्त्वे

षःसभानुरर्ण्णवोनृचक्षाः ॥ ४८ ॥ अग्नेदिवः ॥ अग्नेदिवोऽअर्ण्णमच्छाजिगास्यच्छादेवाँ२ऊचिषेधिष्ण्याये ॥ यारोचनेपरस्तात्सूर्य्यस्ययाश्चावस्तादुपतिष्ठन्तऽआपः ॥ ४९ ॥ पुरीष्यासोऽअग्नयः । प्रावणेभिःसजोषसः । जुषन्तांयज्ञमद्रुहोऽनमीवाऽइषोमहीः ॥ ५० ॥ इडामग्ने । पुरुदंससनिङ्गोःशश्वत्तमंहवमानायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ ५१ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् ॥ ५२ ॥ चिदसि ॥ चिदसितयादेव

तयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥५३॥
लोकम्पृण । च्छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्प
तिरस्मिन्न्योनावसीषदन् ॥ ५४ ॥ ताऽअस्य । सूददोहसꣳसोमꣳ
श्रीणन्तिपृश्न्नयः । जन्म्मन्देवानांविशस्त्रिष्ष्वारोचनेदिवः ॥५५॥
इन्द्रंविश्श्वाः ॥ इन्द्रंविश्श्वाऽअवीवृधन्त्समुद्द्रव्व्यचसङ्गिरः ॥ रथी
तमꣳरथीनांवाजानाꣳसत्त्पतिम्पतिम् ॥५६॥ समितम् ॥ समितꣳ
सङ्कल्पेथाꣳसम्प्रियौरोचिष्ण्णूसुमनस्यमानौ ॥ इषमूर्ज्जमभिसं
व्वसानौ ॥ ५७ ॥ संवाम् ॥ संवाम्मनाꣳसिसंव्व्रतासमुचित्तान्न्या

क॑रम् ॥ अग्ने॒पुरीष्याधि॒पाभ॑व॒त्त्वन्न॒ऽइष॒मूर्ज्ज॒य्ँयज॑मानायधेहि ॥
॥ ५८ ॥ अग्ने॒त्त्वम् ॥ अग्ने॒त्त्वम्पु॑री॒ष्यो॒रयि॒मान्पु॑ष्टि॒माँ२ ऽअ॑
सि ॥ शि॒वाःकृ॒त्त्वादिशः॒सर्व्वाः॒स्वय्ँयोनि॑मि॒हास॑दः ॥ ५९ ॥ भव॑
तन्नः ॥ भव॑तन्नः॒सम॑नसौ॒सचे॑तसावरे॒पसौ॑ ॥ माय॒ज्ञꣳहिꣳसिष्ट॒माय॒
ज्ञप॑तिञ्जातवेदसौशि॒वौभ॑वतम॒द्यनः॑ ॥ ६० ॥ मा॒तेव॑पु॒त्रम् ॥ मा॒तेव
पु॒त्रम्पृ॑थि॒वीपु॑रीष्य॒म॒ग्निꣳस्वेयो॒नाव॑भारु॒षा ॥ ताँविश्वै॑र्दे॒वैर्ऋ॒तु
भिः॑संवि॒दा॒नःप्र॒जाप॑तिर्वि॒श्वक॑र्म्मा॒विमु॑ञ्चतु ॥ ६१ ॥ [७] अ
सु॑न्वन्तमय॑जमानम् ॥ असु॑न्वन्तमय॑जमानमिच्छस्ते॒नस्ये॒त्त्या

मन्विहितस्करस्य ॥ अन्यमस्म्मादिच्छसातऽइत्त्यानमोदेविनिर्ऋ
तेतुभ्यमस्तु ॥ ६२ ॥ नमःसुतेनिर्ऋतेतिग्मतेजोयस्म्मयंव्विचृता
बन्धमेतम् ॥ यमेनत्त्वंयम्म्यासंव्विदानोत्तमेनाकेऽअधिरोहयैनम् ॥
॥ ६३ ॥ यस्यास्ते । घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जना
य ॥ यान्त्वाजनोभूमिरितिप्प्रमदन्तेनिर्ऋतिन्त्वाहम्परिवेदव्विश्व
तः ॥ ६४ ॥ यन्तेदेवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥ त
न्तेव्विष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतः ॥ नमोभूत्त्यै
येदञ्चकार ॥ ६५ ॥ निवेशनःसङ्गमनः ॥ निवेशनःसङ्गमनोवसू

नांविश्वारूपाभिचष्टेशचीभिः ॥ देवऽइवसवितासत्यधर्म्मेन्द्रोन
तस्थौसमरेपथीनाम् ॥ ६६ ॥ सीरायुञ्जन्ति । कवयोयुगावितन्वते
पृथक् ॥ धीरादेवेषुसुम्नया ॥ ६७ ॥ युनक्तसीरा ॥ युनक्तसीरावि
युगातनुध्वङ्कृतेयोनौवपतेहबीजम् ॥ गिराचश्रुष्टिःसभराऽअसन्नो
नेदीयऽइत्सृण्यःपक्वमेयात् ॥ ६८ ॥ शुनꣳसु । फालाविकृषन्तुभू
मिꣳशुनङ्कीनाशाऽअभियन्तुवाहैः ॥ शुनासीराहविषातोशमानासु
पिप्पलाऽओषधीःकर्त्तनास्मे ॥ ६९ ॥ घृतेनसीता ॥ घृतेनसीताम
धुनासमज्यतांविश्वैर्देवैरनुमतामरुद्भिः ॥ ऊर्जस्वतीपयसापिन्व

मानुास्म्मान्त्सीतुपयसाभ्म्यावंवृत्त्स्वं ॥ ७० ॥ लाङ्गंलुम्पवीरवत् ॥
लाङ्गंलुम्पवीरवत्त्सुशेवंꣳसोमुपित्त्सरु ॥ तदुद्वंपातिगामविंम्प्रफुर्व्यं
ञ्चपीवंरीम्प्रुस्त्थावंद्र्थुवाहंणम् ॥ ७१ ॥ कामंङ्कामदुघे । धुक्ष्वमिु
त्रायुव्वरुंणायच ॥ इन्द्रांयुाश्विभ्म्यांम्पूष्णेप्प्रुजाभ्म्युऽओषंधी
भ्म्यंः ॥ ७२ ॥ व्विमुंञ्चयद्ध्वम् ॥ व्विमुंञ्चयद्ध्वमग्घ्न्या।देवयानुाऽअगंन्मुत
मंसस्प्पारमुस्य । ज्योतिरापाम ॥ ७३ ॥ सुजूरब्ब्दंः । सुजूरब्ब्दुोऽ
अयंवोभिंःसुजूरुषाऽअरुंणीभिंः ॥ सुजोषंसावुश्श्विनादꣳसोभिंः
सजूःसूरऽएतंशेनसुजूर्व्वैश्श्वानुरऽइडंयाघृतेनुस्वाहा ॥ ७४ ॥

[१३] याऽओषधीः ॥ याऽओषधीःपूर्व्वाँजातादेवेब्भ्यस्त्रियुगम्पु
रा ॥ मनैनुबब्भ्रूणामहꣳशतन्धामानिसप्तच ॥ ७५ ॥ शतंव्वः ॥
शतंवोऽअम्म्बधामानिसहस्रमुतवोरुहः ॥ अधाशतक्रत्त्वोयूयमिम
म्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीःप्प्रति । मोदद्ध्वम्पुष्प्पवतीःप्प्रसू
वरीः ॥ अश्श्वाऽइवसजित्त्वरीर्व्वीरुधःपारयिष्ण्ण्वः ॥ ७७ ॥ ओ
षधीरिति । मातरस्तद्वोदेवीरुपब्ब्रुवे ॥ सनेयमश्श्वङ्गाँवासऽआ
त्त्मानन्तवपूरुष ॥ ७८ ॥ अश्श्वत्त्थेवः ॥ अश्श्वत्त्थेवोनिषदनम्पर्ण्णे
वोव्वसतिष्कृता ॥ गोभाजऽइत्त्किलासथयत्त्सनवथपूरुषम् ॥ ७९ ॥

यत्रौषंधीः । सुमग्ग्मंतुराजांनुःसमिंताविव ॥ व्विप्प्रःसऽउंच्च्यतेभि
षग्ग्रंक्षोहामींवुचातनः ॥ ८० ॥ अश्श्वावुतीꣳसोंमावुतीम् ॥ अ
श्श्वावुतीꣳसोंमावुतीमूर्ज्जयंन्तीमुदौंजसम् ॥ आविंत्त्सिसुर्व्वाऽओ
षंधीरुस्म्माऽअंरिष्टतांतये ॥ ८१ ॥ उच्छुष्म्मांः ॥ उच्छुष्म्माऽओ
षंधीनाङ्गावौंगोष्ठादिंवेरते ॥ धनꣳसनिष्ष्यन्तींनामात्त्मानन्तवंपूरु
ष ॥ ८२ ॥ इष्कृंतिर्न्नामं । वोमाताथौंयूयꣳस्त्थनिष्कृंतीः ॥ सी
राःपंतत्रिणींस्त्थनयदामयंतिनिष्कृंथ ॥ ८३ ॥ अतिविश्श्वांः । प
रिष्ठास्त्तेनऽइवव्व्रजमक्क्रमुः ॥ ओषंधीःप्प्राचुंच्च्यवुर्य्यंत्त्किञ्चंतन्न्वो

र॒प॑÷ ॥ ८४ ॥ यदि॒माः ॥ यदि॒माव्वा॒जय॑न्न॒हमोष॑धी॒र्हस्त॑ऽआद॒धे ॥
आ॒त्मायक्ष्म॑स्यनश्यतिपु॒राजी॑व॒गृभो॑यथा ॥ ८५ ॥ यस्यौष॑धीःऽ ।
प्प्र॒सर्प्प॑थाङ्ग॑मङ्ग॒म्परु॑ष्परुःऽ ॥ ततो॒यक्ष्मं॑व्विबा॑धद्ध्व॒ऽउ॒ग्ग्रोम॑द्ध्य॒मशी
रिव॥८६॥साकं॑य्यक्ष्म ॥ साकं॑य्य॑क्ष्म॒प्रप॑त॒चाषे॑णकिकिदी॒विना॑ ॥सा॒
कं॑व्वात॑स्य॒द्ध्राज्ज्या॑सा॒कन्न॑श्यनि॒हाकया॥८७॥शतं॑६०० ॥अ॒न्याव॑÷॥
अ॒न्यावो॑ऽअ॒न्याम॑वत्त्व॒न्यान्यस्या॒ऽउपा॑वत ॥ ताःसर्व्वाः॑संव्वि॒दानाऽ
इ॒दम्मे॑प्प्राव॑त॒व्वच÷॥ ८८ ॥ याःफ॒लिनीःऽ । याःफ॒लिनी॒र्य्याऽअ॑फ॒लाऽ
अ॑पु॒ष्पायाश्च॑पु॒ष्पिणीःऽ ॥ बृह॒स्प्पति॑प्प्रसू॑ता॒स्तानो॑मु॒ञ्च॒न्त्वꣳह॑सःऽ

॥ ८९ ॥ मु॒ञ्चन्तु॑मा । शप॒त्थ्या॒दथो॒व्वरु॒ण्ण्या॒दु॒त ॥ अथो॑य॒मस्य॒
पड्ड्वी॑शा॒त्सर्व्व॑स्म्माद्देवकिल्बि॒षात् ॥ ९० ॥ अ॒व॒पत॑न्तीरवदन् ॥
अ॒व॒पत॑न्तीरवदन्दि॒वऽओष॑धय॒स्प्परि॑ ॥ यञ्जी॒वम॒श्नवा॑महै॒नसरि॑
॥ ३३ ॥ द्विपदायाः ॥ द्विपदायाश्श्चतुष्ष्पदास्त्रिपदायाश्श्चषट्पदाः ॥
विच्छन्दायाश्श्चसच्छन्दाःसूचीभिःशम्म्यन्तुत्त्वा ॥ ३४ ॥ महाना
म्न्योरेवत्त्यः ॥ महानाम्न्योरेवत्त्योविश्श्वाऽआशाःप्प्रभूवरीः ॥ मै
घीर्व्विद्युतोवाचःसूचीभिःशम्म्यन्तुत्त्वा ॥ ३५ ॥ नार्य्यस्त्तेपत्न्यो

रूꣳषितेमासाऽआच्छ्यन्तुशम्म्यन्तः ॥ अहोरात्त्राणिमरुतोव्वि
लिष्टꣳसूदयन्तुते ॥ ४१ ॥ दैव्व्याऽअद्ध्वर्य्यवस्त्वाच्छ्यन्तुव्विचंशा
सतु॥गात्त्राणिपर्व्वशस्तेसिमाःकृण्ण्वन्तुशम्म्यन्तीः ॥ ४२ ॥ द्यौस्ते ।
पृथिव्व्यन्तरिक्षंव्वायुश्छिद्द्रम्पृणातुते ॥ सूर्य्यस्तेनक्षत्त्रैःसहलोकङ्कृणो
तुसाधुया ॥ ४३ ॥ शन्ते ॥ शन्तेपरेब्भ्योगात्त्रेब्भ्यःशमस्त्ववरे
ब्भ्यः ॥ शमस्त्थब्भ्योमज्जभ्यःशम्म्वस्तुतन्न्वैतव ॥४४॥ [६] कः
स्विवत् ॥ कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किꣳस्विद्धिम
स्यभेषजङ्किम्म्वावपनम्महत् ॥ ४५ ॥ सूर्य्यऽएकाकी । चरतिचन्द्र

मांजायतेपुनः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥ ४६ ॥
किꣳस्वित् ॥ किꣳस्वित्सूर्यसमञ्ज्योतिᳵकिꣳसमुद्रसमꣳसरः ॥
किꣳस्वित्पृथिव्यैव्वर्षीयᳵकस्यमात्रानविद्यते ॥ ४७ ॥ ब्रह्मसूर्यस
मम् ॥ ब्रह्मसूर्यसमञ्ज्योतिर्द्यौःसमुद्रसमꣳसरः ॥ इन्द्रःपृथिव्यैव्व
र्षीयान्गोस्तुमात्रानविद्यते ॥ ४८ ॥ पृच्छामित्त्वा । चितयेदेवसख
यदित्त्वमत्रमनसाजगन्थ ॥ येषुव्विष्णुस्त्रिषुपदेष्वेष्टस्तेषुव्विश्व
म्भुवनमाविवेश ॥ ४९ ॥ अपितेषु । त्रिषुपदेष्वस्मियेषुव्विश्व
म्भुवनमाविवेश ॥ सद्यःपर्येमिपृथिवीमुतद्यामेकेनाङ्गेनदिवोऽअस्य

पृ॒ष्टम् ॥ ५० ॥ केष्व॒न्तः । पुरु॑ष॒ऽआवि॑वेश॒कान्य॒न्तःपुरु॑षे॒ऽअर्प्पि॑तानि ॥ एतद्ब्र॑ह्मन्नु॒प॑वल्हामसि॒त्त्वा॒किꣳस्वि॑न्नः॒प्प्रति॑वोचा॒स्यत्र॑ ॥
॥ ५१ ॥ प॒ञ्चस्व॒न्तः । पुरु॑ष॒ऽआवि॑वेश॒तान्य॒न्तःपुरु॑षे॒ऽअर्प्पि॑तानि ॥
एतत्त्वात्र॑प्प्रति॑मन्वा॒नोऽअ॑स्मि॒नमा॒यया॑भव॒स्युत्त॑रो॒मत् ॥ ५२ ॥
[८] कास्वि॑त् ॥ कास्वि॑दासीत्त्पू॒र्व्वचि॑त्तिः॒किꣳस्वि॑दासीद्बृ॒हद्वयः॑ ॥
कास्वि॑दासीत्त्पिलिप्पि॒ला कास्वि॑दासीत्त्पिशङ्गि॒ला ॥ ५३ ॥ द्यौरा॑सी
त् ॥ द्यौरा॑सीत्त्पू॒र्व्वचि॑त्ति॒रश्व॑ऽआसीद्बृ॒हद्वयः॑ ॥ अवि॑रासीत्त्पिलिप्पि
ला रात्त्रि॑रासीत्त्पिशङ्गि॒ला ॥ ५४ ॥ काऽई॑म् ॥ काऽई॑मरे पिशङ्गि॒ला

काऽईङ्कुरुपिशाङ्गिला ॥ कऽईमास्कन्दमर्षति कऽईम्पन्थांविसर्प्पति ॥
॥ ५५ ॥ अजारे । पिशाङ्गिलाश्वावित्कुरुपिशाङ्गिला ॥ शशऽआस्क
न्दमर्षत्यहिःपन्थांविसर्प्पति ॥ ५६ ॥ कत्त्यस्य । विष्ठाःकत्त्यक्षरा
णिकतिहोमासःकतिधासमिद्धः ॥ यज्ञस्यत्त्वाविदथापृच्छमत्रकति
होतारऽऋतुशोयजन्ति ॥ ५७ ॥ षडस्य । विष्ठाःशतमक्षराण्ण्यशी
तिहोमाःसमिधोहतिस्रः ॥ यज्ञस्यतेविदथाप्प्रब्रवीमिसप्तहोतारऽ
उ अ ऋतुशोयजन्ति ॥ ५८ ॥ कोऽअस्य । वेदभुवनस्यनाभिङ्कोद्यावापृ
२३ थिवीऽअन्तरिक्षम् ॥ कःसूर्य्यस्यवेदबृहतोजनित्रङ्कोवेदचन्द्रमसंय्य

तोजाः ॥ ५९ ॥ व्वेदाहम् ॥ व्वेदाहमस्यभुवनस्यनाभिंव्वेदद्यावापृथि
वीऽअन्तरिक्षम् ॥ व्वेदसूर्य्यस्यबृहतोजनित्रमथोव्वेदचन्द्रमसंयतो
जाः ॥ ६० ॥ पृच्छामित्वा ॥ पृच्छामित्त्वापरमन्तम्पृथिव्याःपृ
च्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्त्वाव्वृष्णोऽअश्वस्यरेतःपृ
च्छामिव्वाचःपरमंव्योम ॥ ६१ ॥ इयंव्वेदिः ॥ इयंव्वेदिःपरोऽअन्तः
पृथिव्याऽअयंयज्ञोभुवनस्यनाभिः॥ अयꣳसोमोव्वृष्णोऽअश्वस्यरे
तोब्रह्मायंव्वाचःपरमंव्योम ॥ ६२ ॥ [१०] सुभूःस्वयम्भूः । प्रथ
मोन्तर्म्महत्यर्ण्णवे ॥ दधेहगर्भमृत्वियंयतोजातःप्रजापतिः ॥

॥ ६३ ॥ होता॑यक्षत् ॥ होता॑यक्षत्प्र॒जाप॑ति॒ꣳसोम॑स्यमहि॒म्नः ॥ जु॒षता॒म्पिब॑तु॒सोम॒ꣳहोत॒र्यज॑ ॥ ६४ ॥ प्रजा॑पते॒न । त्वदे॒तान्य॒न्यो॒विश्वा॑रू॒पाणि॒परि॒ताब॑भूव ॥ यत्का॑मास्तेजुहु॒मस्तन्नो॑ऽअस्तुव॒यꣳस्या॑म॒पत॑योरयी॒णाम् ॥ ६५ ॥ [३] इति॑ श्रीवाजसनेयशुक्लयजुस्संहितायांदीर्घपाठेत्रयोविंशोऽध्यायः ॥ ॥ २३ ॥ अश्वस्तूपरोधूम्रान्वसंतायसमुद्रायशिशुमारान्मयुःप्राजापत्त्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥ ॐ अश्व॑स्तूप॒रः ॥ अश्व॑स्तूप॒रोगो॑मृ॒गस्तेप्रा॑जाप॒त्याःकृ॒ष्णग्री॑वऽआग्ने॒योर॒राटे॑पु॒रस्ता॑त्सारस्व॒तीमे॒ष्य॒धस्ता॒द्ध

न्वोराश्विनावधोरामौबाह्वोःसौमापौष्णःश्यामोनाभ्याꣳसौर्य
यामौश्वेतश्चकृष्णश्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्वाय
व्यःश्वेतःपुच्छऽइन्द्रायस्वपस्यायवेहद्वैष्णवोवामनः ॥१॥ रोहितो
धूम्म्ररोहितः । कर्कन्धुरोहितस्तेसौम्म्याबभ्रुररुणबभ्रुःशुकबभ्रु
स्तेवारुणाःशितिरन्ध्रोन्यतःशितिरन्ध्रःसमन्तशितिरन्ध्रस्तेसावित्रा
ःशितिबाहुरन्यतःशितिबाहुःसमन्तशितिबाहुस्तेबार्हस्पत्त्याःपृष
तीक्षुद्रपृषतीस्थूलपृषतीतामैत्त्रावरुण्यः ॥२॥ शुद्धवालःसर्वशु
द्धवालोमणिवालस्तऽआश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्रायपशुपत

येकृष्णाभौमाऽअंवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः ॥ ३ ॥ पृ
श्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्द्ध्वपृश्निस्तेमारु
ताःफल्गूर्लोहितोर्णीपलक्षीताःसारस्वत्त्यःप्लीहाकर्ण्णःशुण्ठाकर्ण्णो
द्ध्यालोहकर्ण्णस्तेत्वाष्ट्राःकृष्णग्रीवःशितिकक्षोञ्जिसक्थस्तऽऐन्द्रा
ग्नाःकृष्णाञ्जिरल्पाञ्जिर्म्महाञ्जिस्तऽउषस्याः ॥ ४ ॥ शिल्पावै
श्वदेव्यः ॥ शिल्पावैश्वदेव्योरोहिण्यस्त्र्यवयोवाचेविज्ञाताऽअदि
त्यैसरूपाधात्रेवत्सतर्य्योदेवानाम्पत्नीभ्यः ॥ ५ ॥ कृष्णग्रीवा
आग्नेयाः । शितिभ्रवोवसूनाᳫंरोहितारुद्राणाᳫंश्वेताऽअवरोकि

णंऽआदित्त्यानान्नभोरूपाःपार्ज्जन्न्याः ॥ ६ ॥ उन्नतऽऋषभः ॥ उन्न
तऽऋषभोव्वामनस्तऽऐन्द्राव्वैष्ण्णवाऽउन्नतःशितिबाहुःशितिपृष्ठस्तऽ
ऐन्द्राबार्हस्प्पत्त्याःशुकरूपाव्वाजिनाःकल्म्माषाऽआग्निमारुताःश्या
माःपौष्ण्णाः ॥ ७ ॥ एताऽऐन्द्राग्नाः ॥ एताऽऐन्द्राग्नाद्विरूपाऽअ
ग्नीषोमीयाव्वामनाऽअनड्वाहऽआग्नावैष्ण्णवाव्वशामैत्रावरुण्योन्न्यत
ऽएन्न्योमैत्र्यः ॥ ८ ॥ कृष्ण्णग्ग्रीवाऽआग्नेयाः ॥ कृष्ण्णग्ग्रीवाऽ
आग्नेयाबभ्रवःसौम्म्याःश्वेताव्वायव्याऽअविज्ञाताऽअदित्त्यैसरूपा
धात्रेव्वत्त्सतर्य्योदेवानाम्पत्नीभ्भ्यः ॥ ९ ॥ कृष्ण्णाभौमाः ॥ कृष्ण्णा

संहि. भौमाधूम्म्राऽआंन्तारिुक्षाबृहन्तौदिुव्याऽंशुबलांव्वैद्युताऽसिुध्मास्तारु
॥२०१॥ काऽ॥ १० ॥ [१०] धूम्म्रान्त्वंसुन्तायं ॥ धूम्म्रान्त्वंसुन्तायालंभते
श्वेतान्ग्ग्रुीष्म्मायंकृष्णान्वृुषाभ्यौरुुणाञ्छुरदेपृषंतोहेमुन्तायांपिुश
ङ्गाञ्छिशिराय॥११॥ त्र्यवंयोगायुत्र्यै। पञ्चांवयास्त्रिुष्टुभेंदित्त्युवाहोुज
गंत्यैत्रिवुत्साऽअंनुष्टुभेंतुर्य्युंवाहंऽउुष्णिहे॥ १२ ॥ पुष्ठवाहोंव्विराजे॥
पृुष्ठवाहोंव्विराजंऽउुक्षाणोंबृहुत्त्याऽऋुषुभाऽंककुुभेनुड्वाहंःपुङ्क्त्यैधेुन
उ.अ. वोतिच्छन्दसे॥१३॥कृष्णग्ग्रीवाऽआग्नुेयाः॥कृष्णग्ग्रीवाऽआग्ग्नुेयाब्ब्रु
२४ भ्रवंःसुौम्याऽउपध्वुस्ताःसावित्रावत्सतुर्य्यंःसारस्वुत्त्युःश्यामाःपौु

ष्णाःपृश्नयोमारुतावहुरूपावैश्वदेवावशाद्यावापृथिवीयाः ॥ १४ ॥
उक्ताःसंञ्चराः ॥ उक्ताःसंञ्चराऽएताऽऐन्द्राग्नाःकृष्णावारुणाःपृश्न
योमारुताःकायास्तूपराः ॥ १५ ॥ अग्नयेनीकवते । प्प्रथमजानाल
भतेमरुद्भ्यःसान्तपनेभ्यःसवात्त्यान्मरुद्भ्योगृहमेधिभ्योबष्किहा
न्मरुद्भ्यःक्रीडिभ्यःसꣳसृष्टान्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान् ॥ १६॥
उक्ताःसंञ्चराः ॥ उक्ताःसंञ्चराऽएताऽऐन्द्राग्नाःप्प्राशृङ्गामाहेन्द्रावहु
रूपावैश्वकर्म्मणाः॥१७॥धूम्म्रावभ्रुनीकाशाः । पितृणाꣳसोमवता
म्बभ्रवोधूम्म्रनीकाशाः ॥ पितृणांबर्हिषदाङ्कृष्णाबभ्रुनीकाशाःपितृ

णामग्निष्वात्तानांकृष्णाःपृषन्तस्त्रैयम्बकाः ॥१८॥ उक्षाःसंचरा ॥
॥२०२॥ उक्षाःसंचराऽएताःशुनासीरीयाःश्वेतावायव्याःश्वेताःसौर्याः ॥१९॥
वसन्तायकपिञ्जलान्॥वसन्तायकपिञ्जलानालभतेग्रीष्मायकलवि
ङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदेवर्त्तिकाहेमन्तायककराञ्छिशिरायविक
करान् ॥२०॥ [१०] समुद्रायशिशुमारान् ॥ समुद्रायशिशुमाराना
लभतेपर्जन्यायमण्डूकानद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणाय
नाक्रान् ॥ २१ ॥ सोमायहंसान् ॥ सोमायहंसानालभतेवायवे
बलाकाऽइन्द्राग्निभ्यांक्रुञ्चान्मित्रायमद्गून्वरुणायचक्रवाकान्॥

॥ २२ ॥ अग्नयेकुटरूंन् ॥ अग्नयेकुटरूनालंभतेव्वनस्प्पतिभ्यऽ
उलूकानग्नीषोमाभ्यांचाषानश्विभ्यांम्मयूरान्मित्त्रावरुणाभ्या
ङ्कपोतान् ॥ २३ ॥ सोमायलबानालंभतेत्त्वष्ट्रेकौलीकान्गोषादीर्द्देवा
नाम्पत्नीभ्यऽकुलीकादेवजामिभ्योग्नयेगृहपतयेपारुष्णान् २४॥
अह्नेपारावतान् ॥ अह्नेपारावतानालंभतेरात्र्यैसीचापूरहोरात्त्रयोः
सन्धिभ्योजतूम्मासेभ्योदात्त्यौहान्त्संव्वत्त्सरायमहतऽसुपर्णान् ॥
॥ २५ ॥ भूम्म्याऽआखून् ॥ भूम्म्याऽआखूनालंभतेन्तरिक्षायपाङ्क्त्रा
न्दिवेकशान्दिग्भ्योनकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥ २६ ॥

वसभ्य॒ऽऋश्या॑न् ॥ वसु॑भ्य॒ऽऋश्या॒नाल॑भतेरु॒द्रेभ्यो॒रु॒रू॑नादि॒त्त्ये
भ्यो॒न्यङ्कू॒न्विश्वे॑भ्योदे॒वेभ्य॑ःपृष॒तान्त्सा॒द्ध्येभ्य॑ःकुलु॒ङ्गान्॥२७॥
ईशा॑नायुपर॑स्वतऽ ॥ ईशा॑नायुपर॑स्वत॒ऽआल॑भतेमि॒त्राय॑गौ॒रान्वरु
णायमहि॒षान्बृह॒स्पत॑येगव॒याँस्त्वष्ट्र॒ऽउष्ट्रा॑न् ॥ २८ ॥ प्र॒जाप॑तये
पुरु॑षान् ॥ प्र॒जाप॑तयेपुरु॑षान्ह॒स्तिन॒ऽआल॑भतेवा॒चेप्लु॒षीश्चक्षु॑षे
म॒शका॒न्छ्रोत्रा॑यभृ॒ङ्गाःऽ॥२९॥शतम् ॥ १४०० ॥ प्र॒जाप॑तयेच । वा॒य
वे॑चगोमृ॒गोवरु॑णायार॒ण्योमे॒षोय॒माय॑कृ॒ष्णोम॑नु॒ष्यरा॒जाय॑म॒र्क॒टः
शा॒र्दूला॑यरो॒हिदृ॑ष॒भाय॑गव॒यीक्षि॑प्रश्ये॒नाय॑वर्त्ति॒कानील॑ङ्गोःकृ॒मिःस

मुद्गायशिशुमारोहिमवतेहस्ती ॥ ३० ॥ [१०] मयुःप्प्राजा
पत्त्यः ॥ मयुःप्प्राजापत्त्यऽउलोहलिक्ष्णोवृषदꣳशस्त्तेधात्त्रेदिशाङ्कङ्को
धुङ्क्षाग्ग्नेयीकलविङ्कोलोहिताहिःपुष्ष्करसादस्त्तेत्त्वाष्ट्रावाचेक्रुञ्चः ॥
॥ ३१ ॥ सोमायकुलङ्गः ॥ सोमायकुलङ्गऽआरण्ण्योजोनकुलःशका
तेपौष्ण्णाःक्रोष्टामायोरिन्द्रस्यगौरमृगःपिद्वोन्न्यङ्कुःकक्कटस्त्तेनुमत्त्यै
प्प्रतिश्श्रुत्त्कायैचक्क्रवाकः ॥ ३२ ॥ सौरीबलाका । शार्ग्गःसृज
यःशयाण्डकस्त्तेमैत्त्राःसरस्वत्त्यैशारिःपुरुषवाक्श्वाविद्भौमीशार्दूलो
वृकःपृदाकुस्त्तेमन्न्यवेसरस्वतेशुकःपुरुषवाक् ॥ ३३ ॥ सुप

र्णःपार्जन्यः ॥ सुपर्णःपार्जन्यऽआतिर्वाहसोदर्विदातेवायवेबृहस्प्पतयेवाचस्प्पतयेपैङ्गराजोलजऽआन्तरिक्षःप्लवोमद्गुर्म्मत्स्यस्तेनदीपतयेद्यावापृथिवीयःकूर्म्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्रमसः ॥ पुरुषमृगश्चन्द्रमसोगोधाकालकादार्वाघाटस्तेवनस्पतीनाङ्कृकवाकुः सावित्रोहꣳसोवातस्यनाक्रोमकरःकुलीपयस्तेकूपारस्यह्रियैशल्यकः ॥ ३५ ॥ एण्यह्नः ॥ एण्यह्नोमण्डूकोमूषिकातित्तिरिस्तेसर्प्पाणांल्लोपाशऽआश्विनःकृष्णोरात्र्याऽऋक्षोजतूःसुषिलीकातऽइतरजनानाञ्जहकावैष्णवी ॥ ३६ ॥ अन्यवापोर्द्धमासानामृश्यो

मयूर÷सुपर्णस्तेगन्धर्व्वाणामपामुद्रोमासाङ्कश्यपोरोहित्कुण्डृणाची
गोलत्तिकातेप्सरसाम्मृत्त्यवेसितः॥३७॥वर्षाहूर्ऋतूनाम् ॥ वर्षाहू
र्ऋतूनामाखुःकशोमान्थालस्तेपितृणाम्बलायाजगरोवसूनाङ्कपिञ्ज
लःकपोतऽउलूकःशशस्तेनिर्ऋत्यैवरुणायारण्योमेषः ॥३८॥ श्वित्रऽ
आदित्यानाम् ॥ श्वित्रऽआदित्यानामुष्ट्रोघृणीवान्वार्ध्रीनसस्तेम
त्याऽअरण्यायसृमरोरुरूरौद्रःक्वयि÷कुटरुर्दात्त्यौहस्तेवाजिनाङ्कामा
यपिकः ॥ ३९ ॥ खड्गोवैश्वदेवः । श्वाकृष्णःकर्णोगर्दभस्तरक्षुस्तेर
क्षसामिन्द्रायसूकरःसिंहोमारुतःकृकलासःपिप्पकाशकुनिस्तशर

व्या॒यैर्व्विश्वे॑षान्दे॒वानां॑म्पृष॒तः ॥ ४० ॥ [४] इतिश्रीवाजसनेयशुक्लयजुःसंहितायांदीर्घपाठेचतुर्विंशोऽध्यायः ॥ २४ ॥ शादंदद्भिर्नवैकैकाहिरण्यगर्भश्चतस्रआनोदशमानोमित्रोयदश्वस्याष्टकौयत्तेषाडिमानुकंद्वेपंचदशसप्तचत्त्वारिꣳशत् ॥ ॐम् ॥ शादं॑न्द॒द्भिः ॥ शादं॑न्द॒द्भिरव॑कान्दन्तमू॒लैर्म्मृद॒म्बस्वैँ॒स्ते॑गान्द॒ꣳष्ट्रा॑भ्या॒ꣳसर॑स्वत्याऽअग्र॒जि॒ह्वञ्जि॒ह्वाया॑ऽउ॒त्त्सा॒दम॑वक्र॒न्दे॑न॒ता॒लु॒व्वाज॒ꣳहनु॑भ्याम॒पऽआ॒स्ये॒ऽनु॒व्वृष॑णमा॒ण्डाभ्या॑मादि॒त्याँ॒श्म्मश्रु॑भिः॒पन्था॑नम्भ्रू॒भ्यान्द्यावा॑पृथि॒वीव्वर्त्तो॑भ्यांव्विद्यु॒तङ्क॒नीन॑काभ्याꣳशु॒क्लाय॒स्वाहा॑कृ॒ष्णाय॒स्वा

ह्लापार्ष्या॑णिपक्ष्मा॑ण्यवार्ष्या॑ऽइक्षवो॑वार्ष्या॑णिपक्ष्मा॑णिपार्ष्या॑ऽइक्षवं÷
१॥ [१] वातंम्प्राणेनं ॥ वातंम्प्राणेना॑पानेननासिके॑ऽउपयाममध
रेणौष्ठेंनसदुत्त॑रेणप्प्रकाशेनान्त॑रमनूकाशेनबाह्यांन्निवेष्ष्यम्मूर्द्ध्ना॑स्तंन
यित्क्नुनिर्बा॑धेनाशनिंम्मस्त्तिष्क्केणविद्युतंङ्कनीनंकाभ्याङ्कर्णा॑भ्याꣳ
श्रोत्रꣳश्रोत्राभ्याङ्कर्णौतेदनीमंधरकण्ठेनापःशुष्क्ककण्ठेनंचित्तम्म
न्न्यांभिरदितिꣳशीर्ष्णा॑निर्ऋतिन्निर्ज्जर्ज्जल्प्येनशीर्ष्णासंक्रोशैः
प्प्राणान्न्रेष्म्माणꣳस्तुपेनं॥२॥ [१] मशकान्न्केशैः॥ मशकान्न्केशैरि
न्द्रꣳस्वपसावहेनबृहस्प्पतिꣳशकुनिसादेनंकूर्म्माञ्छफैराक्क्रमणꣳ

स्थूराभ्यामृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जाम्बीलेनारण्यमग्निमतिरुग्भ्याम्पूषणन्दोर्भ्यामश्विनावꣳसाभ्याꣳरुद्रꣳरोराभ्याम्॥३॥[१]अग्नेः पक्षतिः॥अग्नेः पक्षतिर्वायोर्न्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्त्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳसप्तमी बृहस्प्पतेरष्टम्म्यर्य्यम्म्णो नवमी धातुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥४॥ [१] इन्द्राग्ग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्म्मित्रस्य तृतीयापाञ्चतुर्त्थी निर्ऋत्यै पञ्चम्यग्ग्नीषोमयोः षष्ठी सर्प्पाणाꣳसप्तमी विष्ण्णोरष्टमी पूष्ण्णो नवमी त्वष्टुर्द्दशमीन्द्र

स्यैकादशीव्वरुणस्यद्द्वादशीयमस्यैत्त्रयोदशीद्यावापृथिव्व्योर्द्दक्षिणम्पा
र्श्वंव्विश्श्वेषान्देवानामुत्तरम् ॥ ५ ॥ [१] मरुताꣳस्कन्धाः ॥ मरुता
ꣳस्कन्धाव्विश्श्वेषान्देवानाम्प्रथमाकीकसारुद्द्राणान्द्वितीयादित्त्यानां
न्तृतीयाव्वायोःपुच्छमग्ग्नीषोमयोर्ब्भासदौक्रुञ्चौश्श्रोणिब्भ्यामिन्द्रा
बृहस्प्पतीऽऊरुब्भ्याम्मित्त्रावरुणावल्गाब्भ्यामाक्क्रमणꣳस्त्थूराब्भ्या
म्बलङ्कुष्ठाब्भ्याम् ॥ ६ ॥ [१] पूषणंव्वनिष्ठुनान्धाहीन्त्स्थूलगुद
यासर्प्पान्गुदाभिर्व्विह्रुतऽआन्त्रैरपोव्वस्तिनाव्वृषणमाण्डाब्भ्यांव्वाजिन
ꣳशेपेनप्प्रजाꣳरेतसाचाषान्पित्तेनप्प्रदरान्पायुनाकूश्माञ्छकपि

ण्डैः ॥ ७ ॥ [१] इन्द्र॑स्यक्क्रो॒डः ॥ इन्द्र॑स्यक्क्रो॒डोदि॑त्त्यैपाज॒स्य॒न्दि॒शांज॒त्रवो॒दि॑त्त्यैभ॒सज्जी॒मूतान्हृ॒दयौ॒पशे॒नान्तरि॑क्षम्पु॒री॑तता॒नभ॑ऽउद॒र्य्ये॑णंचक्रवा॒कौम॑तस्न्नाभ्या॒न्दिवंवृ॒क्काभ्यांङ्गि॒रीन्प्ला॒शि॑भि॒रुपंलान्प्ली॒ह्नाव॒ल्मीकांन्क्लो॒मभि॑र्ग्ग्लौ॒भिर्ग्गु॒ल्मान्हि॒राभि॒ःस्रव॑न्तीर्ह्र॒दान्कु॒क्षिभ्या॑ᳫंसमु॒द्रमु॒दरे॑णवैश्वानरम्भस्म॑ना ॥ ८ ॥ [१]
वि॒धृ॑तिन्नाभ्यां । घृ॒तᳫंरसे॑नापो॒यू॒ष्णामरी॑चीर्व्वि॒प्रुड्भिर्न्नी॑हा॒रमू॒ष्मणा॑शीनंव॒सया॒प्प्रु॒ष्वा॒ऽअश्श्रु॑भिर्ह्रा॒दु॒नीर्द्दू॒षीकाभि॑रस्न्नारक्षा॑ᳫंसिचि॒त्राण्यङ्गै॒र्न्नक्षत्राणि॑रू॒पेणं॑पृथि॒वीन्त्व॒चाजु॑म्ब॒काय॒स्वाहा॑ ॥ ९ ॥ [१]

हिरण्यगर्भःसम् ॥ हिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेक
ऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाव्विधेम ॥
॥ १० ॥ यःप्प्राणतः ॥ यःप्प्राणतोनिमिषतोमहित्त्वैकऽइद्द्राजाजग
तोबभूव ॥ यऽईशेऽअस्यद्विपदश्श्चतुष्ष्पदःकस्म्मैदेवायहविषाव्विधेम ॥
॥ ११ ॥ यस्येमे । हिमवन्तोमहित्त्वायस्यसमुद्रꣳरसयासहाहुः ॥
यस्येमाःप्प्रदिशोयस्यबाहूकस्म्मैदेवायहविषाव्विधेम ॥ १२ ॥ यऽ
आत्त्मदाः ॥ यऽआत्त्मदाबलदायस्यव्विश्श्वऽउपासतेप्प्रशिषꣳय
स्यदेवाः ॥ यस्यच्छायामृतꣳयस्यमृत्त्युःकस्म्मैदेवायहविषाव्विधेम ॥

॥ १३ ॥ [४] आनः ॥ आनोभद्राःक्रतवोयन्तुव्विश्वतोदब्धासोऽअप
रीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदि
वेदिवे ॥ १४ ॥ देवानाम्भद्रा । सुमतिर्ऋजूयतान्देवानाꣳरातिरभि
नोनिवर्त्तताम् ॥ देवानाꣳसख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्र
तिरन्तुजीवसे ॥ १५ ॥ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदि
तिन्दक्षमस्रिधम् ॥ अर्य्यमणंव्वरुणꣳसोममश्विनासरस्वतीनःसुभ
गामयस्करत् ॥१६॥ तन्नः ॥ तन्नोवातोमयोभुव्वातुभेषजन्तन्मातापृ
थिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणत

न्धिषण्ण्यायुवम् ॥१७॥ तमीशांनम् ॥ तमीशांनुअगतस्त्तुस्त्थुषुस्प्प
तिंन्धियञ्जिन्वमवंसेहूमहेव्वुयम्॥पूषानोयथुाव्वेदंसुामसंद्वृधेरंक्षितापु
युरदंब्धःस्वुस्त्तयें ॥१८॥ स्वुस्त्तिनं÷॥ स्वुस्त्तिनुऽइन्द्रोंव्वृद्धश्श्रवाऽस्वु
स्त्तिनं÷पुषाव्विश्श्ववेंदाऽ ॥ स्वुस्त्तिनुस्ताक्ष्योंऽअरिंष्टनेमिंऽस्वुस्त्तिनो
बृहुस्प्पतिंर्द्दधातु ॥ १९ ॥ पृषंदश्श्वामुरुतं÷ ॥ पृषंदश्श्वामुरुतुऽपृश्श्नि
मातरंऽशुभुंय्यावांनोव्विदथेंषुजग्मंयऽ ॥ अुग्निुजिह्वामनंवुऽसूरंचक्षसो
व्विश्श्वेंनोदेवाऽअवुसागंमन्निह ॥ २० ॥ भुद्रङ्कर्णेभिंऽश्शृणुयामदेवाभुद्र
म्पंश्येमाुक्षभिंर्य्यजत्राऽ ॥ स्थिुरैरङ्गैंस्त्तुष्टुवाꣳसंस्त्तुनूभिंर्व्यशेमहि

देवहितंय्यदायुः ॥ २१ ॥ शतमित् ॥ शतमिन्नुशरदोऽअन्तिदे
वायत्रांनःश्चक्राजरसंन्तनूनाम् ॥ पुत्रासोयत्रंपितरोभवंन्तिमानोम
द्ध्यारीरिषतायुर्गन्तोः ॥ २२ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदिति
र्म्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःऽपञ्चजनाऽअदितिर्ज्जात
मदितिर्ज्जनित्त्वम् ॥ २३ ॥ [१०] मानः ॥ मानोमित्रोवरुणोऽअ
र्य्यमायुरिन्द्रऽऋभुक्षामरुतःऽपरिक्ख्यन् ॥ यद्वाजिनोदेवजातस्यसप्ते
ःऽप्रवक्ष्यामोविदथेवीर्य्याणि ॥ २४ ॥ यन्निर्णिजा । यन्निर्णिजारेक्ण
साप्प्रावृतस्यरातिङ्गृभीताम्मुखतोनयन्ति ॥ सुप्प्राङ्जोमेम्म्यद्वि

श्श्वरूपऽइन्द्रापूष्ण्णोः प्प्रियमप्प्येति पाथः ॥२५॥ एषच्छागः । पुरोऽअश्श्वेन व्वाजिना पूष्ण्णो भागो नीयते व्विश्श्वदेव्व्यः ॥ अभिप्प्रियँय्यत्पुरोडाशमर्व्वता त्त्वष्टेदेनꣳसौश्श्रवसायं जिन्न्वति ॥२६॥ यद्धविष्ष्यम् ॥ यद्धविष्ष्यमृतुशो देवयानन्त्रिर्म्मानुषाः पर्य्यश्श्वन्नयन्ति ॥ अत्त्रा पूष्ण्णः प्प्रथमो भागऽएति यज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः ॥२७॥ होताद्ध्वर्य्युः । होताद्ध्वर्य्युरावयाऽअग्ग्निमिन्धो ग्ग्रावग्ग्राभऽउत शꣳस्ता सुविप्प्रः ॥ तेन यज्ञेन स्वरङ्कृतेन स्विष्टेन व्वक्षणाऽआपृणद्ध्वम् ॥ २८ ॥ यूपव्व्रस्काऽउत ॥ ये यूपवाहाश्चषालँय्येऽअश्श्वयूपाय तक्षति ॥ ये चार्व्वते पचनꣳ

सम्भरन्त्युतोतेषामभिगूर्त्तिर्न्नऽइन्वतु ॥ २९ ॥ उपप्प्र ॥ उपप्प्रागा
त्सुमन्मेऽधायिमन्मदेवानामाशाऽउपवीतपृष्ठः ॥ अन्वेनंविप्प्राऽऋ
षयोमदन्तिदेवानाम्पुष्टेचकृमासुबन्धम् ॥ ३० ॥ यद्वाजिनः ॥ यद्वा
जिनोदामसन्दानमर्व्वतोयाशीर्षण्यारशनारज्जुरस्य ॥ यद्वाघास्य
प्प्रभृतमास्येतृणँसर्व्वाताते ऽअपिदेवेष्वस्त्तु ॥ ३१ ॥ [८] यदश्व
स्यक्रविषोमक्षिकाशयद्वास्वरौस्वधितौरिप्तमस्त्ति ॥ यद्धस्तयोः
शमितुर्यन्नखेषुसर्व्वाताते ऽअपिदेवेष्वस्त्तु ॥ ३२ ॥ यदूवध्यम् ॥
यदूवध्यमुदरस्यापवातियऽआमस्यक्रविषोगन्धोऽअस्त्तिसुकृतात

च्छ॑मि॒तार॑ᳵकृण्वन्तूतमेध॑ꣳशृत॒पाक॑म्पचन्तु ॥३३॥ यत्ते॑ ॥ यत्ते॒गात्रा
द॒ग्निना॑पच्य॒मा॑नाद॒भिशूल॒न्निह॑तस्याव॒धाव॑ति ॥ मातद्भूम्म्या॒मा
ꣳश्रि॒ष॒न्मातृणे॑षुदे॒वेभ्य॒स्तदु॒शद्भ्यो॑रा॒तम॑स्तु ॥३४॥ येवा॒जिन॑म् ॥ ये
वा॒जिन॑म्परि॒पश्य॑न्तिप॒क्वꣳयऽई॑मा॒हुःसु॑र॒भिर्न्निर्ह॒रे॒ति॑ ॥येचार्व॑तोमाꣳ
सभि॒क्षामु॒पास॑तऽउ॒तोतेषा॑म॒भिगू॑र्त्तिर्न्नऽइन्वतु ॥३५॥ यन्नीक्ष॑णम् ॥
यन्नीक्ष॑णम्मा॒ँस्पच॑न्याऽउ॒खाया॒यापात्रा॑णियू॒ष्णऽआ॒सेच॑नानि ॥
ऊ॒ष्मण्या॒पि॒धाना॑च॒रूणाम॒ङ्काःसू॒नाःपरि॑भूषन्त्यश्व॑म् ॥ ३६ ॥
मात्त्वा॑ ॥ मात्त्वा॒ग्निर्ध्व॑नयीद्धू॒मग॑न्धि॒र्म्मोखा॒भ्राज॑न्त्य॒भिवि॑क्त॒ज

घ्रि÷ ॥ इष्टंवीतमभिगूर्तंवषट्कृतन्तन्देवासःप्रतिगृभ्णन्त्यश्श्वम् ॥
॥ ३७ ॥ निक्रमणान्निषदनम् ॥ निक्रमणान्निषदनंव्विवर्तनंय्यच्चपड्वीँ
शमर्व्वतः ॥ यच्चपपौयच्चघासिञ्जघाससर्व्वातातेऽअपिदेवेष्ष्वस्तु ॥
॥ ३८ ॥ यदश्श्वाय ॥ यदश्श्वायवासऽउपस्तृणन्त्यधीवासंय्याहिर
ण्यान्यस्म्मै॥सन्दानमर्व्वन्तम्पड्वीँशम्प्रियादेवेष्ष्वायामयन्ति ॥३९॥
[८]यत्ते।सादेमहसाशूकृतस्यपार्ष्ण्यावाकशयावातुतोद ॥ स्रुचेवता
हविषोऽअद्ध्वरेषुसर्व्वाताते ब्ब्रह्मणासूदयामि॥४०॥चतुस्त्रिꣳशद्वाजि
नः÷ ॥ चतुस्त्रिꣳशद्वाजिनोदेवबन्धोर्व्वङ्क्रीरश्श्वस्यस्वधितिःसमेति॥अ

च्छिद्द्रागात्त्रांव्वयुनांकृणोतुपरुंष्षपरुरनुघुष्ष्याव्विशंस्त ॥४१॥ एकुस्त्व
ष्टुं÷ ॥ एकुस्त्वष्टुरश्श्वंस्याव्विशुस्त्ताद्वायुन्तारांभवतुस्त्तथंऽऋतुः ॥ याते
गात्त्रांणामृतथाकृणोमितातापिण्डांनुाम्प्रजुंहोम्म्युग्ग्नौ ॥४२॥ मात्त्वां
तपात्त्प्रियऽआत्कमाप्प्रियन्तुम्मास्वधितिस्त्तन्न्वुऽआतिंष्ठिपत्त्ते ॥ मातेँ
गृद्ध्नुरंविशुस्त्तातिहायंच्छिद्द्रागात्त्रांण्युसिनामिथूंकः ॥४३॥ नवै ॥ न
वाऽउंऽएतन्म्म्रियसेनारिंष्ष्यासिदेवाँ इदेंषिपथिभिं÷सुगेभिं÷ ॥ हरीं
तेयुञ्जापृषंतीऽअभूतामुपांस्त्थाद्द्वाजीधुरिरासंभस्य ॥४४॥ सुगव्व्यं
न्नः ॥ सुगव्व्यंन्नोव्वाजीस्वश्श्व्यंम्पुंसःपुत्त्राँ उतव्विश्श्वापुषंर्‌रयिम् ॥

संहि. अनागास्त्वन्नोऽआदितिःकृणोतुक्षत्रन्नोऽअश्श्वोवनताᳪहविष्म्मान् ।
॥२१२॥ ॥ ४५ ॥ [६] इमानु । कम्भुवनासीषधामेन्द्रश्चविश्श्वेचदेवाः ॥
आदित्त्यैरिन्द्रᳪसगणोमरुद्भिरस्म्मभ्यम्भेषजाकरत् ॥ यज्ञश्चनस्त
न्वञ्चप्रजाश्चादित्त्यैरिन्द्रःसहसीषधाति ॥ ४६ ॥ अग्नेत्त्वन्नोऽअन्त
मऽउतत्राताशिवोभवावरुत्थ्यः ॥ वसुरग्निर्व्वसुश्श्रवाऽअच्छानक्षि
द्युमत्तमᳪरयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवᳪसुम्म्नायनूनमीमहेसखि
उ.अ. भ्यः ॥४७॥ [२] इतिवाजसनेयशुक्लयजुःसंहितायांपंचविंशोऽध्या
२६ यः ॥ २५ ॥ [१५] अग्निश्चपंचदशोच्चातएकादशद्वौषड्विंशतिः ।

ॐ अग्निश्च । पृथिवीचसन्नंतेतेमेसन्नंमतामदोव्वायुश्चान्तरिक्षश्चस
न्नंतेतेमेसन्नंमतामदऽआदित्त्यश्चद्द्यौश्चसन्नंतेतेमेसन्नंमतामदऽआप
श्चव्वरुणश्चसन्नंतेतेमेसन्नंमतामदः ॥ सप्तसꣳसदोऽअष्टमीभूतसा
धनी ॥ सकामाँ२ ॥ अद्ध्वनस्कुरुसञ्ज्ञानमस्तुमेमुना ॥ १ ॥ यथेमा
म् ॥ यथेमांव्वाचंकल्ल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्या
ꣳशूद्रायचार्य्यायचस्वायचारणायच ॥ प्प्रियोदेवानान्दक्षिणायैदा
तुरिहभूयासमयम्मेकामःसमृद्ध्यतामुपमादोनमतु ॥ २ ॥ बृहस्प
तेऽअति ॥ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥

षद्दीदय॒च्छव॑सऽऋतप्प्रजात॒तद॒स्म्मासुद्द्रवि॑णन्धेहि॒चित्त्रम् ॥ उप॒या॒
मगृ॑हीतोसिबृ॒ह॒स्प्पत॑येत्त्वै॒षते॒षोनि॒र्बृ॑ह॒स्प्पत॑येत्त्वा ॥ ३ ॥ इन्द्र॒गो
म॑न् ॥ इन्द्र॒गोम॑न्निहाया॑हि॒पिबा॒सोम॑ꣳशतक्क्रतो ॥ व्विद्यद्भि॒र्ग्ग्राव॑भिः
सु॒तम् ॥ उप॒या॒मगृ॑हीतोसीन्द्रा॑यत्त्वा॒गोम॑तऽएषते॒योनि॒रिन्द्रा॑यत्त्वा॒
गोम॑ते ॥ ४ ॥ इन्द्राया॑हि ॥ इन्द्राया॑हि॒व्वृत्त्रह॑न्पिबा॒सोम॑ꣳशतक्क्रतो ॥
गोम॑द्भि॒र्ग्ग्राव॑भिः सु॒तम् ॥ उप॒या॒मगृ॑हीतोसीन्द्रा॑यत्त्वा॒गोम॑तऽएषते॒
षोनि॒रिन्द्रा॑यत्त्वा॒गोम॑ते ॥ ५ ॥ ऋ॒ताव॑ानं॑व्वैश्वानरम् ॥ ऋताव॑ानं॑व्वै
श्वानरमृतस्य॒ज्ज्योति॑षस्प्पति॑म् ॥ अज॑स्रङ्घ॒र्म्म॑मीमहे ॥ उप॒या॒मगृ॑

हीतोसिव्वैश्श्वान॒राय॑त्त्वैषते॒योनि॑र्व्वैश्श्वान॒राय॑त्त्वा ॥ ६ ॥ व्वैश्श्वान॒र
स्य॑सु॒म॒तौ । स्याम॑राजा॒हिक॒म्भु॒व॑नानामभि॒श्श्री॑ः ॥ इतोजा॒तोवि
श्श्व॑मि॒दंवि॒च॑ष्टेव्वैश्श्वान॒रोय॑तते॒सूर्य्ये॑ण ॥ उप॒या॒मगृ॑हीतोसिव्वैश्श्वान॒रा
य॑त्त्वैषते॒योनि॑र्व्वैश्श्वान॒राय॑त्त्वा ॥ ७ ॥ व्वैश्श्वान॒रोन॑÷ ॥ व्वैश्श्वान॒रो
न॑ऽऊ॒तय॒ऽआप्प्रया॑तुप॒राव॑त÷ ॥ अ॒ग्निरु॒क्थेन॒व्वाह॑सा ॥ उप॒या॒मगृ॑ही
तोसिव्वैश्श्वान॒राय॑त्त्वैषते॒योनि॑र्व्वैश्श्वान॒राय॑त्त्वा ॥ ८ ॥ अ॒ग्निर्ऋषि॑÷ ॥
अ॒ग्निर्ऋषि॒ऽपव॑मान॒ऽपाञ्च॑जन्न्य॒ऽपु॒रोहि॑तऽ ॥ तमी॑महेमहाग॒यम् ॥ उ॒
प॒या॒मगृ॑हीतोस्य॒ग्ग्नये॑त्त्वा॒व्वर्च्च॑सऽएषते॒योनि॑र॒ग्ग्नये॑त्त्वा॒व्वर्च्च॑से ॥ ९ ॥

मुहाँ२ इन्द्रं÷ ॥ मुहाँ२ इन्द्रोवज्रंहस्तःषोडुशीशर्म्मंयच्छतु ॥
हन्तुंपाप्मानंय्योस्म्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयो
निर्म्महेन्द्रायत्त्वा ॥ १० ॥ तंव÷ ॥ तंवोदस्म्ममृतीषहंवसोर्म्मन्दान
मन्धसः ॥ अभिवत्सन्नस्वसरेषुधेनवऽइन्द्रङ्गीर्भिर्न्नवामहे ॥ ११ ॥
यद्वाहिष्ठम् ॥ यद्वाहिष्ठन्तदग्ग्नयेबृहदर्च्चविभावसो ॥ महिषीवत्त्वद्रयि
स्त्वद्वाजाऽउदीरते ॥ १२ ॥ एहि ॥ एह्यूषुब्रवाणितेग्ग्नऽइत्त्थेतरा
गिर÷ ॥ एभिर्व्वर्द्धासऽइन्दुभिः ॥ १३ ॥ ऋतवस्ते ॥ ऋतवस्तेयज्ञं
वितन्वन्तुमासारक्षन्तुतेहवि÷ ॥ संवत्त्सरस्तेयज्ञन्दधातुनःप्रजाश्च

परिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाम् ॥ उपह्वरेगिरीणाꣳसङ्गमेच
नदीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥ [१५] उच्चाते ॥ उच्चा
तेजातमन्धसोदिविसद्भूम्म्याददे ॥ उग्रꣳशर्म्ममहिश्श्रवः ॥ १६ ॥
सनः ॥ सनऽइन्द्राययज्ज्यवेव्वरुणायमरुद्भ्यः ॥ व्वरिवोवित्त्परिस्स्रव ॥
॥ १७ ॥ एनाव्विश्श्वानि ॥ एनाव्विश्श्वान्न्यर्य्यऽआद्युम्म्नानिमानु
षाणाम् ॥ सिषासन्तोव्वनामहे ॥ १८ ॥ अनुवीरैः ॥ अनुवीरैरनुपु
ष्ष्यास्म्मगोभिरन्न्वश्श्वैरनुसर्व्वेणपुष्ट्टैः ॥ अनुद्विपदानुचतुष्ष्पदाव्वय
न्देवानोयज्ञमृतुथानयन्तु ॥ १९ ॥ अग्ग्नेपत्त्नीः ॥ अग्ग्नेपत्त्नीरि

हाव॑हदेवाना॑मुशतीरुप॑ ॥ त्वष्टा॑रꣳसोम॑पीतये ॥ २० ॥ अभियज्ञ
म् ॥ अभियज्ञ॑ङ्गृणीहिनोग्नावोनेष्टः॑पिब॑ऽऋतुना॑ ॥ त्वꣳहि॑रत्नधाऽ
असि ॥ २१ ॥ द्रविणोदाः॑पिपीषति । जुहोतप्रच॑तिष्ठत ॥ नेष्ट्रादृतु
भि॑रिष्यत ॥ २२ ॥ तवायम् ॥ तवायꣳसोमस्त्वमेह्यर्वाङ्शश्व
त्तमꣳसुमना॑ऽअस्यपा॑हि ॥ अस्मिन्यज्ञेबर्हिष्यानिषद्या॑दधिष्वे
मञ्जठरऽइन्दु॑मिन्द्र ॥ २३ ॥ अमेव॑नः ॥ अमेव॑नःसुहवाऽआहिग
न्त॑न्नानिबर्हिषिसदतनारणि॑ष्टन ॥ अथा॑मन्दस्वजुजुषाणोऽअन्ध॑स
स्त्वष्ट॑र्देवेभिर्जनि॑भिःसुमद्ग॑णः ॥ २४ ॥ स्वादि॑ष्ठया ॥ स्वादि॑ष्ठया

म॒दि॑ष्ठया॒पव॑स्वसोम॒धार॑या ॥ इन्द्रा॑य॒पात॑वेसु॒तः ॥ २५ ॥ र॒क्षो॒हा
वि॒श्वच॑र्षणिर॒भियोनि॒मयो॑हते ॥ द्रोणे॑स॒धस्थ॒मास॑दत् ॥ २६ ॥
[११] ॥ २ ॥ इतिशुक्लयजुःसंहितायांषड्विंशतितमोऽध्यायः ॥२६॥
समास्त्वादशोर्द्ध्वाअस्यपीवोअन्नाद्द्वादशकावभित्त्वैकादशचत्वारःपं
चचत्त्वारिꣳशत् ॥ ॐसमास्त्वा ॥ समा॑स्त्वाग्नऽऋ॒तवो॑वर्द्धयन्तुसंव
त्स॒राऽऋष॑यो॒यानि॑स॒त्त्या ॥ सन्दि॒व्येन॑दीदिहिरो॒चने॑न॒विश्वा॒ऽआ
भा॑हि॒प्प्रदि॒श॒श्चत॑स्रः ॥ १ ॥ सञ्च॑ ॥ सञ्चे॒ध्यस्वा॑ग्ने॒प्प्रच॑बो॒धयै॒न॒मु॒च्च
तिष्ठमह॒तेसौभ॑गाय ॥ माच॑रिषदुपस॒त्तातेऽअग्ने॑ब्र॒ह्माण॑स्तेय॒शस॑ः स

संहि. न्तुमान्न्ये ॥ २ ॥ त्त्वामग्ग्ने ॥ त्त्वामग्ग्नेव्वृणतेब्ब्राह्मणाऽइमेशिवोऽअग्ग्ने
॥२१६॥ संव्वरणेभवानः ॥ सपत्त्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्ह्यप्प्र
युच्छन् ॥ ३ ॥ इहैव ॥ इहैवाग्ग्नेऽअधिधारयारयिम्मात्त्वानिक्कन्न्पू
र्व्वचितोनिकारिणः ॥ क्षत्त्रमग्ग्नेसुयममस्त्तुतुब्भ्यमुपसत्ताव्वर्द्धतान्तेऽ
अनिष्ट्टृतः ॥ ४ ॥ क्षत्त्रेणाग्ग्ने ॥ क्षत्त्रेणाग्ग्नेस्वायुःसꣳरभस्वमित्त्रेणा
ग्ग्नेमित्त्रधेयेयतस्व ॥ सजातानाम्मद्ध्यमस्त्थाऽएधिराज्ञामग्ग्नेव्विह
उ.अ. व्योदीदिहीह ॥ ५ ॥ अतिनिहः ॥ अतिनिहोऽअतिस्त्रिधोत्त्यचि
२७ मत्त्यरातिमग्ग्ने ॥ व्विश्श्वाह्ह्यग्ग्नेदुरितासहस्वाथास्म्मब्भ्यꣳसहवी

राꣳरयिन्दाः ॥ ६ ॥ अनाधृष्ष्योजातवेदाः ॥ अनाधृष्ष्योजातवेदाऽअनिष्टृतोव्विराडग्ग्नेक्षत्त्रभृद्दीदिहीह ॥ व्विश्श्वाऽआशाःप्प्रमुञ्चन्मानुषीर्ब्भियःशिवेभिरद्यपरिपाहिनोव्वृधे ॥ ७ ॥ बृहस्प्पतेसवितः ॥ बृहस्प्पतेसवितर्ब्बोधयैनꣳसꣳशितञ्चित्त्सन्तराꣳसꣳशिशाधि ॥ व्वर्द्धयैनम्महतेसौभगायव्विश्श्वेऽएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्त्रभूयादधं ॥ अमुत्त्रभूयादधयद्यमस्यबृहस्प्पतेऽअभिशस्त्तेरमुञ्चः ॥ प्रत्यौहतामश्श्विनामृत्त्युमस्म्माद्देवानामग्ग्नेभिषजाशचीभिः ॥ ९ ॥ उद्वयम् ॥ उद्वयन्तमसस्प्परिस्व÷पश्श्यन्तऽउत्तरम् ॥ देवन्देवत्त्रासू

संहि. र्य्यमगन्मज्ज्योतिरुत्तमम् ॥ १० ॥ [१०] ऊर्द्ध्वाऽअस्यसमिधोभव
॥२१७॥ न्त्यूर्द्ध्वाशुक्राशोचीᳪष्यग्नेः ॥ द्युमत्तमासुप्प्रतीकस्यसूनोः ॥ ११ ॥
तनूनपादसुरः ॥ तनूनपादसुरोविश्ववेदादेवोदेवेषुदेवः ॥ पथोऽअ
नक्तुमद्ध्वाघृतेन ॥ १२ ॥ मद्ध्वायज्ञम् ॥ मद्ध्वायज्ञन्नक्षसेप्प्रीणानोनरा
शᳪसोऽअग्ने ॥ सुकृद्देवःसविताविश्ववारः ॥ १३ ॥ अच्छायम् ॥
अच्छायमेति शवसाघृतेनेडानोवह्निर्नमसा ॥ अग्निᳪस्रुचोऽअ
उ.अ द्ध्वरेषुप्प्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानमग्नेःसऽईं
२७ म्मन्द्रासुप्प्रयसः ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥ १५ ॥ द्वारोदेवीः ॥

द्वारोदेवीरन्वस्यविश्वेव्रताददन्तेऽअग्नेः ॥ उरुव्यचसोधाम्म्नापत्त्य
मानाः॥ १६॥ शतम् १५०० ॥ तेऽअस्य ॥ तेऽअस्ययोषणेदिव्येनयो
नाऽउषासानक्ता ॥ इमंय्यज्ञमवतामद्ध्वरन्नः ॥ १७॥ दैव्याहोतारा।
ऽऊर्द्ध्वंमद्ध्वरन्नोऽग्नेर्ज्जिह्वामभिगृणीतम् ॥ कृणुतन्नꣳस्विष्टिम् ॥ १८ ॥
तिस्रोदेवीः ॥ तिस्रोदेवीर्ब्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ मही
गृणाना ॥ १९ ॥ तन्नः ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टासुवीर्य्यम् ॥
रायस्प्पोषंव्विष्ष्यतुनाभिमस्म्मे ॥ २० ॥ वनस्प्पतेवसृजारराण
स्त्मनादेवेषु ॥ अग्निर्हव्यꣳशमितासूदयाति ॥ २१ ॥ अग्नेस्वा

हां । कृणुहिजातवेदइऽन्द्रायहव्यम् ॥ व्विश्श्वेदेवाहविरिदञ्जुषन्ताम् ॥
॥ २२ ॥ [१२] पीवोऽअन्नारयिवृधः । सुमेधाःश्श्वेतःसिषक्ति
नियुतामभिश्श्रीः ॥ तेव्वायवेसमनसोव्वितस्त्थुर्व्विश्श्वेन्नरःस्वपत्त्या
निचक्क्रुः ॥२३॥ रायेनु । यञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधातिदे
वम् ॥ अधव्वायुन्नियुतःसश्श्चतस्वाऽउतश्श्वेतंव्वसुधितिन्निरेके ॥ २४ ॥
आपोह ॥ आपोहयद्बृहतीर्व्विश्श्वमायन्गर्भन्दधानाजनयन्तीरग्निम् ॥
ततोदेवानाꣳसमवर्त्ततासुरेकःकस्मैदेवायहविषाव्विधेम ॥ २५ ॥ य
श्चित् ॥ यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम् ॥

योदे॒वेष्वधि॑दे॒वऽएक॒ऽआसी॒त्कस्म्मै॑दे॒वाय॑ह॒विषा॑व्विधेम॥२६॥ प्रया
भिः॑ ॥ प्रया॒भि॒र्य्यासि॑दा॒श्श्वाꣳस॒मच्छा॑नि॒यु॒द्भिर्व्वा॑य॒वि॒ष्टये॑दु॒रो॒णे ॥
नि नो॑र॒यिꣳसु॒भोज॑सं॒य्युव॑स्व॒नि वी॒रङ्गव्य॒मश्श्व्यं॑ञ्च॒राधः॑ ॥ २७ ॥
आनः॑ ॥ आनो॑नि॒यु॒द्भिः॑श॒तिनी॑भिरध्व॒रꣳस॑ह॒स्त्रिणी॑भि॒रुप॑याहि य॒ज्ञ
म् ॥ व्वायो॑ऽअ॒स्म्मिन्त्सव॑नेमादयस्वयू॒यम्पा॑तस्व॒स्तिभि॒ꣳसदा॑नꣳ ॥
॥ २८ ॥ नि॒यु॒त्त्वा॑न्वायो ॥ नि॒यु॒त्त्वा॑न्वाय॒वाग॑ह्य॒यꣳशु॒क्रोऽअ॑या
मिते ॥ गन्ता॑सिसु॒न्व॒तोगृ॒हम् ॥ २९ ॥ व्वायो॑शु॒क्रः ॥ व्वायो॑शु॒क्रोऽ
अ॑यामि॒तेमद्ध्वो॒ऽअग्ग्र॒न्दिवि॑ष्टिषु ॥ आया॑हि॒सोम॑पी॒तये॒स्प्पा॒र्हो दे॑वनि॒

युत्वता ॥ ३० ॥ वायुरग्ग्रेगाः ॥ वायुरग्ग्रेगायज्ञप्रीःसाकङ्गन्मनं
सायज्ञम् ॥ शिवोनियुद्भिः शिवाभिः ॥ ३१ ॥ वायोये । तेसहस्त्रिणोरथा
सस्तेभिरागहि ॥ नियुत्त्वान्त्सोमपीतये ॥ ३२ ॥ एकयाच । दश
भिश्चस्वभूतेद्वाभ्यामिष्टयेविंशतीच ॥ तिसृभिश्चवहसेत्रिंश
ताचनियुद्भिर्वायविहताविमुञ्च ॥ ३३ ॥ तववायो ॥ तववायवृत
स्पतेत्त्वष्टुर्जामातरद्भुत ॥ अवांस्यावृणीमहे ॥ ३४ ॥ [१२] ॥ अभि
त्त्वा । शूरनोनुमोदुग्धाऽइवधेनवः ॥ ईशानमस्यजगतःस्वर्दृशमी
शानमिन्द्रतस्थुषः ॥ ३५ ॥ नत्त्वावान् ॥ नत्त्वावाँ २ अन्योदि

द्व्योनपार्थिवोनजातोनजंनिष्यते ॥ अश्वायन्तोमघवन्निन्द्रवा
जिनोगव्यन्तंस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवांमहे
सातौवाजंस्यकारवः ॥ त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्व
तꣳ ॥ ३७ ॥ सत्त्वम् ॥ सत्त्वन्नंश्चित्रवज्रहस्तधृष्णुयामहस्तंवा
नोऽअंद्रिवꣳ ॥ गामश्वꣳरथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्युषे ॥
॥३८॥ कयानꣳ ॥ कयानश्चित्रऽआभुवदूतीसदावृधꣳसखा ॥ कया
शचिष्ठयावृता ॥ ३९ ॥ कस्त्वां । सत्योमदानाम्मꣳहिष्ठोमत्सदन्ध
सꣳ ॥ दृढाचिदारुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणꣳसखीना

मवितार्जरितॄणाम् ॥ शतम्भवास्यूतये ॥ ४१ ॥ यज्ञायज्ञावः ॥ यज्ञा
यज्ञावोऽअग्नयेगिरागिराचदक्षसे ॥ प्रप्रवयममृतञ्जातवेदसम्प्रिय
म्मित्रन्नशꣳसिषम् ॥ ४२ ॥ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्यु
तद्वितीयया ॥ पाहिगीर्ब्भिस्तिसृभिरूर्ज्जाम्पतेपाहिचतसृभिर्व्वसो
॥ ४३ ॥ ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातꣳसहिनायमस्मयुर्दाशेम
हव्यदातये ॥ भुवद्वाजेष्ववितामुवद्वृधऽउतत्रातातनूनाम् ॥ ४४ ॥
संवत्सरोसि ॥ परिवत्सरोसीदावत्सरोसीद्वत्सरोसिवत्सरोसि ॥
उषसस्तेकल्पन्तामहोरात्रास्तेकल्पन्तामर्द्धमासास्तेकल्पन्ता

म्मासांस्त्तेकल्प्पन्तामृतवंस्त्तेकल्प्पन्ताꣳसंव्वत्त्सरस्त्तेकल्प्पताम् ॥
प्रेत्त्याऽएत्त्यैसञ्चाञ्चप्प्रचसारय ॥ सुपर्णञ्चिदसितयादेवतयाङ्गिरस्व
द्ध्रुवःसीद॥४५॥[११]इतिशुक्लयजुःसंहितायांसप्तविंशोऽध्यायः॥२७॥
होतायक्षदेकादशदेवंबर्हिर्द्दादशपुनरप्प्येवंचत्त्वारःषट्चत्त्वारिꣳशत् ॥
ॐ होतायक्षत्॥होतायक्षत्त्समिधेन्द्रमिडस्पदेनाभापृथिव्व्याऽअधि॥
दिवोव्वर्ष्मन्त्समिद्ध्यतऽओजिष्ठश्चर्षणीसहांव्वेत्त्वाज्ज्यस्यहोतर्य्यज
॥ १ ॥ होतायक्षत्तनूनपातमूतिभिः ॥ होतायक्षत्तनूनपातमूतिभिर्ज्जे
तारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्व्विदम्पथिभिर्म्मधुमत्तमैर्न्नराशꣳसे

न॒तेज॑सा॒व्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥२॥ होता॑यक्ष॒दि॒डा॑भि॒रिन्द्र॑म् ॥ होता॑
यक्ष॒दि॒डा॑भि॒रिन्द्र॑मीडि॒तमा॒जुह्वा॑न॒मम॑र्त्त्यम् ॥ दे॒वोदे॒वैःस॒वी॑र्य्यो॒व्वज्ज्र॑
हस्त॒ꣳपु॒र॒न्द॒रो॒व्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज ॥ ३ ॥ होता॑यक्षद्ब॒र्हिषीन्द्र॑म् ॥
होता॑यक्षद्ब॒र्हिषीन्द्र॑न्निषद्व॒रंवृ॑ष॒भन्नर्य्या॑पसम् ॥ व्वसु॑भीरु॒द्रैरा॑दि॒त्यैः
स॒युग्भि॒र्ब्ब॒र्हिरास॑द॒द्वेत्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥४॥ होता॑यक्ष॒दोजो॒नव्वी॒
र्य्यꣳसहो॒द्वार॒ऽइन्द्र॑मवर्द्धयन् ॥ सु॒प्प्रा॒य॒णाऽअ॒स्मिन्य॒ज्ञेव्विश्श्र॑यन्ता॒
मृ॒ता॒वृधो॒द्वार॒ऽइन्द्रा॑यमी॒ढु॒षे॒व्व्यन्त्वाज्ज्य॑स्य॒होत॒र्य्यज॑ ॥५॥ होता॑य
क्षदु॒षेऽइन्द्र॑स्य । धे॒नूसु॒दु॒घे॑मा॒तरा॑म॒ही ॥ स॒व॒ातरौ॒नतेज॑सा॒व्व॒त्समि

न्द्रंमवर्द्धतांव्वीतामाज्ज्यंस्युहोतुर्य्यजं ॥ ६ ॥ होतांयक्षुद्दैव्याहोतारा
भिषजासखांयाहुविषेन्द्रंम्भिषज्ज्यतꣳ ॥ कुवीदेवौप्प्रचेतसाविन्द्रांय
धत्तऽइन्द्रियंव्वीतामाज्ज्यंस्युहोतुर्य्यजं ॥७॥ होतांयक्षत्तिस्रोदेवीꣳ ॥
होतांयक्षत्तिस्रोदेवीर्न्नभेषजन्त्रयंस्त्रिधातंवोपसऽइडासरंस्वतीभार
तीमहीꣳ ॥ इन्द्रंपत्त्नीर्हविष्मतीर्व्यन्त्वाज्ज्यंस्युहोतुर्य्यजं ॥८॥ हो
तांयक्षत्त्वष्टांरमिन्द्रंम् ॥ होतांयक्षत्त्वष्टांरमिन्द्रन्देवम्भिषजꣳसुयज
ङ्घृतश्रियंम् ॥ पुरुरूपꣳसुरेतंसम्मघोनमिन्द्रांयत्त्वष्टादधदिन्द्रिया
णिव्वेत्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ९ ॥ होतांयक्षद्वनस्पतिꣳशमितारंम् ॥

होता॑षक्ष॒द्वन॒स्पति॑ꣳशमि॒तार॑ꣳश॒तक्र॑तु॒न्धियो॑जो॒ष्टार॑मिन्द्रि॒यम् ॥
मद्ध्वा॑सम॒ञ्जन्प॒थिभि॑÷सु॒गेभि॒ःस्वदा॑तिष॒ज्ञम्मधु॑नाघृ॒तेन॒वेत्त्वाज्ज्य॑
स्य॒होत॒र्षज॑ ॥ १० ॥ होता॑षक्ष॒दिन्द्र॒ꣳस्वाहा॑ ॥ होता॑षक्ष॒दिन्द्र॒ꣳ
स्वाहाज्ज्य॑स्य॒स्वाहा॒मेद॑स॒ꣳस्वाहा॑स्तो॒काना॒ꣳस्वाहा॒स्वाहा॑कृतीना॒
ꣳस्वाहा॑ह॒व्यसू॒क्तीना॑म् ॥ स्वाहा॑दे॒वाऽआज्ज्य॒पाजु॒षा॒णाऽइन्द्र॒ऽआ
ज्ज्य॑स्य॒व्य॒न्तु॒होत॒र्षज॑ ॥ ११ ॥ [११] दे॒वम्ब॒र्हिरिन्द्र॑ꣳसु॒दे॒वन्दे॒वै
र्वी॒रव॑त्स्ती॒र्णंवेद्या॑मवर्द्धयत् ॥ व॒स्तोर्वृ॒तम्प्राक्तो॑र्भृ॒तꣳरा॒याब॒र्हिष्म॒
तो॑ऽत्य॑गाद्वसु॒वनै॑व्वसु॒धेय॑स्यव्वेतु॒षज॑ ॥ १२ ॥ दे॒वीर्द्वार॑÷ ॥ दे॒वीर्द्वार॒ऽइन्द्र

ꣳसङ्घातेवीड्वीर्यामन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणꣳरेणुककाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्यन्तुयज ॥ १३ ॥ देवीऽउषासानक्ता ॥ देवीऽउषासानक्तेन्द्रंय्ँयज्ञेप्प्रयत्यह्वेताम् ॥ दैवीर्विशःप्प्रायासिष्टाꣳसुप्प्रीतेसुधितेव्वसुव्वनेव्वसुधेयस्यव्वीतांय्ँयज ॥१४॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधितीदेवमिन्द्रमवर्द्धताम् ॥ अयाव्यन्याघाद्वेषाꣳस्यान्यावक्षद्वसुव्वार्याणियजमानायशिक्षितेव्वसुवनेव्वसुधेयस्यव्वीतांय्ँयज ॥ १५ ॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम् ॥ इषमूर्ज्जमन्यावक्षत्सग्धिꣳसपीतिमन्या

नवेनपूर्व्वन्दयमानेपुराणेननवमधातामूर्जमूर्ज्जाहुतीऽऊर्ज्जयमानेवसु
वार्याणियजमानायशिक्षितेवसुवनेवसुधेयस्यवीतांयज ॥ १६ ॥
देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रमवर्द्धताम् ॥ हताघशꣳसा
वाभार्ष्टंवसुवार्याणियजमानायशिक्षितौवसुवनेवसुधेयस्यवीतांय
ज ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रम
वर्द्धयन् ॥ अस्पृक्षद्भारतीदिवꣳरुद्रैर्यज्ञꣳसरस्वतीडावसुमतीगृहा
न्वसुवनेवसुधेयस्यव्यन्तुयज ॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोन
राशꣳसस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रमवर्द्धयत् ॥ शतेनाशितिपृष्ठा

नामाहितꣳसहस्रेणप्प्रवर्त्ततेमित्त्रावरुणेदस्यहोत्त्रमर्हतोबृहस्प्पतिस्त्तो
त्रमश्श्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ १९ ॥ देवोदेवैः ॥ देवो
देवैर्व्वनस्प्पतिर्हिरण्ण्यपर्णोमधुशाखꣳसुपिप्पलोदेवमिन्द्रमवर्द्धयत्॥दि
वमग्ग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥
॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्ध
यत् ॥ स्वासस्त्थमिन्द्रेणासन्नमन्न्याबर्हीꣳष्यब्भ्यभूद्वसुवनेव्वसु
धेयस्यव्वेतुयज ॥ २१ ॥ देवोऽअग्निः ॥ देवोऽअग्निꣳस्विष्टकृद्देवमिन्द्र
मवर्द्धयत् ॥ स्विष्टङ्कुर्व्वन्त्स्विष्टकृत्स्विष्टमद्द्यकरोतुनोव्वसुवनेव्वसुधेय

संहि. स्यव्वेतु॒षज॑ ॥ २२ ॥ अ॒ग्निम॒द्य ॥ होता॑रमवृणीता॒यंठ्यज॑मा॒नुꣳप
॥२२४॥ च॒न्त्पक्तीᳲपच॑न्त्पु॒रो॒डाश॑म्ब॒द्ध्नन्निन्द्राय॒च्छाग॑म् ॥ सू॒प॒स्त्थाऽअ॒द्यद॒
वोव्वन॒स्प्पाति॑रभव॒दिन्द्रा॑य॒च्छागे॑न ॥ अघ॒तम्मे॑द॒स्तᳲप्प्राति॑पच॒ता
ग्ग्र॑भी॒दवी॑वृध॒त्त्पु॒रो॑डाशे॑न ॥ त्वाम॒द्यऽऋ॑षे ॥ २३ ॥ [१२] होता॑
षक्षत् ॥ होता॑षक्षत्त्स॒मिधा॒नम्म॒हद्यश॒ꣳसुस॑मिद्धं॒वरे॑ण्यम॒ग्निमिन्द्र॑म्
व्वयो॒धस॑म् ॥ गा॒य॒त्रीच्छन्द॑ऽइन्द्रि॒यन्त्र्य॒वि॒ङ्गां॑व्वयो॒दध॒द्वेत्त्वाज्ज्य॑स्य॒
शु.अ. होत॒ठ्य॑ज ॥२४॥ होता॑षक्ष॒त्तनू॒नपा॑तमु॒द्भिद॑म् ॥ होता॑षक्ष॒त्तनू॒नपा॑त
२८ मु॒द्भिद॒ठ्यङ्गर्भ॑म॒दि॑तिर्द॒धे शु॒चि॒मिन्द्र॑व्वयो॒धस॑म् ॥ उ॒ष्णिह॒ञ्छन्द॑ऽइ

न्द्रियन्दित्यवाहङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ २५ ॥ होता
यक्षदीडेन्यमीडितम् ॥ होतायक्षदीडेन्यमीडितंव्वृत्रहन्तमिडाभि
रीड्यꣳसहꣳसोममिन्द्रंव्वयोधसम् ॥ अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चा
विङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ २६ ॥ होतायक्षत्सुबर्हिष
म्पूषण्वन्तम् ॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्त्यꣳसीदन्तम्बर्हि
षिप्प्रियेमृतेन्द्रंव्वयोधसम् ॥ बृहतीच्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोद
धद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ २७ ॥ होतायक्षद्व्यचस्वतीꣳसुप्प्राय
णाऽ ॥ होतायक्षद्व्यचस्वतीꣳसुप्प्रायणाऽऋतावृधोद्द्वारोदेवीर्हिरण्ययी

ब्र॒ह्माण॒मिन्द्रं॒व्वयो॒धस॑म् ॥ प॒ङ्क्तिँछन्द॑ऽइ॒हेन्द्रि॒यन्त॒र्य्यं॑वाह॒ङ्गांव्वयो॒
दध॒द्द्वयन्त्वाज्ज्यं॑स्य॒होत॒र्य्यं॑जं ॥ २८ ॥ होता॑यक्षत्त्सु॒पेशं॑सासु॒शि
ल्पे । बृ॒ह॒तीऽउ॒भेनक्तोषासा॒नद॑र्श॒तेव्वि॒श्व॒मिन्द्रं॒व्वयो॒धस॑म् ॥ त्रि
ष्टु॒भ॒ँछन्द॑ऽइ॒हेन्द्रि॒यम्पंष्ठ॒वाह॒ङ्गांव्वयो॒दधं॒द्वी॒तामाज्ज्यं॑स्य॒होत॒र्य्यं॑ज ॥
॥ २९ ॥ होता॑यक्षत्प्रचे॑तसादे॒वाना॑मुत्त॒मंय्यशो॒होता॑रादैव्व्यां॑क॒वीस
य॒जेन्द्रं॒व्वयो॒धस॑म् ॥ जगं॑तीँछन्द॑ऽइन्द्रि॒यमं॑नड्वाह॒ङ्गांव्वयो॒दधं॒द्वी॒ता
माज्ज्यं॑स्य॒होत॒र्य्यं॑जं ॥ ३० ॥ होता॑यक्षत्पेशं॑स्वतीस्त्ति॒स्रः ॥ होता॑
यक्षत्पेशं॑स्वतीस्त्ति॒स्रोदे॒वीर्हि॑रण्ययी॒र्ब्भारं॑तीर्बृ॒ह॒तीर्म्म॒हीःप॒ति॒मिन्द्रं॑

व्वयोधसम् ॥ व्विराजुञ्छन्दंऽइहेन्द्रियन्धेनुङ्गान्नव्वयोदधुद्व्यन्त्वाज्ज्यंस्युहोतुर्य्यंजं ॥ ३१ ॥ होतांयक्षत्त्सुरेतंसुन्त्वष्टांरम् ॥ होतांयक्षत्त्सुरेतंसुन्त्वष्टांरंपुष्टिवर्द्धनꣳरूपाणिबिभ्रंतुम्पृथक्क्पुष्टिमिन्द्रंव्वयोधसम् ॥ द्विपदुञ्छन्दंऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधुद्वेत्त्वाज्ज्यंस्युहोतुर्य्यंजं ॥ ३२ ॥ होतांयक्षुद्वनुस्प्पातिंꣳशमितारम् ॥ होतांयक्षुद्वनुस्प्पतिंꣳशमितारंꣳशुतक्क्रंतुꣳहिरंण्यपर्णमुकित्त्थनंꣳरशुनाम्बिभ्रंतंव्वशिम्भगुमिन्द्रंव्वयोधसम् ॥ ककुभुञ्छन्दंऽइहेन्द्रियंव्वुशांव्वेहतङ्गांव्वयोदधुद्वेत्त्वाज्ज्यंस्यहोतुर्य्यंजं ॥ ३३ ॥ होतांयक्षुत्त्स्वाहांकृतीरुग्निम् ॥

होता॑यक्ष॒त्त्स्वाहा॑कृतीर॒ग्निङ्गृ॒हप॑तिम्पृथ॒ग्ग्वरु॑णम्भेष॒जङ्क॒विङ्क्ष॒त्रमिन्द्रं॑
व्व॒यो॒धस॑म् ॥ अति॑च्छन्दस॒ञ्छन्द॑ऽइन्द्रि॒यम्बृ॒हदृ॑ष॒भङ्गां॑व्व॒यो॒दध॒द्व्य
न्त्वाज्ज्यं॑स्य॒होत॒र्य्यज॑॥३४॥[११]दे॒वम्ब॒र्हिः॥ दे॒वम्ब॒र्हिर्व्वयो॒धसं॑न्दे॒
व॒मिन्द्र॑मवर्द्धयत् ॥ गा॒य॒त्र्याच्छन्द॑से॒न्द्रि॒यञ्चक्षु॒रिन्द्रे॒व्व॒यो॒दध॑द्व॒सु॒वने॑
व्व॒सु॒धेयं॑स्य व्वे॒तु॒यज ॥३५॥ दे॒वीर्द्वारः॑ ॥ दे॒वीर्द्वारो॑व्व॒यो॒धस॒ꣳशु॒चिमिन्द्र॑
मवर्द्धयन् ॥ उ॒ष्णिहा॒च्छन्द॑से॒न्द्रि॒यम्प्रा॒णमिन्द्रे॒व्व॒यो॒दध॑द्व॒सु॒वने॑व्व॒सु॒
धेयं॑स्य व्व्यन्तु॒यज॑ ॥ ३६ ॥ दे॒वीऽउ॒षासा॒नक्ता॑ । दे॒वमिन्द्रं॑व्व॒यो॒धसं॑
न्दे॒वीदे॒वम॑वर्द्धताम् ॥ अ॒नु॒ष्टु॒भाच्छन्द॑से॒न्द्रि॒यम्बल॒मिन्द्रे॒व्व॒यो॒दध॑द्

सुवनेव्वसुधेयस्यव्वीतांयज ॥ ३७ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रंव्वयोधसंन्देवीदेवमवर्द्धताम् ॥ बृहत्त्याच्छन्दसेन्द्रियꣳश्रोत्त्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांयज ॥ ३८ ॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंव्वयोधसंन्देवीदेवमवर्द्धताम् ॥ पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांऽयज ॥ ३९ ॥ देवादैव्या ॥ देवादैव्याहोतारादेवमिन्द्रंव्वयोधसंन्देवौदेवमवर्द्धताम् ॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्वषिमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांयज ॥ ४० ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयो

धसुम्पतिमिन्द्रमवर्द्धयन् ॥ जगत्त्याच्छन्दसेन्द्रियꣳशूषमिन्द्रेव्वयोद
धद्वसुवनेव्वसुधेयस्यव्व्यन्तुयज ॥४१॥ देवोनराशꣳसः॥ देवोनराशꣳसो
देवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ॥ व्विराजाच्छन्दसेन्द्रियꣳरूप
मिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ ४२ ॥ देवोव्वनस्पतिः ॥
देवोव्वनस्पतिर्द्देवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ॥ द्विपदाच्छन्द
सेन्द्रियम्भगमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ ४३ ॥ देव
म्बर्हिः ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रंव्वयोधसन्देवन्देवमवर्द्धयत् ॥
ककुभाच्छन्दसेन्द्रियय्यशऽइन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥

॥ ४४ ॥ दे॒वोऽअ॒ग्निः । स्वि॒ष्ट॒कृद्दे॒वमिन्द्रं॒व्वयो॒ध॑सन्दे॒वोदे॒वम॑वर्द्ध
यत् ॥ अति॑च्छन्द॒सा॒च्छन्दं॑सेन्द्रि॒यङ्क्ष॒त्रमिन्द्रे॒व्वयो॒दध॑द्व॒सु॒वने॑व्वसु
धे॒यं॑स्यव्वे॒तु॒यज॑ ॥ ४५ ॥ अ॒ग्निम॒द्य । होता॑रमवृणीता॒यँय्यज॑मानः॒
प॒च॒न्प॒क्तीः प॒च॑न्पु॒रो॒डाशं॑ब॒द्ध्नन्नि॒न्द्राय॒व्वयो॒ध॒से॒च्छाग॑म् ॥ सू॒प॒स्था
ऽअ॒द्यदे॒वोव्वन॒स्पति॑रभव॒दिन्द्रा॑य॒व्वयो॒ध॒से॒च्छागे॑न ॥ अघ॒त्तम्मे॑द॒स्तः॒
प्प्रति॑पच॒ताग्ग्र॑भी॒दवी॑वृधत्पु॒रो॒डाशे॑न ॥ त्वाम॒द्यऽऋ॑षे ॥४६॥ [१२]
॥ इति श्रीवाजसनेयशुक्लयजुःसंहितायामष्टाविंशोऽध्यायः ॥ २८ ॥
स॑मिद्धोअञ्जन्नेकादशयदक्रंदस्त्रयोदशसमिद्धोअद्यद्वादशकेतुंकृण्वं

संहि.
॥२२८॥

इचत्त्वारःषष्टिः॥ॐसमिद्धोऽअञ्जन्॥समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्नेमधुमत्त्पिन्वमानः ॥ व्वाजीव्वहन्न्वाजिनञ्जातवेदोदेवानांव्वक्षिप्प्रियमासधस्त्थम् ॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्वाज्ज्यप्प्येतुदेवान् ॥ अनुत्त्वासप्तेप्प्रदिशःसचन्ताꣳस्वधामस्म्मैयजमानायधेहि ॥ २ ॥ ईड्यश्च ॥ ईड्यश्चासिव्वन्द्यश्चव्वाजिन्नाशुश्चासिमेद्ध्यश्चसप्ते ॥ अग्निष्ट्वान्देवैर्व्वसुभिःसजोषाःप्प्रीतंव्वह्निंव्वहतुजातवेदाः ॥ ३ ॥ स्तीर्णम्बर्हिः ॥ सुष्टरीमाजुषाणोरुपृथुप्प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिःसजोषाःस्योनङ्कृ

उ.अ.
२९

ण्वानासुवितेदधातु ॥ ४ ॥ एताऽउवः । सुभगाविश्श्वरूपाविपक्षो
भिःश्रयमाणाऽउदातैः ॥ ऋष्वाःसतीःकवषःशुम्भमानाद्वारोदेवीः
सुप्प्रायणाभवन्तु ॥ ५ ॥ अन्तरामित्त्रावरुणा ॥ अन्तरामित्त्रावरुणा
चरन्तीमुखंय्यज्ञानामभिसंव्विदाने ॥ उषासावाꣳसुहिरण्ण्येसुशि
ल्पेऽऋतस्ययोनाविहसादयामि ॥ ६ ॥ प्रथमावाम् ॥ प्रथमावाꣳ
सरथिनासुवर्णादेवौपश्यन्तौभुवनानिविश्श्वा ॥ अपिप्प्रयञ्चोदना
वाम्मिमानाहोताराज्ज्योतिःप्प्रदिशादिशन्ता ॥७॥ आदित्त्यैर्न्नः ॥
आदित्त्यैर्न्नोभारतीवष्ट्टुयज्ञꣳसरस्वतीसहरुद्रैर्न्नऽआवीत् ॥ इडोपहू

३०

ताव्वसुभिःसजोषायज्ञन्नोदेवीरमृतेषुधत्त ॥ ८ ॥ त्वष्टांव्वीरम् ॥ त्व
ष्टांव्वीरन्देवकामञ्जजानत्त्वष्टुरर्व्वाजायतऽआशुरश्श्वः ॥ त्वष्टेदंव्विश्श्व
म्भुवनञ्जजानबहोःकर्त्तारमिहयक्षिहोतः ॥ ९ ॥ अश्श्वोघृतेनत्त्म
न्यासमक्तऽउपदेवाँऽऋतुशःपाथऽएतु ॥ व्वनस्पतिर्द्देवलोकम्प्र
जानन्नग्निनाहव्यास्वदितानिव्वक्षत् ॥ १० ॥ प्रजापतेस्तपसा । व्वा
वृधानःसद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृतेनहविषापुरोगायाहि
साद्ध्याहविरदन्तुदेवाः॥ ११ ॥[११] यदक्रन्दः। प्प्रथमञ्जायमानऽउद्य
न्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्म

हि॑जा॒तन्ते॑ऽअर्व्व॑न् १२॥ य॒मेनद॒त्तम्॥ य॒मेन॑द॒त्तन्त्रि॒तऽए॑नमायु॒नगिन्द्र॑
ऽए॒णम्प्र॒थ॒मोऽअद्ध्य॑तिष्ठत् ॥ ग॒न्ध॒र्व्वोऽअ॑स्यर॒शनाम॑गृभ्णा॒त्सूरा॒द
श्वं॑व॒स॒वो॒निर॑तष्ट ॥ १३ ॥ अ॒सि॒य॒मः ॥ अ॒सि॑य॒मोऽअस्या॑दि॒त्त्यो
ऽअर्व्व॑न्न॒सि॑त्रि॒तोगु॒ह्येन॑व्व्र॒तेन॑ ॥ अ॒सि॒सोमे॑नस॒मया॒विपृ॑क्तऽआहु॒स्ते
त्री॒णि॑दि॒विबन्ध॑नानि ॥ १४ ॥ त्रीणि॑ते ॥ त्रीणि॑तऽआहु॒र्दि॒विबन्ध॑ना
नि॒त्रीण्य॒प्सु॒त्रीण्य॒न्तः स॑मु॒द्रे ॥ उ॒तेव॑मे॒वरु॑णश्छन्त्स्यर्व्व॒न्यत्रा॑तऽआ
हुः प॑र॒मञ्ज॒नित्र॑म् ॥ १५ ॥ इ॒माते॑ । वा॒जिन्न॒व॒मार्ज्ज॑नानी॒माश॒फाना॑
ꣳस॒नि॒तुर्न्नि॒धाना॑ ॥ अत्रा॑तेभ॒द्रार॑श॒नाऽअ॑पश्यमृ॒तस्य॒याऽअ॑भि॒रक्ष

न्तिगोपाः ॥ १६ ॥ आत्मानंन्ते ॥ आत्मानंन्तेमनंसाराद्‌जा
नामवोदिवापतयन्तम्पतङ्गम् ॥ शिरोऽअपश्यम्पथिभिःसुगेभिररे
णुभिर्जेहमानम्पतत्रि ॥ १७ ॥ अत्रांते । रूपमुंत्तममंपश्यञ्जिगी
षमाणमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्ग्रसिष्ठऽओ
षधीरजीगः ॥ १८ ॥ अनुंत्त्वा ॥ अनुंत्त्वारथोऽअनुमर्य्योऽअर्वन्ननु
गावोनुभगःकनीनांम् ॥ अनुव्रातासस्तवंसक्ख्यमीयुरनुंदेवाममि
रेवीर्य्यन्ते ॥ १९ ॥ हिरंण्यशृङ्गोयः ॥ हिरंण्यशृङ्गोयोऽअस्यपा
दामनोजवाऽअवंरऽइन्द्रंऽआसीत् ॥ देवाऽइदंस्यहविरद्यंमायन्योऽअ

र्व॑न्तम्प्रथ॒मोऽअ॒द्ध्यति॑ष्ठ॒त् ॥ २० ॥ ई॒र्म्मान्ता॑स॒ꣳसिलि॑कमद्ध्य
मास॒ꣳ ॥ ई॒र्म्मान्ता॑स॒ꣳसिलि॑कमद्ध्यमास॒ꣳसꣳशूर॑णासो॒दि॒व्यासो॒ऽ
अत्त्या॑ः ॥ ह॒ꣳसाऽइ॑वश्श्रेणि॒शोय॑तन्ते॒यदाक्षि॑षुर्द्दि॒व्यमज्म्म॒मश्श्वा॑ः ॥
॥ २१ ॥ तव॒शरी॑रम् ॥ तव॒शरी॑रम्पतायि॒ष्ण्ण्व॒र्व॒न्तव॑चि॒त्त॑व्वात॑ऽइव॒ध्र
जी॑मान् ॥ तव॒शृङ्गा॑णि॒व्विष्ठि॑तापुरुत्त्रार॑ण्येषु॒जर्भुराणाचरन्ति ॥२२॥
उप॒प्प्र ॥ उप॒प्प्रागा॒च्छस॑नंव्वा॒ज्ज्यर्व्वा॑देव॒द्द्रीचा॒मन॑सा॒दीद्ध्या॑नꣳ ॥ अ॒
जःपु॒रोनी॑यते॒नाभि॑र॒स्यानु॑प॒श्चात्क॒वयो॑यन्ति॒रे॒भाः ॥ २३ ॥ उप॒
प्प्र ॥ उप॒प्प्रागा॑त्त्पर॒मं॑य्यत्तस॒धस्त्थ॒मर्व्वा॑ꣳऽअच्छा॑पि॒तर॑म्मा॒तर॑ञ्च ॥

अद्यादेवाञ्जुष्टतमोहिगम्म्याऽअथाशास्तेदाशुषेव्वार्याणि ॥ २४ ॥ [१३] समिद्धोऽअद्य । मनुषोदुरोणेदेवोदेवान्यजसिजातवेदः ॥ आचवहमित्रमहश्चिकित्वान्त्वन्दूतःकविरसिप्रचेताः ॥ २५ ॥ शतम् ॥ १६०० ॥ तनूनपात्त्पथः ॥ तनूनपात्त्पथऽऋतस्ययानान्मध्वासमञ्जन्त्स्वदयासुजिह्व ॥ मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्नः ॥ २६ ॥ नराशꣳसस्यमहिमानम् ॥ नराशꣳसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः ॥ येसुक्रतवःशुचयोधियन्धाः स्वदन्तिदेवाऽउभयानिहव्या ॥२७॥ आजुह्वानऽईड्यः ॥ आजुह्वानऽ

ईड्योवन्द्यश्चायाह्यग्नेव्वसुभिःसजोषाः ॥ त्त्वन्देवानामसियह्वहो
तासऽएनान्यक्षीषितोयजीयान् ॥ २८ ॥ प्राचीनम्बर्हिः । प्प्रदिशा
पृथिव्यावस्तोरस्यावृज्ज्यतेऽअग्ग्रेऽअह्नाम् ॥ व्युप्प्रथतेवितरंव्वरीयो
देवेब्भ्योऽअदितयेस्योनम् ॥ २९ ॥ व्यचस्वतीरुर्व्विया । विश्श्रय
न्ताम्पतिब्भ्योनजनयःशुम्भमानाः ॥ देवीर्द्वारोबृहतीर्व्विश्श्वमिन्वादे
वेब्भ्योभवतसुप्प्रायणाः ॥ ३० ॥ आसुष्ष्वयन्ती । यजतेऽउपाकेऽ
उषासानक्तासदतान्नियोनौ ॥ दिव्व्येयोषणेबृहतीसुरुक्मेऽअधिश्श्रि
यꣳशुक्रपिशन्दधाने ॥ ३१ ॥ दैव्व्याहोतारा । प्प्रथमासुवाचामिमा

नायुज्ञम्मनुंषोयजंद्ध्यै ॥ प्रचोदयंन्ताव्विदथैषुकारूप्प्राचीनुञ्ज्योतिं÷
प्प्रदिशांदिशन्तां ॥ ३२ ॥ आन÷ ॥ आनोंयुज्ञम्भारंतीतूयंमेत्त्वि
डांमनुष्ष्वदिहचेतयंन्ती ॥ तिस्रोदेवीर्ब्बर्हिरेदꣳस्योनꣳसरंस्वतीस्व
पंसऽंसदन्तु ॥ ३३ ॥ यऽइमे । द्यावांपृथिवीजनित्रीरूपैरपिंꣳशुद्भुव
नानिव्विश्वां ॥ तमुद्यहोतारिषितोयजीयान्देवन्त्वष्टारमिहयक्षिव्विद्वा
न् ॥ ३४ ॥ उपावंसृजुत्त्वमन्न्यां । समुञ्जन्देवानाम्पाथऽऋतुथाहुवी
ꣳषि ॥ व्वनस्प्पतिं÷शमितादेवोऽअग्निःस्वदन्तुहुव्यम्मधुनाघृतेनं ॥
॥३५॥ सुद्योजातः॥सुद्योजातोव्यमिमीतयुज्ञमुग्निर्देवानामभवत्पु

रोगाः ॥ अस्यहोतुःप्प्रदिश्यृतस्यव्वाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥ ॥ ३६ ॥ [१२] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ३७ ॥ जीमूतस्येवभवति ॥ जीमूतस्येवभवतिप्प्रतीकंयद्वर्म्मीयातिसमदामुपस्थे ॥ अनाविद्धयातन्वाजयत्वꣳसत्त्वाव्वर्म्मणोमहिमापिपर्त्तु ॥ ३८ ॥ धन्वनागाः ॥ धन्वनागाधन्वनाजिञ्जयेमधन्वनातीव्राःसमदोजयेम ॥ धनुःशत्त्रोरपकामङ्कृणोतिधन्वनासर्व्वाःप्प्रदिशोजयेम ॥ ३९ ॥ व्वक्ष्यन्तीवेत् ॥ व्वक्ष्यन्तीवेदागनीगन्तिकर्ण्णम्प्प्रियꣳसखायम्परिषस्वजाना ॥ योषेवशिङ्क्तेव्वितता

धिधन्वञ्ज्याऽइयᳫंसमनेपारयन्ती४०॥ तेऽआचरन्ती॥ तेऽआचरन्ती
समनेवयोषामातेवपुत्रम्बिभृतामुपस्थे॥ अपशत्रून्विध्यताᳫंसं
विदानेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान्॥४१॥ बह्वीनाम्पिता।
बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य॥ इषुधिःशङ्काःपृतनाश्च
सर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥ ४२ ॥ रथेतिष्ठन्॥ रथेतिष्ठन्नयति
वाजिनःपुरोयत्रयत्रकामयतेसुषारथिः॥ अभीशूनाम्महिमानम्पना
यतमनःपश्चादनुयच्छन्तिरश्मयः॥ ४३ ॥ तीव्रान्घोषान्॥ ती
व्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिःसहवाजयन्तः॥ अवक्रामं

न्तुःप्रपदैरुमित्राँक्षिणन्तिशत्रूँरनपव्ययन्तः ॥ ४४ ॥ रुथुवाह
णꣳहुविः ॥ रुथुवाहणꣳहुविरस्युनामुयत्रायुधुन्निहितमस्युवर्म्मं ॥ त
त्रारथमुपंशुग्मꣳसदेमाविश्वाहावुयꣳसुमनुस्यमानाः ॥ ४५ ॥ स्वा
दुषुꣳसदः÷पितरः÷ ॥ स्वादुषुꣳसदः÷पितरोवयोधाःकृच्छ्रेश्रितःशक्ती
वन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राःसतोवीराऽउरवोव्रातसा
हाः ॥ ४६ ॥ ब्राह्मणासुःपितरः ॥ ब्राह्मणासुःपितरुःसोम्म्यासः
शिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषानः÷पातुदुरितादृतावृधोरक्षामा
किर्नोऽअघशꣳसऽईशत ॥४७॥ सुपर्णंवस्ते । मृगोऽअस्यादन्तोगो

संहि. भिꣳसन्नद्धापततिप्प्रसू॑ता ॥ यत्त्रानरꣳसञ्चविचद्द्रव॑न्तितत्त्रास्म्मभ्यु
॥२३१॥ मिष॑वꣳशम्मँयꣳसन् ॥ ४८ ॥ ऋजी॑तेपरि॑ ॥ वृङ्ग्धिनोऽश्म्मा॑भवतन
स्तनूः ॥ सोमोऽअधि॑ब्ब्रवीतुनोऽदि॑तिꣳशम्मँयच्छतु ॥ ४९ ॥ आज॑ङ्घ
न्ति ॥ आज॑ङ्घन्तिसान्वे॑षाञ्जघनाꣳऽउप॑जिघ्नते ॥ अश्श्वा॑जनि
प्प्रचे॑तसोऽश्श्वा॑न्त्समत्त्सु॑चोदय ॥ ५० ॥ अहि॑रिवभोगैः॑पर्य्येतिबाहु
ञ्ज्याया॑हेति॑म्परि॑बाध॑मानः ॥ हस्त्तग्घ्नो॑विश्श्वा॑वयुना॑निविद्द्वान्प्पुमान्प्पु
उ. अ मा॑ꣳसम्परि॑पातुविश्श्वतः॑ ॥ ५१ ॥ वन॑स्प्पतेवीड्वङ्गः ॥ वन॑स्प्पतेवीड्व
२९ ङ्गोहिभूयाऽअस्म्मत्त्सखा॑प्प्रतर॑णꣳसुवीरः॑ ॥ गोभिꣳसन्नद्धोऽअसिवी

डयंस्वास्त्थातातेँजयतजेत्वानि ॥ ५२ ॥ दिवःपृथिव्याः ॥ दिवः
पृथिव्याःपर्य्योजऽउद्भृतंवनस्प्पतिभ्यःपर्य्याभृतꣳसहः ॥ अपामो
ज्ज्मानम्परिगोभिरावृतमिन्द्रस्यवज्ज्रꣳहविषारथंय्यज ॥ ५३ ॥ इ
न्द्रस्यवज्ज्रः ॥ इन्द्रस्यवज्ज्रोमरुतामनीकम्मित्त्रस्यगर्ब्भोव्वरुणस्य
नाभिः ॥ सेमान्नोहव्यदातिञ्जुषाणोदेवरथप्प्रतिहव्यागृभाय ॥५४॥
उपश्श्वासय । पृथिवीमुतद्याम्पुरुत्त्रातेमनुतांव्विष्ठितञ्जगत् ॥ सदु
न्दुभेसजूरिन्द्रेणदेवैर्दूराद्दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रन्दय ॥
आक्रन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रोथ

दुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिव्वीडयस्व ॥५६॥ आमूः ॥ आ
मूरजप्प्रत्त्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्व्वावदीति ॥ समश्श्वपर्णाश्श्चर
न्तिनोनरोस्म्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्नेयःकृष्ण्णग्ग्री
वः । सारस्वतीमेषिबभ्भ्रुःसौम्म्यःपौष्ण्णःश्यामःशितिपृष्ठोबार्हस्प
त्त्यः शिल्पोवैश्श्वदेवऽऐन्द्रोरुणोमारुतःकल्म्माषऽऐन्द्राग्नःसꣳहि
तोधोरामःसावित्त्रोव्वारुणःकृष्ण्णऽएकशितिपात्त्पेत्त्वः ॥ ५८ ॥ अ
ग्नयेनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावित्त्रौ
पौष्ण्णौरजतनाभीवैश्श्वदेवौ पिशङ्गौतूपरौमारुतःकल्म्माषऽआग्ने

य॒ः कृ॒ष्ण्णो॒ ज॒ः सा॑रस्व॒ती मे॒षी वा॑रु॒णः पेत्त्व॑ः ॥ ५९ ॥ अ॒ग्नये॑ गाय॒त्त्रा
य॑ । त्रि॒वृ॒ते रा॑थन्त॒राया॒ष्टाक॑पाल॒ऽइन्द्रा॑य॒ त्रैष्टु॑भाय॒ पञ्च॑दशाय॒ बार्ह॑ताय॒ै
का॑द॒शक॑पालो॒ वि॒श्श्वेब्भ्यो॑ दे॒वेब्भ्यो॒ जाग॑तेब्भ्यः स॒प्त॒द॒शेब्भ्यो॑ वै॒रू॒पे
ब्भ्यो॒ द्वाद॑शकपालो मि॒त्त्रावरु॑णाब्भ्या॒मानु॑ष्टुभाब्भ्यामेकवि॒ꣳशाब्भ्यां
वै॒रा॒जाब्भ्यां॑ पय॒स्या॒ बृह॒स्पत॑ये पा॒ङ्क्ता॑य त्रि॒ण॒वाय॑ शा॒क्व॒राय॑ च॒रुः सा॑वि॒त्त्र
ऽऔ॒ष्ण्णिहा॑य त्र॒यस्त्रि॒ꣳशाय॑ रैव॒ताय॒ द्वाद॑शकपालः प्राजाप॒त्त्यश्च॒रुर॒
दि॑त्त्यै॒ विष्ण्णु॑प॒त्त्न्यै च॒रुर॒ग्नये॑ वैश्श्वान॒राय॒ द्वाद॑शकपा॒लोनु॑मत्त्याऽ
अ॒ष्टाक॑पालः ॥ ६० ॥ [२४] ॥ ४ ॥ इति श्रीशुक्लयजुःसंहितापाठे एकोन

त्रिंशोऽध्यायः॥ २९ ॥ देवसवितःषट्तपसेकौलालꣳषोडशद्वौद्वाविꣳ
शातः॥ ओँ देवंसवितः॥ देवंसवितुःप्प्रसुंवयज्ञम्प्रसुंवयज्ञपंतिम्भगाय॥
दिव्योगंन्धर्व्वःकेतुपूःकेतंन्नःपुनातुव्वाचस्प्पतिर्व्वाचंन्नःस्वदतु ॥ १ ॥ त
त्संवितुः ॥ तत्संवितुर्व्वरेण्यम्भर्गोदेवस्यंधीमहि ॥ धियोयोनःप्प्र
चोदयांत् ॥ २ ॥ व्विश्वांनिदेव । सवितर्दुरितानिपरासुव ॥ यद्भद्रन्त
न्नऽआसुंव ॥३॥ व्विभक्तारꣳहवामहे ॥ व्विभक्तारꣳहवामहेव्वसोश्चित्र
स्यराधंसः ॥ सवितारंन्नृचक्षसम् ॥ ४ ॥ ब्रह्मंणेब्राह्मणम् ॥ ब्र
ह्मंणेब्राह्मणङ्क्षत्रायंराजन्यम्मरुद्भ्योव्वैश्यन्तपंसेशूद्रन्तमंसे तस्कं

रन्नारकायव्वीरहणम्पाप्मनेक्लीबमाक्रयायाऽअयोगूङ्कामायपुँश्चलूम
तिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गीतायशैलू
षन्धर्मायसभाचरन्नरिष्ठायैभीमलन्नर्मायरेभꣳहसाय कारिमान
न्दायस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्यायतक्षाणम् ॥
॥ ६ ॥ [६ ॥ तपसेकौलालम् ॥ तपसेकौलालम्मायायैकर्मारꣳरू
पायमणिकारꣳशुभेवपꣳशरव्यायाऽइषुकारꣳहेत्यै धनुष्कारङ्कर्मणे
ज्याकारन्दिष्टायरज्जुसर्जम्मृत्यवेमृगयुमन्तकायश्वनिनम् ॥ ७ ॥
नदीभ्यःपौञ्जिष्ठम् ॥ नदीभ्यःपौञ्जिष्ठमृक्षीकाभ्योनैषादम्पुरुष

व्याघ्रायंदुर्म्मदङ्गन्धर्वाप्सरोब्भ्योव्रात्त्यम्प्रयुग्भ्यऽउन्मत्तꣳ सर्प्पदे
वजनेब्भ्योप्प्रतिपदमयेब्भ्यः कितवमीर्य्यतायाऽअकितवम्पिशाचे
ब्भ्योबिदलकारीँय्यातुधानेब्भ्यःकण्टकीकारीम् ॥ ८ ॥ सन्धयेजा
रम् ॥ सन्धयेजारङ्गेहायोपपतिमार्त्त्यैपरिवित्तन्निर्ऋत्यैपरिविविदान
मराद्ध्याऽएदिधिषुःपतिन्निष्कृत्त्यैपेशस्कारीꣳसञ्ज्ञानाय स्मरका
रीम्प्रकामोद्यायोपसदंवर्णायानुरुधम्बलायोपदाम् ॥ ९ ॥ उत्त्सादे
ब्भ्यःकुब्जम् ॥ उत्त्सादेब्भ्यःकुब्जम्प्रमुदेवामनन्द्वाब्भ्यःस्स्रामꣳस्व
प्नायान्धमधर्म्मायबधिरम्पवित्त्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशि

क्षायैप्प्रश्निनमुपशिक्षायाऽअभिप्प्रश्निनम्मर्य्यादायैप्प्रश्नविवाकम् ॥ १० ॥ अर्म्मेब्भ्योहस्तिपम् ॥ अर्म्मेब्भ्योहस्तिपञ्जवायाश्श्वपम्पुष्ट्यैगोपालंव्वीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशङ्कीलालायसुराकारम्भद्रायगृहपꣳश्श्रेयसेवित्तधमाद्ध्यक्ष्यायानुक्षत्तारम् ॥ ११ ॥ भायैदार्व्वाहारम् ॥ भायैदार्व्वाहारम्प्रभायाऽअग्न्येधम्ब्ब्रध्नस्यंव्विष्टपायाभिषेक्तारंव्वर्षिष्ठायनाकायपरिवेष्टारन्देवलोकायपेशितारम्मनुष्यलोकायप्प्रकरितारꣳसर्व्वेब्भ्योलोकेब्भ्यऽउपसेक्तारमवऽऋत्यैव्वधायोपमन्थितारम्मेधायव्वासःपल्पूलीम्प्रकामायरजयित्री

म् ॥ १२ ॥ ऋतयैस्तेनहृदयम् ॥ ऋतयैस्तेनहृदयंवैरहत्यायपिशु
नंविविक्त्यैक्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्क
न्दम्प्रियायप्प्रियवादिनमरिष्ट्याऽअश्वसादꣳस्वर्ग्गायलोकायभा
गदुघंवर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्यवेयस्तापम् ॥ म
न्यवेयस्तापङ्क्रोधायनिसरꣳश्योगाययोक्तारꣳशोकायाभिसर्त्तारङ्क्षेमा
यविमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंवपुषेमानस्कृतꣳशीलायाञ्ज
नीकारीन्निर्ऋत्यैकोशकारीꣳयमायासूम् ॥ १४ ॥ यमाययमसूम् ॥
यमाययमसूमथर्व्वभ्योवतोकाꣳसंवत्सरायपर्य्यायिणीम्परिवत्सरा

याविंजातामिदावत्त्सरायातीत्त्वरीमिद्द्वत्त्सरायांतिष्क्कद्द्वरींव्वत्त्सराय
व्विजर्ज्जराꣳसँव्वत्त्सरायपलिक्क्नीमृभुब्भ्योजिनसन्धꣳसाद्ध्येब्भ्यं
श्चर्म्मम्म्नम् ॥ १५ ॥ सरोब्भ्योधैवरम् ॥ सरोब्भ्योधैवरमुपस्त्था
वराब्भ्योदाशंव्वैशन्ताब्भ्योबैन्दन्नड्वलाब्भ्यःशौष्क्कलम्पारायंमार्ग्गार
मंवारायंकैवर्त्तन्तीर्त्थेब्भ्यऽआन्दंव्विषमेब्भ्योमैनालꣳस्स्वनेब्भ्यःपर्ण्णं
कङ्गुहाब्भ्यःकिरातꣳसानुब्भ्योजम्भकम्पर्व्वतेब्भ्यःकिम्पूरुषम् ॥
॥ १६ ॥ बीभत्त्सायैपौल्क्कसम् ॥ बीभत्त्सायैपौल्क्कसंव्वर्ण्णायहिरण्य
कारन्तुलायैव्वाणिजम्पश्श्चादोषायंग्लाविनंव्विश्श्वेब्भ्योभूतेब्भ्यं÷

सि॒ध्म॒लम्भूत्यै॑जागर॒णमभू॑त्यैस्वप॒नमार्त्यै॑जनवा॒दिनं॒व्यृद्ध्याऽअप
ग॒ल्भꣳसंश॒राय॑प्र॒च्छिद॑म् ॥ १७ ॥ अक्ष॒रा॒जाय॑कित॒वम् ॥
अक्ष॒रा॒जाय॑कित॒वङ्कृ॒ताया॑दिनव॒दर्शन्त्रेता॑यैक॒ल्पिनन्द्वा॒परा॑याधिक॒
ल्पिनम्मास्क॒न्दा॑यसभास्था॒णुम्मृ॒त्यवे॑गोव्य॒च्छमन्त॑कायगोघा॒त
ङ्क्षु॒धेयोगांविकृ॒न्तन्त॒म्भिक्ष॑माणऽउप॒तिष्ठ॑तिदु॒ष्कृताय॒चर॑काचार्य्यं
म्पा॒प्मनैंसैल॒गम् ॥ १८ ॥ प्र॒ति॒श्रु॒त्का॑याऽअर्त॒नम् ॥ प्र॒ति॒श्रु
त्का॑याऽअर्त॒नङ्घोषा॑यभ॒षमन्ता॑यबहुवा॒दिन॑मन॒न्ताय॒मूक॒ꣳशब्दा॑या
डम्बराघा॒तम्मह॑सेवीणावा॒दङ्क्रोशा॑यतूण॒वध्मम॑वरस्प॒राय॑शङ्ख॒ध्मं

व्व॒नाय॑व्वन॒पम॒न्न्यतो॑रण्यायदा॒व॒पम् ॥१९॥ न॒र्म्माय॑पुँश्च॒लूम् ॥ न॒र्म्मा
य॑पुँश्च॒लूँ हसा॑यका॒रिं॑यादं॑सेशा॒बल्या॑ङ्ग्रा॒म॒ण्य॒ङ्ग॒णक॑म॒भि॒क्रो॒शंक॒
न्ता॒न्मह॑सेव्वी॒णा॒वा॒दम्पा॑णि॒ग्घ्नन्तू॑णव॒ध्मन्ता॒न्नृ॒त्ताया॑न॒न्दाय॑तल॒वम्
॥ २० ॥ अ॒ग्ग्नये॑पी॒वान॑म् ॥ अ॒ग्ग्नये॑पी॒वान॑म्पृथि॒व्यैपी॑ठस॒र्प्पिणं॑व्वा॒य
वे॑चाण्डा॒लम॒न्तरि॑क्षायव्वꣳश॒न॒र्त्तिन॑न्दि॒वेख॑ल॒तिꣳसूर्य्या॑यहर्य्य॒क्षन्न॒क्ष
त्रेभ्य॒ᳵकि॒र्म्मि॒रञ्च॒न्द्रम॑सेकि॒ला॒सम॒ह्ने॑शु॒क्लम्पि॒ङ्गा॒क्षꣳरात्र्यै॑कृ॒ष्ण्ण
म्पि॒ङ्गा॒क्षम् ॥ २१ ॥ अथै॒तान् ॥ अथै॒ताना॒ष्टौव्विरू॑पा॒नाल॑भ॒तेति॑
दी॒र्घञ्चाति॑ह्रस्व॒ञ्चाति॑स्त्थू॒लञ्चाति॑कृ॒शञ्चाति॑शु॒क्लञ्चाति॑कृ॒ष्ण्णञ्चाति॑

कुल्वश्चातिलोमशश्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राजापत्त्याः ॥ मा
गधःपुंश्चलीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्त्याः ॥ २२ ॥
[१६] इति श्रीशुक्लयजुस्संहितापाठे त्रिंशत्तमोऽध्यायः ॥ ३० ॥
सहस्रशीर्षाषोडशाद्यःसंभृतःषट्द्वौद्वाविꣳशतिः॥ ॐ सहस्रशीर्षापुरु
षः । सहस्राक्षःसहस्रपात् ॥ सभूमिꣳसर्व्वतस्पृत्वात्त्यतिष्ठद्दशाङ्गु
लम् ॥१॥ पुरुषऽएव ॥ पुरुषऽएवेदꣳसर्व्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उ
उ.अ तामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य । महिमा
३१ तोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दि

वि ॥ ३॥ त्रिपादूर्द्ध्वः ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषꣳपादोस्येहाभवत्पुनः ॥
ततोव्विष्वङ्व्यक्क्रामत्त्साशनानशनेऽअभि ॥४॥ ततोव्विराट् ॥ ततो
व्विराडजायतव्विराजोऽअधिपूरुषꣳ ॥ सजातोऽअत्त्यरिच्च्यतपश्श्चाद्भूमि
मथोपुरः ॥ ५ ॥ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्त्सर्व्वहुतꣳसम्भृतम्पृष
दाज्ज्यम् ॥ पशूँस्ताँश्चक्क्रेव्वायव्यानारण्याग्ग्राम्म्याश्च्चये ॥६॥ त
स्म्माद्यज्ञात् ॥ तस्म्माद्यज्ञात्त्सर्व्वहुतऽऋचꣳसामानिजज्ञिरे ॥ छन्दा
ꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्मादश्श्वाः ॥
तस्म्मादश्श्वाऽअजायन्तयेकेचोभयादतꣳ ॥ गावोहजजिरेतस्म्मा

तस्म्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम् ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्च्चये ॥ ९ ॥ यत्पुरुषम् ॥ यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्प्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्यते ॥ १० ॥ ब्राह्मणोस्य ॥ ब्राह्मणोस्स्यमुखमासीद्बाहूराजन्न्यःकृतः ॥ ऊरूतदस्स्ययद्वैश्श्यःपद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीत् ॥ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णो

द्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२ ऽअकल्पयन्
॥१३॥ यत्पुरुषेण । हविषादेवायज्ञमतन्वत ॥ वसन्तोऽस्यासीदा
ज्ज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥१४॥ सप्तास्यासन् ॥ सप्तास्यास
न्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पु
रुषम्पशुम्॥१५॥यज्ञेनयज्ञम् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्मा
णिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाध्याःस
न्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यःसम्भृतः । पृथिव्यैरसाच्चविश्श्वकर्म्म
णःसमवर्त्तताग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्व

मा॒जान॒मग्ग्रे॑ ॥१७॥ व्वेदा॒हम् ॥ व्वेदा॒हमे॒तम्पुरु॑षम्म॒हान्त॑मादि॒त्त्यव॑
ण्ण॒न्तम॑सः॒पु॒रस्ता॑त् ॥ तमे॒वव्वि॑दि॒त्त्वाति॑मृ॒त्त्युमे॑ति॒नान्यः॒पन्था॑व्वि॒द्य
ते॒ऽय॑नाय ॥१८॥ प्र॒जाप॑ति॒श्च्चर॑ति ॥ प्र॒जाप॑ति॒श्च्चर॑ति॒गर्ब्भे॑ऽअ॒न्तरजा॑
यमा॑नोबहु॒धाव्वि॒जा॑यते ॥ तस्य॒योनि॒म्परि॑पश्यन्ति॒धीरा॒स्त्तस्मि॑न्ह
त॒स्त्थु॒र्ब्भुव॑नानि॒व्विश्वा॑ ॥१९॥ योदे॒वेब्भ्यः॑ ॥ योदे॒वेब्भ्य॑ऽआ॒तप॑ति
योदे॒वाना॑म्पु॒रोहि॑तः ॥ पूर्व्वो॒योदे॒वेब्भ्यो॑जा॒तोनमो॑रु॒चाय॒ब्ब्राह्म॑ये ॥
॥२०॥रु॒चम्ब्रा॒ह्मम्॥रु॒चम्ब्रा॒ह्मञ्ज॒नय॑न्तोदे॒वाऽअग्ग्रे॒तद॑ब्ब्रुवन् ॥ य
स्त्त्वैवम्ब्रा॑ह्म॒णोव्वि॒द्यात्तस्य॑दे॒वाऽअ॑स॒न्वशे॑ ॥ २१ ॥ श्रीश्च ॥ श्रीश्च॑

तेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥
इष्णन्निषाणामुम्मऽइषाणसर्व्वंलोकम्मऽइषाण ॥ २२ ॥ [६] ॥२॥
इति श्रीशुक्लयजुःसंहितायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेवसप्तवेन
स्तन्नवद्वौषोडश ॥ ॐतदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्र
माः ॥ तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्रजापतिः ॥ १ ॥ सर्वेनिमे
षाः ॥ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नम
ध्येपरिजग्रभत् ॥ २ ॥ नतस्य । प्रतिमाऽअस्तियस्यनाममम
हद्यशः ॥ हिरण्यगर्भऽइत्येषमामाहिंसीदित्येषायस्मान्नजातऽइ

त्येषः ॥ ३ ॥ एषोह ॥ देवः प्प्रदिशोनुसर्व्वाः पूर्व्वोहजातः सऽउगर्भेऽअन्तः ॥ सऽएवजातः सजनिष्यमाणः प्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥ ४ ॥ यस्म्माज्जातम् ॥ यस्म्माज्जातन्नपुराकिञ्चनैवयऽआबभूवभुवनानिविश्वा ॥ प्रजापतिः प्रजयासꣳरराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्रापृथिवीचदृढायेनस्वस्तभितंयेननाकः ॥ योऽअन्तरिक्षेरजसोविमानःकस्मैदेवायहविषाविधेम ॥ ६ ॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यैक्षेतांमनसारेजमाने ॥ यत्राधिसूरऽउदितोविभातिकस्मैदेवायहविषाविधे

म ॥ आपोंहुयद्बृंहुतीर्य्याँश्चिुदापंः ॥७॥ [७] व्वेुनस्तत् ॥ व्वेुनस्त
त्पंश्युन्निाहिंतुङ्गुहासद्यत्त्रुव्विश्श्वुम्भवुत्येकंनीडम् ॥ तस्मिन्निदꣳसञ्चु
व्विचैंतिुसर्व्वꣳसऽओतुःप्प्रोतंश्च्वव्विुभूःप्प्रुजासुं ॥ ८ ॥ प्रतत् ॥ प्रतद्वों
चेदमृतन्नुव्विद्वान्नगंन्धुर्व्वोंधामुव्विभृंतुंगुहासत् ॥ त्रीणिपुदानिुनिाहिंतागु
हास्युयस्त्तानिुव्वेदुसपितुःपितासंत् ॥९॥ सनंः ॥ सनोबन्धुर्ज्जंनिुता
सव्विंधुाताधामांनिुव्वेदुभुवंनानिुव्विश्श्वा ॥ यत्रंदेुवाऽअमृतंमानशुानास्तृ
तीयेधामंन्नध्ध्यैरंयन्त ॥ १० ॥ पुरीत्यंभूतानिं । पुरीत्यंलुोकान्पुरी
त्युसर्व्वाःप्प्रुदिशुोदिशंश्च्व ॥ उुपुस्त्थायंप्प्रथमुजामृतस्स्यात्त्मनुा

त्मान॑म॒भिसंव्वि॑वेश ॥ ११ ॥ परि॒द्द्यावा॑पृथि॒वी । स॒द्यऽइ॒त्त्वापरि॑
लो॒कान्न्परि॒दिशः॒परि॒स्स्व॒÷ ॥ ऋ॒तस्य॒तन्तुं॒व्वित॑तंव्वि॒चृत्य॒तद॑पश्य॒त्त
द॑भव॒त्तदा॑सीत् ॥ १२ ॥ सद॑स॒स्पति॑म् ॥ सद॑स॒स्पति॒मद्भु॑तम्प्रि॒य
मिन्द्र॑स्य॒काम्म्य॑म् ॥ स॒निम्मे॒धाम॑यासिष॒ꣳस्वाहा॑ ॥ १३ ॥ याम्मे॒
धाम् ॥ याम्मे॒धान्दे॑वग॒णाःपि॒तर॑श्चो॒पास॑ते ॥ तया॒माम॒द्यमे॒धया॑ग्ने
मे॒धावि॑नङ्कु॒रु॒स्वाहा॑ ॥ १४ ॥ मे॒धाम्मे॑ ॥ मे॒धाम्मे॒व्वरु॑णोददातुमे॒धा
म॒ग्निःप्र॒जाप॑तिः ॥ मे॒धामिन्द्र॑श्चवा॒युश्च॑मे॒धान्धा॒ताद॑दातुमे॒स्स्वा
हा॑ ॥ १५ ॥ इ॒दम्मे॑ ॥ इ॒दम्मे॒ब्रह्म॑चक्ष॒त्रश्चो॒भेश्श्रिय॑मश्नु॒ताम् ॥

मयिंदेवादंधतुश्श्रियमुत्तमान्तस्स्यैंतुस्वाहा ॥ १६ ॥ [९] ॥ २ ॥
इति श्रीशुक्लयजुःसंहितायां द्वात्रिंशोऽध्यायः ॥३२॥ अस्याजरासः
सप्तदशापश्चिद्द्वादशविभ्राट्चतुर्द्दशप्रवावृजएकादशप्रवायुंप्रवीरया
पंचदशकावानस्त्रयोदशसप्तसप्तनवातिः ॥ ॐअुस्स्याजरांसः ॥ अु
स्स्याजरांसोदुमामुरित्राांऽअुर्च्चद्धूंमासोऽअुग्नयं÷पावुकाः ॥ श्विुती
चयं÷श्श्वात्रासौंभुरुण्यवोंव्वनुर्षदोंव्वायवुोनसोमाऽ ॥ १ ॥ हरंयोधूम
कैतवः ॥ हरंयोधूमकैतवोव्वातंजूताऽउपुद्द्यवि ॥ यतंन्तेवृथंगुग्नयं÷ ॥
॥ २ ॥ यजांनः ॥ यजांनोमित्त्रावरुंणायजांदेवाँऽऋतम्बृहत् ॥

अग्नेुयाक्षुस्स्वन्दंमम् ॥ ३ ॥ युुक्ष्वाहि । दैवुहूतमुांꣳऽअश्वाँ२ऽ
अग्नेरुथीरिंव ॥ निहोतांपूर्व्यःसंदः ॥ ४ ॥ द्वेविरूंपे । चरतुः
स्वर्त्थेंऽअुन्यान्यांवुत्समुपंधापयेते ॥ हरिंरुन्यस्युाम्भवंतिस्वुधावां
ञ्छुक्रोऽअुन्यस्यांन्ददृशेसुवर्च्चाः ॥५॥ शतम् १७०० ॥ अुयमुिह ।
प्प्रंथुमोधांयिधुातृभिुर्होतुायजिष्ठोऽअध्वरेष्वीड्च्यंः ॥ यमप्नंवानुोभृ
गंवोविरुुचुर्व्वनेषुचित्रंविुभ्वंविुशेविशे ॥ ६ ॥ त्रीणिशुता । त्रीसुह
स्राांण्युग्निन्त्रिंशच्चंदेुवानवंचासपर्य्यन् ॥ औक्षंन्घृतैरस्तृणन्बुर्हिर
स्म्माुऽआदिद्धोतारुन्न्युसादयन्त ॥७॥ मूर्द्धानंन्दिुवः ॥ मूर्द्धानंन्दिु

वो॒ऽअ॑रा॒तिम्पृ॑थि॒व्या वै॑श्वा॒नरमृतऽआजा॒तम॒ग्निम् ॥ क॒विꣳस॒म्म्रा
ज॒माति॑थि॒ञ्जना॑नामा॒सन्नापा॒त्र॑ञ्जनयन्तदे॒वाः ॥ ८ ॥ अ॒ग्निर्वृ॒त्राणि॑ ।
जङ्घ॑नद्द्रवि॒णस्य॒र्विप॒न्यया॑ ॥ समि॑द्धःशु॒क्रऽआहु॑तः ॥ ९ ॥ विश्वे॑भिः
सो॒म्म्यम् ॥ विश्वे॑भिःसो॒म्म्यम्मद्ध्वग्न॒ऽइन्द्रे॑णव्वा॒यु॒ना॑ ॥ पिबा॑मि॒त्र
स्य॒धाम॑भिः ॥ १० ॥ आय॑त् ॥ आयद्दि॒षेनृ॒पति॒न्तेज॒ऽआन॒ट्छुचि॒रे
तो॒निषि॑क्त॒न्द्यौर॒भीकै॑ ॥ अ॒ग्निःशर्द्ध॑मनव॒द्यंय्यु॒वा॑नꣳस्वा॒द्ध्य॒ञ्जनय
त्सू॒दय॑ञ्च ॥ ११ ॥ अग्ने॒शर्द्ध॑ । मह॒तेसौभ॑गायतव॑द्द्यु॒म्म्नान्यु॒त्तमा
नि॑सन्तु ॥ सञ्जा॑स्प॒त्त्यꣳसु॒यम॒माकृ॑णु॒ष्वशत्रू॒यता॒म॒भिति॑ष्ठामहा॑

ꣳसि ॥ १२ ॥ त्वाꣳहि । मुन्द्रतंममर्क्कशोकैर्व्वृमहेमहिनुꣳश्रोष्ष्य
ग्ने ॥ इन्द्रुन्नत्त्वुाशवंसादेुवतांव्वायुम्पृंणन्तिुराधंसुानृत्तंमाꣳ ॥ १३ ॥
त्त्वेऽअग्ग्नें । स्वाहुतप्प्रियासंःसन्तुसूरयंः ॥ षन्तारोुषेमुघवांनुोज
नांनामूर्व्वान्दयंन्तुगोनांम् ॥ १४ ॥ श्रुधिश्श्रुत्त्कर्ण्णं ॥ श्रुधिश्श्रुत्त्क
र्ण्णुव्वह्निंहभिर्द्देवैरग्ग्नेसुयावंभिः ॥ आसींदन्तुबर्हिषिमित्रोऽअंर्य्युमा
प्प्रांतुर्य्यावाणोऽअध्ध्वुरम् ॥ १५ ॥ व्विश्श्वेषामदितिः ॥ व्विश्श्वेषाम
दितिर्य्युज्ज्ञियांनांव्विश्श्वेषामतिथिर्म्मानुषाणाम् ॥ अुग्ग्निर्द्देवानामव
ऽआवृणानःसुमृडीकोभंवतुजातवेदाः ॥ १६ ॥ मुहोऽअुग्ग्नेः । सांमि

धानस्यशर्म्मण्यनागामित्रेव्वरुणेस्वस्तये ॥ श्रेष्ठंस्यामसवितुःसवीम
नितद्देवानामवोऽअद्याव्वृणीमहे ॥ १७ ॥ [१७] आपश्चित् ॥ आ
पश्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरितारस्तऽइन्द्र ॥ याहिव्वायुर्न्न
नियुतोनोऽअच्छात्वꣳहिधीभिर्द्दयसेव्विवाजान् ॥१८॥ गावऽउप ॥
गावऽउपावतावतम्महीयज्ञस्यरप्सुदा ॥ उभाकर्ण्णाहिरण्यया ॥
॥१९॥ यदद्य । सूरऽउदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसविता
भगः ॥ २० ॥ आसुतेसिञ्चतश्श्रियꣳरोदस्योरभिश्श्रियम् ॥ रसा
दधीतव्वृषभम् ॥ तम्प्रत्नथायंव्वेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आ

तिष्ठ॑न्त॒म्पारि॒व्विश्वे॑ऽअभू॒षञ्छ्रि॒यो॒व्वसा॑नश्चरति॒स्वरो॑चिः ॥ म॒हत्त
द्वृ॒ष्णो॑ऽअसु॑रस्य॒नामा॑व्विश्वरू॑पोऽअमृता॑नित॒स्त्थौ ॥ २२ ॥ प्र
वः॑ ॥ प्रवो॑म॒हेम॒न्द॑माना॒या॒न्धसोर्च्चा॑व्विश्वान॑राया॒व्विश्वा॒भुवे॑ ॥ इ
न्द्र॑स्य॒यस्य॒सुम॒खꣳसहो॒महि॒श्श्रवो॑नृ॒म्म्णञ्च॒रोद॑सीसप॒र्य्यतः॑ ॥२३॥
बृ॒हन्नित् ॥ बृ॒हन्नि॒दि॒ध्मऽए॑षा॒म्भूरि॑श॒स्तम्पृ॒थुस्स्वरुः॑ ॥ येषा॒मि
न्द्रो॒युवा॒सखा॑ ॥ २४ ॥ इन्द्रे॒हि ॥ इन्द्रे॒हि॒मत्स्यन्ध॑सो॒व्विश्वे॑
भिःसोम॒पर्व्व॑भिः ॥ म॒हाँऽअ॑भि॒ष्टिरोज॑सा ॥ २५ ॥ इन्द्रो॒वृत्रम् ॥
इन्द्रो॒वृत्रम॑वृणो॒च्छर्द्ध॑नीतिः॒प्रमा॒यिना॑मम्मिना॒द्वर्प्प॑णीतिः ॥ अह॒न्व्य

ꣳसमुशधुग्गवनैंष्ष्वाुविद्धैंनाऽअकृणोद्वाुम्म्याणाम् ॥ २६ ॥ कुतु
स्त्वम् ॥ कुतुस्त्वामिन्द्रुमाहिनुःसन्नेकौयासिसत्पतेकिन्तंऽइत्त्थास
म्पृंच्छसेसमराुणःशुंभाुनैव्वाुंचेस्तन्नोहरिवाुयत्तेऽअुस्म्मे ॥ मुहाँ२
ऽइन्द्रोयऽओजंसाकुंदाचुनस्तुरीरंसिकदाचुनप्प्रयुंच्छसि ॥२७॥ आ
तत्तंऽइन्द्रुायवं÷पनन्ताुभियऽऊुर्व्वंङ्गोमंन्तुन्तितृंत्सान् ॥ सुकृत्स्वुंख्ये
पुंरुपुत्रान्म्मुहीत्थंसुहस्त्रंधाराम्बृहुतीन्दुदुंक्षन् ॥२८॥ इमान्तें ॥ इमा
न्तुधियुम्प्रभरंमुहोमुहीमुस्यस्तोुत्त्रेधिषणुायत्तंऽआनुजे ॥ तमुंत्सुवे
चंप्प्रसुवेचंसासुहिमिन्द्रंन्दुेवासुःशवंसामदुन्ननुं ॥ २९ ॥ [१२] व्वि

संहि. ब्भ्राड्बृहत् ॥ विब्भ्राड्बृहत्पिबतुसोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविह्रुत
॥२४८॥ म् ॥ वातजूतोयोऽअभिरक्षतित्त्मनाप्प्रजाःपुपोषपुरुधाविराजति ॥
॥ ३० ॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेवि
श्श्वायसूर्य्यम् ॥ ३१ ॥ येनापावक ॥ येनापावकचक्षसाभुरण्यन्त
ञ्जनाँ२अनु ॥ त्वंव्वरुणपश्श्यसि ॥ ३२ ॥ दैव्व्यावद्ध्वर्य्यूऽआगतꣳरथे
नसूर्य्यत्त्वचा ॥ मद्ध्वायज्ञꣳसमञ्जाथे ॥ तम्प्रत्त्नथायंव्वेनश्चित्रन्देवा
उ.अ. नाम् ॥ ३३ ॥ आनः ॥ आनऽइडाभिर्व्विदथेसुशस्तिव्विश्श्वानरःसवि
३३ तादेवऽएतु ॥ अपियथायुवानोमत्त्सथानोव्विश्श्वञ्जगदभिपित्त्वेमनी

षा ॥ ३४ ॥ यद॒द्य ॥ कच्च॑वृत्रहन्न॒दगा॑ऽअ॒भिसू॑र्य्य ॥ सर्व्व॒न्तदि॑न्द्रते॒
वशे॑ ॥ ३५ ॥ त॒रणि॑र्व्वि॒श्वद॑र्शतः ॥ त॒रणि॑र्व्वि॒श्वद॑र्शतोज्ज्योति॒ष्कृद॑
सिसूर्य्य ॥ विश्व॒माभा॑सिरोच॒नम् ॥ ३६ ॥ तत्सूर्य्य॑स्य । देव॒त्वन्त
न्म॑हि॒त्वम्म॒ध्याकर्त्तो॒र्व्वित॑त॒ꣳसञ्ज॑भार ॥ य॒देदयु॑क्तह॒रितः॑स॒धस्त्था॒
दाद्रात्री॒वास॑स्तनुते॒सि॒मस्मै॑॥३७॥ तन्मि॒त्त्रस्य॑ ॥ तन्मि॒त्त्रस्य॒व्वरु॑ण
स्याभि॒चक्षे॒सूर्य्यो॑रू॒पङ्कृ॑णुते॒द्द्योरु॒पस्थे॑ ॥ अ॒न॒न्तम॒न्यद्रु॒श॑दस्य॒पाजः॑
कृ॒ष्णम॒न्यद्ध॒रित॒ꣳसम्भ॑रन्ति ॥३८॥ बण्म॒हान् ॥ बण्म॒हा२अ॑सि
सूर्य्य॒बडा॑दित्त्यम॒हाँ२ऽअ॑सि ॥ म॒हस्ते॑स॒तोम॑हि॒माप॑नस्यत॒द्धादे॑व

महाँ२ऽअसि ॥ ३९ ॥ बट्सूर्य्य श्रवसामहाँ२ऽअसिसत्रादेवमहाँ२ऽअ
सि ॥ मह्नादेवानामसुर्य्यः पुरोहितोविभुज्ज्योतिरदाभ्यम् ॥४०॥
श्रायन्तऽइवसूर्य्यम् ॥ श्रायन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसू
निजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ॥ ४१ ॥ अद्यादेवाः॥
अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृतानिरवद्यात् ॥ तन्नोमित्रो
वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ॥ ४२ ॥ आकृ
ष्णेन ॥ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हि
रण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ [१४] प्र

उ.अ.
३३

वां॑वृ॒जे ॥ सु॒प्प्र॒याब॒र्हिरे॑षा॒मावि॒श्प्पती॑व॒वीरि॑टऽइयाते ॥ वि॒शाम॒क्तो
रु॒षस॑÷पू॒र्वहू॑तौवा॒युःपू॒षास्व॒स्तये॑नि॒युत्वा॑न् ॥ ४४ ॥ इन्द्र॒वा॒यूबृह॒
स्प्पति॑म् ॥ इन्द्र॒वा॒यूबृह॒स्प्पति॑म्मि॒त्राग्निम्पू॒षण॒म्भग॑म् ॥ आ॒दि॒त्त्या
न्मारु॑तङ्ग॒णम् ॥ ४५ ॥ वरु॑णःप्प्रावि॒ता । भु॑वन्मि॒त्रोवि॒श्श्वा॑भिरू॒
ति॒भि॑÷ ॥ कर॑तान्नःसु॒राध॑सः ॥ ४६ ॥ अधि॑नः ॥ अधि॑नऽइन्द्रै॒षाँवि॒
ष्णौसजा॒त्त्या॒नाम् ॥ इ॒तामरु॑तो॒ऽअश्श्विना ॥ तम्प्र॒त्नथा॒यं॑वे॒नोये
दे॑वास॒ऽआन॒ऽइडा॑भि॒र्वि॑श्श्वैभिःसो॒म्म्यम्म॒द्ध्वोमा॑ंसश्चर्षणी॒धृत॑ः।४७॥
अग्न॒ऽइन्द्र॒ । वरु॑ण॒मित्र॒देवा॒ःशर्द्ध॒ःप्प्रय॑न्तु॒मारु॑तो॒तवि॑ष्णो ॥ उ॒भा

नासंत्त्यारुद्द्रोऽअधुग्ग्नाःपूषाभगुःसरंस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्ग्नी
मित्त्रावरुणा । दितिꣳस्वः पृथिवीन्द्यामुरुतःपर्व्वताँ२ऽअपः ॥ हुवे
विष्ण्णुम्पूषणम्ब्रह्मणुस्पतिम्भगन्नुशꣳसंꣳसवितारमूतये ॥ ४९ ॥
अस्म्मेरुद्द्राः ॥ अस्म्मेरुद्द्रामेहनापर्व्वतासोवृत्त्रहत्त्येभरंहूतौसुजोषाः ॥
यःशꣳसंतस्तुवतधायिपुज्ज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्माँ२ऽअंवन्तुदेवाः ॥
॥ ५० ॥ अर्व्वाञ्चोऽअद्य ॥ अर्व्वाञ्चोऽअद्याभंवतायजत्त्राऽआवो
हार्द्दिभयंमानोव्व्ययेयम् ॥ त्राद्ध्वन्नोदेवानिजुरोवृकंस्युत्त्राद्ध्वङ्कर्त्तादवप
दोयजत्त्राः ॥ ५१ ॥ विश्श्वेऽअद्य । मरुतोविश्श्वऽऊतीविश्श्वेभवन्त्व

ग्नयःसमिद्धाः ॥ व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्वमस्त्तुद्रविणं
व्वाजोऽअस्म्मे ॥ ५२ ॥ व्विश्श्वेदेवाः । शृणुतेमꣳहवम्मेयेऽअन्तरि
क्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्त्राऽआसद्यास्म्मिन्बर्हि
षिमादयद्ध्वम् ॥ ५३ ॥ देवेब्भ्योहि । प्प्रथमंय्यज्ञियेब्भ्योमृतत्व
ꣳसुवसिभागमुत्तमम् ॥ आदिद्दामानꣳसवितर्व्यूर्णुषेनूच्चीनाजीवि
तामानुषेब्भ्यः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवायुमच्छाबृहतीमं
नीषाबृहद्रयिंव्विश्श्ववारꣳरथप्प्राम् ॥ द्युतद्यामानियुतःपत्त्यमानᳵकु
विᳵकविमियक्षसिप्प्रयज्ज्यो ॥ ५५ ॥ इन्द्रवायूऽइमे । सुताऽउप

प्रयोभिरागतम् ॥ इन्दंवोवामुशन्तिहि ॥ ५६ ॥ मित्रꣳहुवे । पूतदक्षंवरुणञ्चारिशादसम् ॥ धियंघृताचीꣳसाधन्ता ॥ ५७ ॥ दस्रायुवाकवःसुतानासत्त्यावृक्तबर्हिषः ॥ आयातꣳरुद्रवर्त्तनी ॥ तम्प्रत्नथायंवेनः ॥ ५८ ॥ विदद्यादि ॥ विदद्यदीसरमारुग्णमद्रेर्महिपाथःपूर्व्यꣳसध्र्यक्कः ॥ अग्रंनयत्सुपद्यक्षराणामच्छारवम्प्रथमाजानतीगात् ॥ ५९ ॥ नहिस्पशम् ॥ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यंवैश्वानरꣳक्षैत्रजित्त्यायदेवाः ॥ ६० ॥ उग्राविघनिना ॥ उग्राविघनिनामृधऽ

इन्द्राग्नीहवामहे ॥ तानोमृडातऽईदृशे ॥ ६१ ॥ उपास्मैगायतान
रःपवमानायेन्दवे ॥ अभिदेवाँऽइयक्षते ॥ ६२ ॥ येत्त्वा । हिह
त्त्यैमघवन्नवर्द्धन्येशाम्बरेहरिवोयेगविष्टौ ॥ येत्त्वानूनमनुमदन्तिवि
प्राःपिबेन्द्रसोमꣳसगणोमरुद्भिः ॥ ६३ ॥ जनिष्ठाऽउग्रः । सहसेतु
रायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अवर्द्धन्निन्द्रम्मरुतश्चिदत्रमा
तायद्वीरन्दधनद्धनिष्ठा ॥ ६४ ॥ आतू ॥ आतूनऽइन्द्रवृत्रहन्नस्माक
मर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्र
प्रतूर्तिष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविश्वतूर

सित्त्वन्तूंर्ठ्यंतरुꣳष्युतः ॥ ६६ ॥ अनुंते ॥ अनुंतेशुष्मंन्तुरयंन्तमी
यतुꣳक्षोणीशिशुन्नमातरां ॥ विश्वांस्तेस्पृधंःꣳश्नथयन्तमुन्यवेंवृत्रं
ठ्यदिन्द्रतूर्व्वांसि ॥ ६७ ॥ युज्ञोदेवानांम् ॥ युज्ञोदेवानाम्प्रत्त्यैतिसु
म्नमादित्त्यासोभवंतामृडयन्तंः ॥ आवोर्व्वाचीसुमतिर्व्ववृत्त्याद्ꣳहो
श्चिद्याव्वरिवोवित्तरासंत् ॥ ६८ ॥ अदंब्धेभिःसवितः । पायुभिष्ट्व
ꣳशिवेभिरद्यपरिंपाहिनोगयंम् ॥ हिरंण्यजिह्वꣳसुवितायनव्यंसेरक्षा
माकिर्न्नोऽअघशꣳसऽईशत ॥ ६९ ॥ [१५] प्रवीरया । शुचंयोदद्रिरे
वामध्वर्युभिर्म्मधुमन्तꣳसुतासंः ॥ वहवायोनियुतोयाह्यच्छापिबा

सु॒तस्यान्ध॑सो॒मदा॑य ॥ ७० ॥ गाव॒ऽउप॑ । गाव॒ऽउपा॑वताव॒तम्म॒ही
य॒ज्ञस्य॑र॒प्सुदा॑ ॥ उ॒भाकर्णा॑हिर॒ण्यया॑ ॥७१॥ का॒व्यंयो॑रा॒जाने॑षु ॥
का॒व्यंयो॑रा॒जाने॑षु॒क्रत्त्वा॒दक्ष॑स्यदु॒रोणे॑ ॥ रि॒शाद॑सासध॒स्त्थ॒ऽआ ॥
॥७२॥ दैव्या॑वद्ध्व॒र्यू ॥ दैव्या॑वद्ध्व॒र्यू॒ऽआग॑तु॒ꣳरथे॑नसू॒र्य॑त्त्वचा ॥ म
द्ध्वा॑य॒ज्ञꣳसम॑ञ्ञाथे ॥ तम्प्र॒त्क्नथा॒यंवे॒नः ॥ ७३ ॥ ति॒र॒श्चीनो॒वित॑
तꣳ ॥ ति॒र॒श्चीनो॒वित॑तोर॒श्मिरे॑षाम॒धः॑स्वि॑दा॒सी ३ दु॒परि॑स्विदासी
३ त् ॥ रे॒तो॒धाऽआ॑सन्म॒हि॒मान॑ऽआसन्त्स्व॒धाऽअ॒वस्ता॒त्प्रय॑तिꣳप॒
रस्ता॑त् ॥ ७४ ॥ आरो॑द॑सीऽअपृणदा॒स्व॑र्म्म॒हज्जा॒तंयदे॑नम॒पसो॒ऽ

अधा॑रयन् ॥ सोऽअं॑हुरायपरि॑णीयतेकविरत्त्योनवाज॑सातयेचनो॑हि
तः ॥ ७५ ॥ उक्थेभि॑र्वृत्रहन्त॑मा ॥ उक्थेभि॑र्वृत्रहन्त॑मायाम॑न्दानाचि
दागिरा ॥ आङ्गूषैराविवा॑सतः ॥ ७६ ॥ उप॑नः ॥ सूनवोगिर॑ःशृण्व
न्त्वमृत॑स्यये ॥ सुमृडीकाभ॑वन्तुनः ॥ ७७ ॥ ब्रह्मा॑णिमे । मतयः
शꣳसुतासुःशुष्म॑ऽइयार्त्तिप्रभृ॑तोमेऽअद्रिः ॥ आशा॑सतेप्रति॑हर्य्य
न्त्युक्थमाहरी॑विहतस्तानोऽअच्छ॑ ॥ ७८ ॥ अनु॑त्तमाते । मघवन्न
किर्नुनत्वावाँ॑ऽअस्तिदेवताविदा॑नः ॥ नजाय॑मानोनश॑तेनजातो
यानि॑करिष्याकृणुहिप्र॑वृद्ध ॥ ७९ ॥ तादित् ॥ तदिदा॑सभुव॑नेषुज्ज्ये

ह॒ँव्यतोय॒ज्ञऽउ॒ग्रस्त्वे॒षनृंम्म्णꣳ ॥ स॒द्योजंज्ञा॒नोनिरिंणाति॒शत्रू॒ननु॒यं
व्विश्श्वे॒मद॒न्त्यूमाꣳ ॥ ८० ॥ इ॒माऽउंत्त्वा । पु॒रूवसो॒गिरोंव्वर्द्धन्तु॒या
ममं ॥ पा॒व॒कवंर्णा॒ꣳशुचंयो॒व्विपा॒श्चितो॒भिस्तोमैंरनूषत ॥ ८१ ॥ यस्या॒
यम् ॥ यस्या॒यंव्विश्श्व॒ऽआर्य्यो॒यासं÷शेवा॒धि॒पाऽअ॒रिः ॥ ति॒रश्चि॒द॒
र्य्येरु॒शमे॒पवीरा॒वितु॒भ्येत्त्सो॒ऽअंज्ज्यते॒र॒यिꣳ ॥ ८२ ॥ अ॒यꣳस॒हस्र॒
म् ॥ अ॒यꣳस॒हस्र॒मृषि॑भि॒ꣳसहंस्कृतꣳसमु॒द्रऽइ॑वपप्प्रथे ॥ स॒त्त्यꣳसोऽ
अंस्यमहि॒मागृंणे॒शवो॑य॒ज्ञेषुं॒व्विप्प्र॒राज्ज्ये ॥ ८३ ॥ अदंब्धेभि॒ꣳसवि॒
तꣳ । पायु॒भि॒ष्ट्वꣳशि॒वेभि॑र॒द्यपरिं॑पाहि॒नो॒गयंम् ॥ हिरंण्यजिह्वꣳसुवि॒

तायुनव्यंसेरक्षुमाकिंन्नोऽअघशंᳪसऽईशत ॥८४॥ [१५ ॥ आनं÷ ॥
॥२८४॥ आनोयुज्ञान्दिवुस्पृशंव्वायोयाहिसुमन्मांभिः ॥ अन्तःपुवित्रंऽउपारि
ᳪश्रीणानुोयर्ᳪशुक्रोऽअंयामिते ॥ ८५ ॥ इन्द्रुवायूसुंसुन्दृशा । सुहु
वुेहहंवामहे ॥ यथांनुःसर्व्वुऽइज्जनोनमीुवःसुङ्गमेसुमनाुऽअसंत्॥८६॥
ऋधंगित्त्था । समत्त्यँ÷शशुमेदुेवतांतये ॥ योनूनम्मुित्रावरुंणावुभि
ष्टंयऽआचुक्रेहुव्यदांतये ॥ ८७ ॥ आयांतम् ॥ आयांतुमुपंभूषतुम्म
उ.अ. द्धं÷पिबतमाश्विना ॥ दुग्धम्पयोव्वृषणाजेन्न्यावसूमानोंमार्द्धिष्टमागं
३३ तम् ॥ ८८ ॥ प्रैतुं ॥ प्रैतुब्ब्रह्मंणस्पतिःप्प्रदेुव्येतुसूनृतां ॥ अच्छांव्वी

रन्नष्ठर्यँम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनः ॥ ८९ ॥ चन्द्रमाऽअप्सु ॥
चन्द्रमाऽअप्स्वन्तरासुपण्णोधावतेदिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरु
स्पृहꣳहरिरेतिकनिक्रदत् ॥ ९० ॥ देवन्देवंव्वः ॥ देवन्देवंव्वोवसेदेव
न्देवमभिष्टये ॥ देवन्देवꣳहुवेमव्वाजसातयेगृणन्तोदेव्याधिया ॥ ९१ ॥
दिविपृष्टः ॥ दिविपृष्टोऽअरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयावृ
धानऽओजसाचनोहितोज्ज्योतिषाबाधतेतमः ॥ ९२ ॥ इन्द्राग्नीऽ
अपात् ॥ इन्द्राग्नीऽअपादियम्पूर्व्वागात्पद्वतीभ्यः ॥ हित्वीशिरोजि
ह्वयावावदच्चरत्त्रिꣳशत्पदान्यक्रमीत् ॥ ९३ ॥ देवासोहिष्मा । मनवेस

मन्यवोविश्श्वेसाकꣳसरातयः॥ तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुव
रिवोविदः॥ ९४ ॥ अपाधमत् ॥ अपाधमदभिशस्तीरशस्तिहाथे
न्द्रोद्द्युम्म्न्याभवत् ॥ देवास्त्तऽइन्द्रसक्ख्याययेमिरेबृहद्भानोमरुद्गण
॥ ९५ ॥ प्रवः ॥ प्रवऽइन्द्रायबृहतेमरुतोब्ब्रह्मार्च्चत ॥ वृत्रꣳहनतिवृ
त्रहाशतक्क्रतुर्व्वज्ज्रेणशतपर्व्वणा ॥ ९६ ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳ
शवोमदेसुतस्यविष्ण्णवि ॥ अद्यातमस्यमहिमानमायवोनुष्टुवन्तिपू
र्व्वथा ॥ इमाऽउत्त्वायस्यायमुयꣳसहस्रमूर्द्ध्वऽऊषुणः ॥ ९७ ॥ [१३]
इति श्रीशुक्लयजुःसंहितापाठे त्रयस्त्रिंशोऽध्यायः ॥ ३३॥ यज्जाग्रतःप

श्चनद्यःसोमोधेनुमाकृष्ण्णेनपूषंतवद्दशकानतदष्टौषडष्टापञ्चाशत् ॥
ॐयज्जाग्ग्रतः॥यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्ग
मञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसङ्कल्पमस्तु ॥१॥ येनकर्म्मा
णि ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ य
दपूर्व्वंयक्षमन्तःप्रजानान्तन्मेमनःशिवसङ्कल्पमस्तु ॥ २ ॥ यत्प्र
ज्ञानम् ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥
यस्स्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनःशिवसङ्कल्पमस्तु ॥३॥
येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ ये

नंयुज्ञस्त्तायतेंसुप्तहोंतातन्मेमनंःशिवसंङ्कल्पमस्तु ॥४॥ यस्मिन्नृ
चंः॥यस्मिन्नृचुःसामुयजूंꣳषियस्मिन्नप्रतिष्ठितारथनाभाविवाराः।
यस्मिँश्चित्तꣳसर्वमोतंम्प्रजानान्तन्मेमनंःशिवसंङ्कल्पमस्तु ॥ ५ ॥
सुषारथिरश्वांनिव ॥ सुषारथिरश्वांनिवयन्मंनुष्यान्नेनीयतेभीशु
भिर्वाजिनंऽइव ॥ हृत्प्रतिष्ठंयदंजिरञ्जविष्ठन्तन्मेमनंःशिवसंङ्कल्प
मस्तु ॥ ६ ॥ पितुन्नु । स्तोषम्महोधर्माणन्तविषीम् ॥ यस्यत्रितो
व्योजंसावृत्रंविपर्वमुर्द्दयंत् ॥ ७ ॥ अन्विवत् ॥ अन्विदंनुमतेत्त्वंमन्या
सैशश्वंनस्कृधि ॥ क्रत्त्वेदक्षांयनोहिनुप्रणऽआयूंꣳषितारिषः ॥ ८ ॥

शतम् ॥१८००॥ अनु॑नः ॥ अनु॑नो॒द्यानु॑मातिर्य्य॒ज्ञन्दे॒वेषु॑मन्न्यताम् ॥
अ॒ग्निश्श्च॑ह॒व्यवा॑हनो॒भव॑तन्दा॒शुषे॒मयः॑ ॥९॥ सिनी॑वालि॒पृथु॑ष्टुके ॥
सिनी॑वालि॒पृथु॑ष्टुके॒यादे॒वाना॒मा॑सि॒स्वसा॑ ॥ जु॒षस्व॑ह॒व्यमाहु॑तम्प्र॒जा
न्दे॑विदिदि॒ड्ढिनः ॥१०॥ [१०] पञ्च॑न॒द्यः ॥ पञ्च॑न॒द्यःसर॑स्वती॒मपि॑य
न्तिसस्रो॑तसः ॥ सर॑स्वती॒तुप॑ञ्च॒धासो॒दे॒शेभ॑वत्स॒रित् ॥ ११ ॥ त्वम॑
ग्ने ॥ प्प्रथ॒मोऽअङ्गि॑रा॒ऽऋषि॑र्द्दे॒वोदे॒वाना॑मभवः शि॒वःसखा॑ ॥ तव॑व्व्र॒तेक॒
वयो॑वि॒द्मना॒पसो॒जा॑यन्तम॒रुतो॒भ्राज॑दृष्टयः ॥१२॥ त्वन्नः॑ ॥ त्वन्नो॑
ऽअग्ने॒तव॑देवपा॒युभि॑र्म्म॒घोनो॑रक्षत॒न्वश्च॑वन्द्य ॥ त्रा॒तातो॒कस्य॒तन॑

येगवामुस्यनिमेषꣳरक्षमाणस्तवव्व्रते ॥ १३ ॥ उत्तानायामव । भरा
चिकित्त्वान्त्सद्यᳶप्प्रवीताव्वृषणञ्जजान ॥ अरुषस्तूपोरुशदस्यपाज
ऽइडायास्प्पुत्त्रोव्वयुनेजनिष्ट ॥ १४ ॥ इडायास्त्वा । पदेव्वयन्ना
भापृथिव्व्याऽअधि ॥ जातवेदोनिधीमह्यग्ग्नेहव्व्यायव्वोढवे ॥ १५ ॥
प्रमन्महे । शवसानायशूषमाङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत् ॥ सुवृक्ति
भिस्तुवतऽऋग्ग्मियायार्च्चामार्कन्नरेविश्श्रुताय ॥ १६ ॥ प्रवः ॥ प्रवो
महेमहिनमोभरद्ध्वमाङ्गूष्यꣳशवसानायसाम ॥ येनानᳶपूर्व्वेपितरः
पदज्ञाऽअर्च्चन्तोऽअङ्गिरसोगाऽअविन्दन् ॥ १७ ॥ इच्छन्तित्वासो

म्म्यासुःसखांयःसुन्वन्तिसोमुन्दधंतिप्प्रयांꣳसि ॥ तितिंक्षन्तेऽअ
भिशंस्तिञ्जनांनामिन्द्रुत्वदाकश्श्चुनाहिप्प्रंकेतः ॥ १८ ॥ नतें । दूरेप
रमाचिद्रजांꣳस्यातुप्प्रयांहिहरिवोहरिंभ्याम् ॥ स्त्थिरायुवृष्णेस
वंनाकृतेमायुक्ताग्ग्रावाणःसमिधानेऽअग्नौ ॥ १९ ॥ अषांढंय्युत्सु ।
पृतंनासुपप्प्रिꣳस्वर्षामप्प्सांवृजनंस्यगोपाम् ॥ भरेषुजाꣳसुक्षिति
ꣳसुश्श्रवंसञ्जयंन्तन्त्वामनुंमदेमसोम ॥ २० ॥ [१०] सोमोंधेनुम् ॥
सोमोंधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोंवीरङ्कर्म्मण्ण्यन्ददाति ॥ साद
न्यंविदत्थ्यꣳसुभेयंम्पितृश्श्रवंणंय्योददाशदस्म्मै ॥ २१ ॥ त्वमि

माः ॥ त्वमि॒माऽओष॑धीः॒सोम॒विश्वा॒स्त्वम॒पोऽअ॑जनय॒स्त्वङ्गाः ॥
त्वमात॑तन्थो॒र्व॑न्तरि॑क्ष॒न्त्वञ्ज्योति॑षा॒वित॑मोँववर्त्थ ॥२२॥ देवेन॑नः ॥
दे॒वेन॑नो॒मन॑सादेव॒सो॒मरा॒यो भा॒गꣳस॑हसावन्न॒भियु॑ध्य ॥ मात्त्वात
नदी॒शिषे॑द्वी॒र्य॑स्यो॒भये॑भ्य॒ःप्रचि॑कित्सा॒गवि॑ष्टौ ॥ २३ ॥ अ॒ष्टौवि॥
अ॒ष्टौव्य॑ख्यत्क॒कुभः॑पृथि॒व्यास्त्रीधन्व॒योज॑नास॒प्तसिन्धू॑न् ॥ हि॒र
ण्याक्षः॑सवि॒तादे॒वऽआगा॒द्दध॒द्रत्ना॑दा॒शुषे॒वार्याँणि ॥ २४ ॥ हिर॑ण्य
पाणिःसवि॒ता । विच॑र्षणिरु॒भेद्यावा॑पृथि॒वीऽअ॒न्तरीँयते ॥ अपामीं
वाम्बाध॑ते॒वेति॒सूर्यँम॒भिकृ॒ष्णेन॒रज॑सा॒द्यामृ॑णोति ॥ २५ ॥ हिर॑ण्य

हस्तो॒ऽअसु॑रः । सुनी॒थःसु॑मृडी॒कःस्ववा॑ँयात्त्व॒र्व्वाङ् ॥ अ॒प॒सेध॑न्न्र॒क्ष
सो॒यातु॒धाना॒नस्त्था॑द्दे॒वःप्प्र॑तिदो॒षङ्गृ॑णा॒नः ॥ २६ ॥ ये॒ते॑ ॥ ये॒ते॒पन्था॑ः
सवि॒तःपू॒र्व्या॑सो॑रे॒णवः॑सु॒कृ॑ता॒ऽअ॒न्तरि॑क्षे ॥ तेभि॑र्न्नो॑ऽअ॒द्यप॒थिभि॑ःसु॒
गेभी॒रक्षा॑चनो॒ऽअधि॑चब्रू॒हिदेव ॥२७॥ उ॒भापि॑बतम् ॥ उ॒भापि॑बतम
श्विना॒भानु॑ःशर्म्मँ॑यच्छतम् ॥ अ॒वि॒द्रि॒याभि॑रू॒तिभि॑ः ॥ २८ ॥ अप्न॑
स्वतीमश्विना॒व्वाचं॑म॒स्म्मेकृ॒तन्नो॑दस्रा॒व्वृ॑षणामनी॒षाम् ॥ अ॒द्यू॒त्त्येवं॑
से॒निह्वं॑येत्रां॑व्वृ॒धेचं॑नो॑भवत॒व्वाजं॑सातौ ॥ २९ ॥ द्यु॒भिर॒क्तुभि॑ः ॥ द्यु॒भिर॒
क्तुभि॒ःपरि॑पातम॒स्म्मानरि॑ष्टेभिराश्विना॒सौभ॑गेभिः ॥ तन्नो॑मि॒त्रो॒व्वरु॑

णोमामहन्तामादितिꣳसिन्धु÷पृथिवीऽउतद्यौः ॥३०॥ [१०]॥ आकृष्णेन । रजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्त्रि । पार्थिवꣳरज÷ पितुरप्प्रायिधामभिः ॥ दिवꣳसदाꣳसिबृहतीव्वितिष्ठसऽआत्त्वेषंव्वर्त्ततेतम÷ ॥ ३२ ॥ उषस्तत् ॥ उषस्ताच्चित्रमाभरास्मब्भ्यंव्वाजिनीवति ॥ येनतोकञ्चतनयञ्चधामहे॥३३॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्प्रातर्म्मित्रावरुणाप्प्रातरश्श्विना॥ प्रातब्भगम्पूषणम्ब्रह्मणस्प्पतिम्प्रातꣳसोममुतरुद्रꣳहुवेम ॥३४ प्रातर्ज्जितम्भगम्॥प्रा

तर्ज्जितुम्भगंमुग्ग्रᳪहुंवेमव्वुयम्पुत्रमर्दितेुर्य्योंविधुर्त्ता ॥ आद्ध्रश्चिद्यम्म
न्यंमानस्तुरश्चिद्राजांचिद्यम्भगंम्भुक्षीत्याहं ॥ ३५॥ भगुप्प्रणेतः ॥
भगुप्प्रणेतुर्भगुसत्त्यंराधोभगेमान्धियमुदंवादर्दन्नः ॥ भगुप्प्रनोजन
युगोभिरश्श्वैर्भगुप्प्रनृभिर्न्नृवन्तः स्याम ॥ ३६ ॥ उुतेदानीम् ॥ उु
तेदानीम्भगंवन्तःस्यामोतप्प्रंपित्त्वऽउुतमद्ध्येऽअन्हाम् ॥ उुतोदिंता
मघवुन्त्सूर्य्यंस्यव्वुयन्देवानांᳪसुमतौस्यांम् ॥ ३७ ॥ भगंऽएवभग
वाꣳ ॥ ऽअस्तुदेवास्तेनव्वुयम्भगंवन्तःस्याम ॥ तन्त्वाभगुसर्व्वंऽइज्जो
हवीतिसनोंभगपुरऽएताभवेह॥ ३८॥ समध्वरायं ॥ समध्वरायोषसोन

मन्तदधि॒क्रावे॑व॒शुच॑येप॒दाय॑ ॥ अ॒र्व्वा॒ची॒नंव्व॑सु॒विद॒म्भगं॑न्नो॒रथ॑मि॒वा
श्वा॑व्वा॒जिन॒ऽआव॑हन्तु ॥ ३९ ॥ अश्वा॑वती॒र्ग्गोम॑तीः ॥ अश्वा॑वती॒
र्ग्गोम॑ती॒र्न्न॒ऽउ॒षासो॑व्वी॒रव॑तीः॒सद॑मुच्छन्तुभ॒द्राः ॥ घृ॒तन्दुहा॑नाव्वि॒श्व
तः॒प्रपी॑तायू॒यंपा॑तस्व॒स्तिभि॒ःसदा॑नः ॥४०॥ [१०] ॥ पूष॒न्तव॑ । व्व्र॒
तेव्व॒यन्नरि॑ष्ये॒मकदा॑च॒न ॥ स्तो॒तार॑स्त॒ऽइ॒हस्म्म॑सि ॥ ४१ ॥ प॒थ
स्प॑थ॒ःपरि॑पतिम् ॥ प॒थस्प॑थ॒ःपरि॑पतिंव्वच॒स्याकामे॑नकृ॒तोऽअ॒भ्या॒
न॒ड॒र्क्कम् ॥ सनो॑रासच्छु॒रुध॑श्च॒न्द्राग्ग्रा॒धि॒यं॑न्धि॒यꣳसीषधाति॒प्रपू॒षा
॥ ४२ ॥ त्रीणि॑प॒दाव्विच॑क्रमे॒व्विष्णु॑र्ग्गो॒पाऽअदा॑भ्यः ॥ अतो॒धर्म्मा॑

णिधारयन् ॥४३॥ तद्विप्रासः ॥ तद्विप्रासोविपन्यवोजागृवाꣳसःसमिन्धते ॥ विष्णोर्यत्परमम्पदम् ॥ ४४ ॥ घृतवतीभुवनानाम् ॥ घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्मणाविष्कभितेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनःसपत्नाऽअपतेभवन्त्विन्द्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्राऽआदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥ ४६ ॥ आनासत्या ॥ त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयमश्विना ॥ प्रायुस्तारिष्टन्नीरपाꣳसिमृक्षतꣳसेधतन्द्वेषोभवतꣳसचाभुवा ॥ ४७ ॥ ए

संहि. षवः ॥ एषवस्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यंमान्यस्यंकारोः ॥
॥२६१॥ एषायासीष्टतन्न्वेवयांविद्यामेषंवृजनंञ्जीरदानुम् ॥४८॥ सहस्तोमाः
सहच्छन्दसः ॥ सहस्तोमाःसहच्छन्दसऽआवृतःसहप्प्रमाऽऋष
यःसप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरथ्योनर
श्मीन् ॥४९॥ आयुष्यंवर्च्चस्यम् ॥ आयुष्यंव्वर्च्चस्यꣳरायस्पोष
मौद्भिदम् ॥ इदꣳहिरण्यंव्वर्च्चस्वज्जैत्रायाविशतादुमाम् ॥५०॥ ननतत् ॥ न
उ.अ. तद्रक्षाꣳसिनपिशाचास्तरान्तिदेवानामोजःप्प्रथमजꣳह्येतत् । योबि
३४ भर्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुते

दीर्ग्घमायुं÷॥५१॥यदाबंध्नन् ॥ यदाबंध्नन्दाक्षायुणाहिरंण्यꣳशुता
नांकायसुमनुस्यमांनाः ॥ तन्मुऽआबंध्नामिशुतशांरदायायुंष्मा
जुरदंष्टिर्यथांसम् ॥ ५२ ॥ उतनं÷ ॥ उतनोहिर्बुध्न्य÷शृणो
त्वजऽएकंपात्त्पृथिवीसंमुद्रः ॥ विश्वेदेवाऽऋतावृधोहुवानास्तुताम
न्त्रांःकविशस्ताऽअंवन्तु ॥ ५३ ॥ इमागिरं÷ ॥ इमागिरंऽआदित्त्ये
भ्योघृतस्नूंःसुनाद्राजंभ्योजुह्वाजुहोमि॥शृणोतुंमित्त्रोऽअंर्य्यमाभगो
नस्तुविजातोव्वरुंणोदक्षोऽअꣳशं÷ ॥ ५४ ॥ सप्तऽऋषंयः ॥ सप्तऽऋ
षंयःप्प्रातिंहिताःशरीरेसप्तरंक्षन्तिसदमप्प्रंमादम् ॥ सप्तापःस्वपंतो

लो॒कमी॑यु॒स्तत्त्रं॑जा॒गृतो॒ऽअस्व॑प्नजौ॒सत्त्र॒सदौ॒चदे॒वौ ॥ ५५ ॥ उत्ति॑ष्ठ
ब्रह्मणस्प्पतेदे॒व॒यन्त॑स्त्त्वेमहे ॥ उप॒प्प्रय॑न्तु॒म॒रुतः॑सु॒दान॑व॒ऽइन्द्र॑
प्प्रा॒शूर्भ॑वा॒सचा॑ ॥ ५६ ॥ प्रनू॒नम् ॥ प्रनू॒नम्ब्रह्म॑ण॒स्प्पति॒र्म्मन्त्रं॑व
दत्त्यु॒क्क्थ्य॑म् ॥ यस्मि॒न्निन्द्रो॒व॒रुणो॑मि॒त्त्रोऽअ॑र्य्य॒मादे॒वाऽओका॑ꣳसि
च॒क्क्रि॒रे ॥ ५७ ॥ ब्रह्म॑णस्प्पते ॥ ब्रह्म॑णस्प्पते॒त्त्वम॒स्यय॒न्ता सू॒क्क्त
स्य॑बो॒धि॒तन॑यञ्च॒जिन्व ॥ विश्श्व॒न्तद्भ॒द्रं॑यदव॑न्ति॒दे॒वाबृ॒हद्व॑देमवि॒द
थे॑सु॒वीराः॑ ॥ यऽइ॒माविश्श्वा॒विश्श्व॑कर्म्मा॒योनः॑पि॒तान्न॑पते॒न्न॑स्यनो
दे॒हि ॥ ५८ ॥ [१८] इति श्रीशुक्लयजुःसंहितापाठे चतुस्त्रिंशोऽ

ध्यायः ॥३४॥ अपेतोदशापाघंद्वादशद्वौद्वाविꣳशतिः ॥ ॐअपेतः ॥ अपेतोयन्तुपणयोसुंम्नादेवपीयवः ॥ अस्यलोकःसुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्त्ववसानमस्मै ॥१॥ सविताते ॥ सवितातेशरीरेभ्यःपृथिव्याँल्लोकमिच्छतु ॥ तस्मैयुज्ज्यन्तामुस्त्रियाः ॥ २ ॥ वायुःपुनातु । सवितापुनात्त्वग्नेर्भ्राजसासूर्य्यस्यवर्च्चसा ॥ विमुंच्यन्तामुस्त्रियाः ॥ ३ ॥ अश्वत्थेवः ॥ अश्वत्थेवोनिषदंनम्पर्ण्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥४॥ सविताते । शरीराणिमातुरुपस्थऽआवपतु ॥ तस्मैपृथि

विशम्भव ॥ ५ ॥ प्रजापतौत्त्वा । देवतायामुपोदकेलोकेनिदधाम्म्य
सौ ॥ अपनꣳशोशुचदघम् ॥ ६ ॥ परम्मृत्त्यो ॥ परम्मृत्त्योऽअनुपरे
हिपन्थांय्यस्तेऽअन्न्यऽइतरोदेवयानात् ॥ चक्षुष्म्मतेशृण्वतेतेब्ब्रवीमि
मानःप्प्रजाꣳरीरिषोमोतव्वीरान् ॥ ७ ॥ शंव्वातः । शꣳहितेघृणिःश
न्तेभवन्त्विष्टकाः ॥ शन्तेभवन्त्वग्ग्नयꣳपार्त्थिवासोमात्त्वाभिशूशुच
न् ॥ ८ ॥ कल्पन्तान्ते । दिशस्तुब्भ्यमापःशिवतमास्तुब्भ्यम्भव
न्तुसिन्धवः ॥ अन्तरिक्षꣳशिवन्तुब्भ्यङ्कल्पन्तान्तेदिशःसर्व्वाः ॥ ९ ॥
अश्म्मन्न्वतीरीयतेसꣳरभद्ध्वमुत्तिष्ठतप्प्रतरतासखायः ॥ अत्त्राजहीमो

शिवा॒येऽअसंच्छि॒वान्व॒यमुत्त॑रे॒मा॒भिवाजा॑न् ॥ १० ॥ [१०] अपा॒घ
म् ॥ अपा॒घमप॒किल्बि॒षमप॑कृत्त्यामपो॒रप॑÷ ॥ अपा॑मार्ग्ग॒त्त्वम॒स्म्म
दप॑दु॒ःष्ष्वप्न्य॑ꣳसुव ॥ ११ ॥ सु॒मि॒त्त्रि॒यान॑÷ ॥ सु॒मि॒त्त्रि॒यान॒ऽआप॒ऽओ
ष॑धयꣳसन्तुदु॒र्म्मि॒त्त्रि॒यास्त्तस्म्मै॑सन्तु॒यो॒स्म्मान्द्द्वेष्टि॒यश्च॑व्व॒यन्द्वि॒ष्म्मः ।
॥ १२ ॥ अन॒ड्वह॑मन्वार॑भामहे॒सौर॑भेयꣳस्वस्त्तये॑ ॥ सन॒ऽइन्द्र॑ऽइ
वदे॒वेब्भ्यो॒व्व॒ह्नि॑÷स॒न्तार॑णोभव ॥ १३ ॥ उ॒द्व॒यम् ॥ उ॒द्व॒यन्तम॑स॒स्प
रि॒स्व॒÷पश्य॑न्त॒ऽउत्त॑रम् ॥ दे॒वन्दे॑व॒त्त्रासूर्य्य॒मग॑न्म॒ज्ज्योति॑रुत्त॒मम् ॥
॥ १४ ॥ इमञ्जी॒वेब्भ्य॑÷ । परि॒धिन्द॑धामि॒मैषा॒न्नु॒गा॒दप॑रो॒ऽअर्त्थ॑मे॒त

त् ॥ श॒तञ्जीव॑न्तुश॒रद॑÷पु॒रूचीर॒न्तम्मृत्त्युन्द॑धता॒म्पर्व॑तेन ॥ १५ ॥
अग्न॒ऽआयू॑ꣳषि । पव॑स॒ऽआसु॒वोर्ज्ज॒मिष॑ञ्चनः ॥ आ॒रेबा॑धस्वदु॒च्छु
ना॑म् ॥ १६ ॥ आयु॑ष्म्मानग्ने । ह॒विषा॑वृ॒धा॒नो॑घृ॒तप्र॑तीको॒घृ॒तयो॑
निरे॑धि ॥ घृ॒तम्पी॒त्त्वामधु॒चारु॒गव्य॑म्पि॒तेव॑पु॒त्त्रम॒भिर॑क्षतादि॒मान्त्स्वा
हा॑ ॥ १७ ॥ परी॒मे । गाम॑नेषत॒पर्य॒ग्निम॑हृषत ॥ दे॒वेष्व॑क्क्रत॒ःश्र॒व॒ः
क॒ऽइ॒माँ२ऽआद॑धर्षति ॥ १८ ॥ क्र॒व्व्याद॑म॒ग्निम् ॥ क्र॒व्व्याद॒म॒ग्नि
म्प्रहि॑णोसिदू॒रँय्य॑म॒राज्ज्ञ॑ङ्गच्छतु॒रिप्प्र॒वा॒हः ॥ इ॒हैवाय॒मित॑रो॒जात
वे॑दादे॒वेब्भ्यो॑ह॒व्व्य॑व्वहतु॒प्प्रजा॒नन् ॥ १९ ॥ वह॑व॒पाम् ॥ वह॑व॒पाञ्जा॑त

वेदꣳपितृभ्म्योयत्रैनान्वेत्त्थनिहितान्पराके ॥ मेदंसꣳकुल्ल्याऽउपता
न्त्स्रंवन्तुसत्त्याऽएंषामाशिषꣳसन्नंमन्ताꣳस्वाहां ॥ २० ॥ स्योना
पृंथिवि । नोभवानृक्षरानिवेशंनी ॥ यच्छांनःशर्म्मंसप्प्रथाः ॥ अपं
नःशोशुंचदघम् ॥ २१ ॥ अस्म्मात्त्वम् ॥ अस्म्मात्त्वमधिंजातो
सित्त्वदयञ्जांयताम्पुनंः ॥ असौस्वर्गायंलोकायस्वाहां ॥ २२ ॥
[१२] ॥ इति श्रीशुक्लयजुःसंहितापाठे पञ्चत्रिꣳशोऽध्यायः ॥३५॥
ऋचंवाचꣳषोडशद्यौःशांतिरष्टौद्वौचतुर्विꣳशतिः ॥ हरिः ॐऋचंवाचं
म् ॥ ऋचंवाचम्प्रपंद्येमनोयजुःप्प्रपंद्येसामंप्प्राणम्प्रपंद्येचक्षुःश्श्रोत्र

म्प्रपंद्ये ॥ व्वागोजंःसुहौजोमयिंप्प्राणापानौ ॥ १ ॥ यन्मे । च्छि
द्रञ्चक्षुंषोहृदंयस्युमनंसोव्वातिंतृणम्बृहुस्प्पतिंम्मैंतद्दंधातु ॥ शन्नोंभ
वतुभुवंनस्युषस्प्पतिंः ॥ २ ॥ भूर्भुवंः ॥ भूर्भुवुꣳस्वस्तत्त्सवि
तुर्व्वरेण्युम्भगोंदेवस्यंधीमहि ॥ धियोयोनंःप्प्रचोदयांत् ॥ ३ ॥ क
यांनꣳ ॥ कयांनाश्चित्रऽआभुंवदूतीसुदावृंधुꣳसखां ॥ कयाशचिंष्ठया
वृता ॥ ४ ॥ कस्त्त्वां । सुत्त्योमदांनाम्मꣳहिंष्ठोमत्त्सुदन्धंसꣳ ॥ दृ
ढाचिंदारुजेव्वसुं ॥ ५ ॥ अभीषुणꣳसखींनामविताजंरितृणाम् ॥ शु
तम्भंवास्यूतिभिंः ॥ ६ ॥ कयात्त्वम् ॥ कयात्त्वन्नंऽऊत्त्याभिप्प्रम

न्दे॒सव्वृषन् ॥ कया॑स्त्तो॒तृभ्य॒ऽआभ॑र ॥ ७ ॥ इन्द्रो॒व्विश्व॑स्यराज
ति ॥ शन्नो॑ऽअस्त्तु॒द्वि॒पदे॒शञ्चतु॑ष्पदे ॥ ८ ॥ शन्नो॑मि॒त्त्रःशंव्वरु॑णःशन्नो॑
भवत्त्वर्य्य॒मा ॥ शन्न॒ऽइन्द्रो॒बृह॒स्पति॒ःशन्नो॒व्विष्ण्णु॑रुरु॒क्क्र॒मः ॥ ९ ॥
शन्नो॒व्वातः॑ । पवता॒ᳫंशन्न॑स्त्तपतु॒सूर्य्यः॑ ॥ शन्नः॒कनि॑क्क्रदद्दे॒वःप॒र्ज्ज
न्यो॑ऽअ॒भिव॑र्षतु ॥ १० ॥ अहा॑नि॒शम् ॥ अहा॑नि॒शम्भ॑वन्तुनः
शᳫंरात्त्री॒ःप्रति॑धीयताम् ॥ शन्न॑ऽइन्द्रा॒ग्ग्नीभ॑वता॒मवो॑भि॒ःशन्न॒ऽइन्द्रा
वरु॑णारा॒तह॑व्या ॥ शन्न॑ऽइन्द्रापू॒षणा॒व्वाज॑सातौ॒शमिन्द्रा॒सोमा॑सुवि॒ता
य॒शंय्योः॑ ॥ ११ ॥ शन्नः॑ ॥ शन्नो॑दे॒वीर॒भिष्ट॑य॒ऽआपो॑भवन्तुपी॒तये॑ ॥

शं॑य्योर॒भिस्र॑वन्तु नः ॥ १२ ॥ स्यो॒नापृ॑थिवि । नो॒भवा॑नृक्ष॒रानि॒वे
शं॑नी ॥ यच्छा॑न॒ःशर्म्म॑स॒प्रथाः ॥ १३ ॥ आपो॒हि । ष्ठाम॑यो॒भुव॒
स्तान॑ऽऊ॒र्ज्जेद॑धातन ॥ म॒हेरणा॑य॒चक्ष॑से ॥ १४ ॥ योव॑ःशि॒वत॑मो॒
रस॒स्तस्य॑भाजयते॒हन॑ः ॥ उ॒श॒तीरि॑वमा॒तरः ॥ १५ ॥ तस्मा॒ऽअ
रं॑म् ॥ तस्मा॒ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ॥ आपो॑ज॒नय॑थाच
नः ॥१६॥[१६] द्यौःशान्ति॑ः ॥ द्यौःशान्ति॑र॒न्तरि॑क्ष॒ꣳशान्ति॑ःपृथि॒वी
शान्ति॒राप॒ःशान्ति॒रोष॑धय॒ःशान्ति॑ः ॥ व॒नस्पत॑य॒ःशान्ति॒र्विश्वे॑दे॒वाः
शान्ति॒र्ब्रह्म॒शान्ति॒ःसर्व्व॒ꣳशान्ति॒ःशान्ति॑रे॒वशान्ति॒ःसामा॒शान्ति॑रेधि

॥१७॥दृतेदृꣳहमा। मित्रस्यमाचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम्॥
मित्रस्याहञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षा
महे ॥ १८ ॥ दृतेदृꣳहमा । ज्योक्तेसन्दृशिजीव्यासञ्ज्योक्तेसन्दृशि
जीव्यासम् ॥ १९ ॥ नमस्त्तेहरसेशोचिषेनमस्त्तेऽअस्त्त्वर्च्चिषे ॥ अ
न्याँस्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअस्म्मभ्यꣳशिवोभव ॥२०॥
नमस्त्ते । अस्त्तुविद्युतेनमस्त्तेस्त्तनयित्नवे ॥ नमस्त्तेभगवन्नस्त
यतःस्वःसमीहसे ॥ २१ ॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥
शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ २२॥ सुमित्रियानः ॥ सुमि

त्रियानऽआपऽओषधयꣳसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोऽस्म्मान्द्वे
ष्टियञ्चवयन्द्विष्म्मः ॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्देवहितम्पुरस्ताच्छु
क्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शु
तम्प्रब्रवामशरदः शतमदीनाꣳस्यामशरदः शतम्भूयश्चशरदः शतात् ॥
॥२४॥ [८] इतिश्रीशुक्लयजुःसंहितापाठे षट्त्रिंशोऽध्यायः ॥३६॥ देव
स्यत्वादशयमायत्वैकादशद्वावेकाविꣳशतिः ॥ ॐदेवस्यत्वा ॥ सवि
तुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ आददेनारिरसि
॥ १ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्प्राविप्प्रस्यबृह

तोविपश्चितः ॥ विहोत्त्रादधेव्वयुनाविदेकऽइन्न्महीदेवस्यसवितुःपरि
ष्टुतिः ॥ २ ॥ देवीद्यावापृथिवी । मखस्यवामद्यशिरोराद्ध्यासन्दे
वयजनेपृथिव्याः ॥ मखायत्त्वामखस्यत्त्वाशीर्ष्णे ॥ ३ ॥ देव्योव
म्म्यः ॥ देव्योवम्म्योभूतस्यप्रथमजामखस्यवोद्यशिरोराद्ध्यास
न्देवयजनेपृथिव्याः ॥ मखायत्त्वामखस्यत्त्वाशीर्ष्णे ॥ ४ ॥ शतम्
॥१९००॥ इयत्त्यग्ग्रे ॥ इयत्त्यग्ग्रऽआसीन्मखस्यतेद्यशिरोराद्ध्यास
न्देवयजनेपृथिव्याः ॥ मखायत्त्वामखस्यत्त्वाशीर्ष्णे ॥ ५ ॥ इन्द्र
स्यौजः ॥ इन्द्रस्यौजस्त्थमखस्यवोद्यशिरोराद्ध्यासन्देवयजनेपृ

थिव्याऽ ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामुखस्यंशीर्ष्ण्णे ॥ ६ ॥ प्रैतुं ॥ प्रैतुब्ब्रह्मणस्प्पतिऽप्प्रदेव्व्येतुसूनृता ॥ अच्छाव्वीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनऽ ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ ७ ॥ मुखस्यशिरः ॥ मुखस्यशिरोंसि ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखस्यशिरोंसि ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखस्यशिरोंसि ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्ण्णे ॥ मुखायंत्त्वामु

खस्य॑त्त्वाशी॒र्ष्ण्णे ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ ८ ॥ अश्व॑स्यत्त्वा॒ । वृ॒ष्ण्ण॑÷श॒क्नाधू॑पयामिदे॒वयज॑नेपृथि॒व्याः ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ अश्व॑स्यत्त्वावृ॒ष्ण्ण÷श॒क्नाधू॑पयामिदे॒वयज॑नेपृथि॒व्याः ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ अश्व॑स्यत्त्वावृ॒ष्ण्ण॑÷श॒क्नाधू॑पयामिदे॒वयज॑नेपृथि॒व्याः ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ ९ ॥ ऋ॒जवे॑त्त्वा । साधवे॑त्त्वासु॒क्षित्यै॑त्त्वा॑ ॥ मुखाय॑त्त्वामुखस्य॑त्त्वाशी॒र्ष्ण्णे ॥ मुखाय॑त्त्वामुखस्य॑त्त्वा

शी॒र्ष्ण्णे ॥ म॒खाय॑त्त्वाम॒खस्य॑त्त्वाशी॒र्ष्ण्णे ॥१०॥ [१०] य॒माय॑त्त्वा ।
म॒खाय॑त्त्वा॒सूर्य्य॑स्यत्त्वा॒तप॑से ॥ दे॒वस्त्त्वा॑सवि॒तामद्ध्वा॑नक्तुपृथि॒व्व्याः
स॒ꣳस्पृश॑स्प्पाहि ॥ अ॒र्च्चिर॑सिशो॒चिर॑सि॒तपो॑सि ॥ ११ ॥ अना॑धृष्टा
पु॒रस्ता॑त् ॥ अना॑धृष्टापु॒रस्ता॑द॒ग्ग्नेराधि॑पत्त्य॒ऽआयु॑र्मे॑दाःपु॒त्त्रव॑तीद
क्षि॒णत॒ऽइन्द्र॒स्याधि॑पत्त्ये॒प्प्र॒जाम्मे॑दाःसु॒खदा॑प॒श्चाद्दे॒वस्य॑सवि॒तुराधि॑
पत्त्ये॒चक्षु॑र्म्मे॑दा॒ऽआःश्रु॑तिरुत्त॒रतो॑धा॒तुराधि॑पत्त्ये॒रा॒यस्पोष॑म्मेदाः ॥
व्वि॒धृ॑तिरु॒परि॑ष्टा॒द्बृह॒स्पते॒राधि॑पत्त्य॒ऽओजो॑मे॒दा॒व्विश्श्वा॑भ्यो॒मानाष्ट्रा
भ्य॑स्प्पाहि॒मनो॒रश्श्वा॑सि ॥ १२ ॥ स्वाहा॑म॒रुद्भिः॑ । परि॑श्श्रीय

स्वादिवःसुꣳस्पृशंस्पाहि ॥ मधुमधुमधुं ॥ १३॥ गब्भौँदेवानाम् ॥ गब्भौँदेवानांम्पितामंतीनाम्पतिःप्रजानाम् ॥ सन्देवोदेवेनंसवित्त्रा गंतुसꣳसूर्य्यैँणरोचते ॥ १४ ॥ समग्निः ॥ समग्निरग्निनांगतुसन्दैवेनसवित्त्रासꣳसूर्य्यैँणारोचिष्ट ॥ स्वाहासमग्निस्तपसागतसन्देव्यैनसवित्त्रासꣳसूर्य्यैँणारूरुचत ॥ १५ ॥ धर्तादिवꣳ ॥ धर्तादिवो विभातितपसस्पृथिव्यान्धर्तादेवोदेवानाममर्त्यस्तपोजाः ॥ वाचमुस्मेनियंच्छदेवायुवम् ॥ १६ ॥ अपंश्यङ्गोपाम् ॥ अपंश्यङ्गोपामनिपद्यमानमाचपरांचपथिभिश्चरंन्तम् ॥ ससध्रीचीःसविषूचीर्वसा

नुऽआवरीवर्तिभुवनेष्वन्तः ॥ १७ ॥ व्विश्वासाम्भुवाम् ॥ व्विश्वा
साम्भुवाम्पतेव्विश्वस्यमनसस्पतेव्विश्वस्यव्वचसस्पतेसर्वस्यव्वचस
स्पते ॥ देवश्श्रुत्त्वन्देवघर्म्मदेवोदेवान्पाह्यत्रप्प्रावीरनुवान्देववी
तये ॥ मधुमाद्ध्वीभ्याम्मधुमाधूचीभ्याम् ॥ १८ ॥ हृदेत्त्वा । मन
सेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वोऽअद्ध्वरन्दिविदेवेषुधेहि ॥१९॥ पि
तानः ॥ पितानोसिपितानोबोधिनमस्तेऽअस्तुमामाहिꣳसी ॥ त्वष्टृ
मन्तस्त्वासपेमपुत्त्रान्पशून्मयिधेहिप्प्रजामस्मासुधेह्यरिष्टाहꣳस
हपत्त्याभूयासम् ॥२०॥ अहःकेतुना । जुषताꣳसुज्ज्योतिज्ज्योति

षास्वाहां ॥ रात्रिं÷केतुनांजुषताᳪसुज्ज्योतिज्ज्योतिषास्वाहां ॥२१॥
[११] इति श्रीवाजसनेयशुक्लयजुःसंहितायां दीर्घपाठे सप्तत्रिᳪशोऽध्यायः ॥ ३७॥ देवस्यत्त्वाष्टौयमायत्त्वाक्षत्रस्यत्त्वादशकौत्रयोष्टाविᳪशतिः ॥ ओँदेवस्यंत्त्वा ॥ देवस्यंत्त्वासवितुःप्प्रंसवेश्विनोर्ब्बाहुभ्यांम्पूष्ण्णोहस्तांभ्याम् ॥ आददेदित्त्यैरास्न्नांसि ॥ १ ॥ इडऽएहि ॥
इडऽएह्यदितऽएहिसरंस्वत्त्येहिं ॥ असावेह्यसावेह्यसावेहिं ॥ २ ॥
अदित्त्यैरास्न्नांसीन्द्राण्याऽउष्णीषं÷ ॥ पूषासिघर्म्मायंदीष्ष्व ॥ ३ ॥
अश्विभ्यांम्पिन्न्वस्वसरंस्वत्त्यैपिन्न्वस्वेन्द्रांयपिन्न्वस्व ॥ स्वाहेन्द्रंवत्त्स्वा

हेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥ यस्तेस्तनः । शशयोयोमयोभूर्य्योरत्न
धाव्वसुविद्यःसुदत्त्रः॥ येनव्विश्वापुष्ष्यसिव्वार्य्याणिसरस्वतितमिहधा
तवेकः ॥ उर्व्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दः ॥ गायत्रञ्छन्दो
सित्रैष्टुभञ्छन्दोसिद्यावापृथिवीभ्यान्त्वापरिगृह्णाम्म्यन्तरिक्षेणोप
यच्छामि ॥ इन्द्राश्विनामधुनःसारघस्यघर्म्मम्पातव्वसवोयजत
व्वाट्स्वाहासूर्य्यस्यरश्मयेव्वृष्टिवनये ॥ ६ ॥ समुद्रायत्त्वा । व्वाताय
स्वाहासरिरायत्त्वाव्वातायस्वाहा ॥ अनाधृष्ष्यायत्त्वाव्वातायस्वाहा
ऽप्रतिधृष्ष्यायत्त्वाव्वातायस्वाहा ॥ अवस्यवेत्त्वाव्वातायस्वाहाशिमि

दाय॑त्त्वा॒व्वाता॑य॒स्वाहा॑ ॥ ७ ॥ इन्द्रा॑यत्त्वा॒ । व्वसु॑मते रु॒द्रव॑ते॒स्वाहेन्द्रा॑
यत्त्वादि॒त्यव॑ते॒स्वाहेन्द्रा॑यत्त्वाभिमाति॒घ्ने स्वाहा॑ ॥ स॒वि॒त्रेत्त्व॑ऽऋभु
मते॑व्विभु॒मते॒व्वाज॑वते॒स्वाहा॒बृह॒स्पत॑येत्त्वा॒व्विश्श्व॑दे॑व्यावते॒स्वाहा॑ ॥
॥ ८ ॥ [८] य॒माय॒त्त्वाङ्गि॑रस्वते पितृ॒मते॒स्वाहा॑ ॥ स्वाहा॑घ॒र्म्माय॒
स्वाहा॑घ॒र्म्म॑÷पि॒त्रे ॥ ९ ॥ व्विश्श्वा॒ऽआशाः॑ ॥ व्विश्श्वा॒ऽआशा॑दक्षि
णसद्व्विश्श्वा॑न्दे॒वान॑याडि॒ह ॥ स्वाहा॑कृतस्य घ॒र्म्म॑स्य॒ मधोः॑ पिबतम
श्श्विना ॥ १० ॥ दि॒वि॒धाः॑ ॥ दि॒वि॒धाऽइ॒मंय्य॒ज्ञमि॒मंय्य॒ज्ञन्दि॒वि॒धाः॑ ॥
स्वाहा॒ग्नये॑य॒ज्ञिया॑य॒ शंय्यजु॑र्ब्भ्यः॑ ॥ ११ ॥ अश्श्विना॑घ॒र्म्म॑म् ॥ अ

श्विना घ॒र्म्मम्पा॑त॒ꣳ हार्द्वा॑न॒मह॑र्दि॒वाभि॑रू॒तिभिः॑ ॥ त॒न्त्रा॒यिणे॒नमो॒
द्यावा॑पृथि॒वीभ्या॑म् ॥ १२ ॥ अपा॑ताम॒श्विना॑ । घ॒र्म्ममनु॒द्यावा॑पृथि॒
वीऽअ॑मꣳसाताम् ॥ इ॒हैव रा॒तयः॑ सन्तु ॥ १३ ॥ इ॒षे पि॑न्वस्व ॥ इ॒षे पि॑
न्वस्वो॒र्ज्जे पि॑न्वस्व॒ ब्रह्म॑णे पिन्वस्व क्ष॒त्त्राय॑ पिन्वस्व॒ द्यावा॑पृथि॒वीभ्या॑
म्पिन्वस्व ॥ धर्म्मा॑सि सु॒धर्म्मा मे॑न्य॒स्मे नृ॒म्णानि॑ धारय॒ ब्रह्म॑ धार
य क्ष॒त्त्रन्धा॑रय॒ विश॑न्धारय ॥ १४ ॥ स्वाहा॑ पू॒ष्णे । शर॑से॒ स्वाहा॒ ग्रा
व॑भ्य॒ः स्वाहा॑ प्रातिर॒वेभ्यः॑ ॥ स्वाहा॑ पि॒तृभ्य॑ऽऊ॒र्ध्वब॑र्हिर्भ्यो घर्म्म॒
पाव॑भ्य॒ः स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॒ विश्वे॑भ्यो दे॒वेभ्यः॑ ।१५॥

स्वाहा॑रुद्द्राय॑ । रुद्द्रहूत॑ये॒स्वाहा॒सञ्ज्योति॒षा॒ज्ज्योति॑ः ॥ अह॑ः के॒तुना॑
जुषता॒ꣳसु॒ज्ज्योति॒ज्ज्योति॑षा॒स्वाहा॑ ॥ रात्रि॑ः के॒तुना॑जुषता॒ꣳसु
ज्ज्योति॒ज्ज्योति॑षा॒स्वाहा॑ ॥ मधु॑हु॒तमिन्द्र॑तमे॒ऽअ॒ग्नाव॒श्श्याम॑तेदे॒
वघर्म्म॒नम॑स्ते॒ऽअस्तु॒मामा॑हिꣳसीः ॥ १६ ॥ अभी॒मम् ॥ अभी॒
मम्म॑हि॒मादिव॑ं॒विप्प्रो॑बभू॒वस॒प्प्रथा॑ः ॥ उ॒तश्श्र॒व॑सापृथि॒वीꣳसꣳसी॒
दस्व॒महाँ॒ऽअसि॒रोच॑स्व॒देव॒वीत॑मः ॥ वि॒धूम॑मग्ग्ने॒ऽअरु॒षम्मि॑ये
ध्यसृ॒जप्प्र॑शस्त॒दर्श॑तम् ॥ १७ ॥ याते॑घर्म्म॑दि॒व्याशुग्ग्यागा॑य
त्र्याꣳह॑वि॒र्द्धाने॑ ॥ सात॒ऽआप्प्या॑यता॒न्निष्ट्या॑यता॒न्तस्यै॑ते॒स्वाहा॑ ॥

यातेघर्म्मान्तरिक्षेशुग्ग्यात्रिष्टुब्भ्याग्नीध्रे ॥ सातऽआप्प्यायतान्नि
ष्ट्यायतान्तस्यैतेस्वाहा ॥ यातेघर्म्मपृथिव्याꣳशुग्ग्याजगत्त्याꣳ
सदस्स्या ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ १८ ॥
[१०] क्षत्रस्यत्त्वा । परस्पायब्ब्रह्मणस्तन्न्वम्पाहि ॥ विशस्त्त्वा
धर्म्मणाव्वयमनुक्क्रामामसुवितायनव्व्यसे ॥ १९ ॥ चतु÷स्त्रक्तिर्न्ना
भि÷ ॥ चतु÷स्त्रक्तिर्न्नाभिर्ऋतस्यसप्प्रथाꣳसनोविश्वायु÷सप्प्रथाꣳस
न÷सर्व्वायु÷सप्प्रथाꣳ ॥ अपद्वेषोऽअपह्वरोन्यव्व्रतस्यसश्चिम ॥ २० ॥
घर्म्मैतत ॥ घर्म्मैतत्तेपुरीषन्तेनवर्द्धस्वचाचप्प्यायस्व ॥ वर्द्धिषी

महिचद्युयमाचप्प्यासिषीमहि ॥ २१ ॥ अचिक्क्रदुद्वृषाहरिम्मुहा
न्मित्रोनदर्शतः ॥ सᳫंसूर्य्येणादिद्युतदुदधिर्न्निधिः ॥ २२ ॥ सुमित्रियानः
॥ सुमित्रियानऽआपऽओषधयᳫंसन्तुदुर्म्मित्रियास्तस्मै
सन्तुयोस्मान्द्वेष्टियश्चवयन्द्विष्म्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमसस्प्परि
स्वᳫंपश्श्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्ज्योतिरुत्तमम्
॥ २४ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयि
धेहि ॥ २५ ॥ यावतीद्यावापृथिवी ॥ यावच्चसप्तसिन्धवोवितस्थिरे ॥
तावन्तमिन्द्रतेग्ग्रहमूर्ज्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ।२६॥

मयित्त्यत् ॥ मयित्त्यादिंन्द्रियम्बृहन्मयिदक्षोमयिक्रतुं÷ ॥ घर्म्मस्त्रि
शुग्ग्विरांजतिविराजाज्ज्योतिंषासुहब्रह्मंणातेजंसासुह ॥ २७ ॥
पयंसोरेतं÷ ॥ पयंसोरेतऽआभृंतुन्तस्यदोहंमशीमुह्युत्तरामुत्तराᳬंस
मांम् ॥ त्त्विषं÷संवृक्क्त्त्वेदक्षंस्यतेसुषुम्म्णस्यंतेसुषुम्म्णाग्निहुतः ॥
इन्द्रंपीतस्यप्प्रजापंतिभक्षितस्यमधुंमतऽउपंहूतऽउपंहूतस्यभक्षया
मि ॥ २८ ॥ [१०] इति श्रीशुक्लयजुःसंहितायामष्टात्रिंशोऽ
ध्यायः ॥ ३८ ॥ स्वाहाप्प्राणेब्भ्यः षडुग्रश्चसप्तद्वौत्रयोदश ॥ ॐस्वाहां
प्प्राणेब्भ्यं÷ ॥ स्वाहांप्प्राणेब्भ्युऽसाधिंपतिकेब्भ्यऽ॥ पृथिव्व्यैस्वाहाग्ग्न

यैस्वाहान्तरिक्षायुस्वाहाव्वायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायुस्वाहा ॥
॥ १ ॥ दिग्भ्यःस्वाहा । चन्द्रायुस्वाहानक्षत्त्रेभ्युःस्वाहाद्भ्यःस्वाहा
वरुणायुस्वाहा ॥ नाभ्यैस्वाहापूतायुस्वाहा ॥ २ ॥ व्वाचेस्वाहा ।
प्प्राणायुस्वाहाप्प्राणायुस्वाहा ॥ चक्षुषेस्वाहाचक्षुषेस्वाहा ॥ श्श्रोत्त्रायु
स्वाहाश्श्रोत्त्रायुस्वाहा ॥ ३ ॥ मनसःकामम् ॥ मनसःकाममाकू
तिव्वाचःसत्त्यमशीय ॥ पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्म
यिस्वाहा ॥ ४ ॥ प्रजापतिः । सम्भ्रियमाणःसम्म्राट्सम्भृतोव्वैश्वदे
वꣳसꣳसन्नोघर्म्मःप्रवृक्तस्तेजऽउद्यतऽआश्विनःपयस्यानीयमानेपौ

रुणो विष्यन्दमाने मारुतः क्लथन् ॥ मैत्रः शरासि सन्ताय्यमाने वायु
व्यो ह्रियमाणऽआग्नेयो हूयमानो वाग्घुतः ॥ ५ ॥ सविता प्रथमे । हन्न
ग्निर्द्वितीये वायुस्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चमऽऋतुः षष्ठे म
रुतः सप्तमे बृहस्पतिरष्टमे ॥ मित्रो नवमे वरुणो दशमऽइन्द्रऽएकाद
शे विश्वे देवा द्वादशे ॥ ६ ॥ उग्रश्च । भीमश्च ध्वान्तश्च धुनिश्च ॥
सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥ ७ ॥ अग्निꣳ हृदयेन ॥ अ
ग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना ॥
शर्वम्मतस्नाभ्यामीशानम्मन्युना महादेवमन्तःपर्शव्येनोग्रन्देवं

व॑निष्ठु॒ना॑वसि॒ष्ठह॒नुःशि॒ङ्गीनि॑को॒श्याभ्या॑म् ॥ ८ ॥ उ॒ग्रँल्लोहि॑तेनमि॒त्रꣳसौव्र॑त्त्येनरु॒द्रन्दौर्व्र॑त्त्येनेन्द्र॑म्प्रक्री॒डेन॑म॒रुतो॑बलेन॑सा॒ध्यान्प्र॒मुदा॑ ॥ भ॒वस्य॑कण्ठ्यꣳरु॒द्रस्या॑न्तःपा॒र्श्व्य॑म्महादे॒वस्य॑यकृच्छ॒र्वस्य॑व॒निष्ठुः॑पशु॒पतेः॑पुरी॒तत् ॥ ९ ॥ लोम॑भ्य॒ःस्वाहा॒ ॥ लोम॑भ्य॒ःस्वाहा॑त्व॒चेस्वाहा॑त्व॒चेस्वाहा॒लोहि॑ताय॒स्वाहा॒लोहि॑ताय॒स्वाहा॒मेदो॑भ्य॒ःस्वाहा॒मेदो॑भ्य॒ःस्वाहा॑ ॥ मा॒ꣳसेभ्य॒ःस्वाहा॑मा॒ꣳसेभ्य॒ःस्वाहा॒स्नाव॑भ्य॒ःस्वाहा॒स्नाव॑भ्य॒ःस्वाहा॒स्थभ्य॒ःस्वाहा॒स्थभ्य॒ःस्वाहा॑म॒ज्जभ्य॒ःस्वाहा॑म॒ज्जभ्य॒ःस्वाहा॑ ॥ रेत॑से॒स्वाहा॑पा॒यवे॒स्वाहा॑ ॥ १० ॥ आ॒या

सायुस्वाहां । प्प्रय्यासायुस्वाहांसंय्यासायुस्वाहांव्वियासायुस्वाहो
द्यासायुस्वाहां ॥ शुचेस्वाहाशोचंतेस्वाहाशोचंमानायुस्वाहाशोका
युस्वाहां ॥ ११ ॥ तपंसेस्वाहां ॥ तपंसेस्वाहातप्प्यंतेस्वाहातप्प्यंमा
नायुस्वाहांतप्तायुस्वाहांघर्म्मायुस्वाहां ॥ निष्कृंत्त्यैस्वाहाप्प्रायंश्चि
त्त्यैस्वाहांभेषजायुस्वाहां ॥ १२ ॥ यमायुस्वाहां ॥ यमायुस्वाहान्तं
कायुस्वाहांमृत्त्यवेस्वाहां ॥ ब्रह्मंणेस्वाहांब्रह्महत्त्यायैस्वाहाव्विश्श्वे
भ्योदेवेभ्युँऽस्वाहाद्यावांपृथिवीभ्याꣳस्वाहां ॥ १३ ॥ इति श्रीशु
क्लयजुःसंहितायां दीर्घपाठे एकोनचत्त्वारिंशतितमोऽध्यायः ॥३९॥

ईशावास्यमष्टावंधंतमोनवद्धैसप्तदश ॥ ॐईशाव्वास्यम् ॥ ईशाव्वा
स्यमिदꣳसर्व्वंयत्किञ्चजगंत्त्याञ्जगंत् ॥ तेनंत्त्यक्तेनंभुञ्जीथामागृंधः
कस्यंस्विद्धनंम् ॥ १ ॥ कुर्व्वन्नेव ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छ
तꣳसमाः ॥ एवन्त्वयिनान्यथेतोऽस्तिनकर्म्मलिप्यतेनरे ॥ २ ॥
असुर्य्यानामतेलोकाऽअन्धेनतमसावृंताः ॥ ताँस्तेप्रेत्याभिगच्छ
न्तियेकेचात्त्महनोजनाः ॥ ३ ॥ अनेयदेकंम् ॥ अनेयदेकम्मन
सोजवीयोनैनंद्देवाऽआप्नुवन्पूर्व्वमर्शंत ॥ तद्धावंतोन्यानत्त्येतितिष्ठत्त
स्मिन्नपोमातरिश्वांदधाति ॥ ४ ॥ तदैजति । तन्नैजंतितद्दूरेतद्वन्ति

के ॥ तद॒न्तर॑स्य॒सर्व्व॑स्य॒तदु॒सर्व्व॑स्यास्यबा॒ह्य॒तः ॥५॥ यस्तु ॥ यस्तु
सर्वा॑णिभू॒तान्या॒त्मन्ने॒वानु॒पश्य॑ति ॥ स॒र्व॒भू॒तेषु॑चा॒त्मान॒न्ततो॒नवि
चि॑कित्सति ॥ ६ ॥ यस्मि॒न्त्सर्वा॑णिभू॒तान्या॒त्मैवाभू॑द्विजान॒तः ॥
तत्र॒कोमो॒हः॒कः॒शोक॑ऽएक॒त्वम॑नु॒पश्य॑तः ॥ ७ ॥ सपरि॑ ॥ सपर्य्य॑
गाच्छु॒क्रम॑का॒यम॑व्र॒णम॑स्ना॒विरꣳ॒शु॒द्धमपा॑पविद्धम् ॥ क॒विर्म्म॑नी
षीप॒रि॒भूः॒स्व॒यम्भूर्य्या॑थातथ्य॒तोऽर्था॒न्व्य॒दधाच्छाश्व॒तीभ्यः॒समा॑
भ्यः ॥ ८ ॥ अ॒न्धन्तमः॒ । प्प्रवि॑शन्ति॒येसम्भू॑तिमु॒पास॑ते ॥ ततो॒
भूय॑ऽइव॒तेतमो॒यऽउ॒सम्भू॑त्याꣳरताः ॥ ९ ॥ अ॒न्यदे॒व ॥ अ॒न्यदे॒वा

हुःसं॑म्भ॒वाद॒न्यदा॑हु॒रसं॑म्भवात् ॥ इति॒शुश्श्रु॒म॒धीरा॑ण॒ाञ्ये न॒स्तद्वि॑च
चक्षि॒रे ॥ १० ॥ सम्भू॑तिञ्च । वि॒नाशञ्च॒यस्तद्वेदो॒भयꣳ॑सह ॥ वि॒ना
शेन॑मृ॒त्युन्ती॒र्त्वासम्भू॑त्या॒मृत॑मश्श्नुते ॥ ११ ॥ अ॒न्धन्तम॒ः । प्रावि
शन्ति॒येवि॑द्यामु॒पास॑ते ॥ ततो॒भूय॑ऽइव॒तेतमो॒यऽउ॒विद्याया॑ꣳ॒रताः ॥
॥ १२ ॥ अ॒न्यदे॒व ॥ अ॒न्यदे॒वाहु॒र्वि॑द्याया॑ऽअ॒न्यदा॑हु॒रवि॑द्यायाः ॥ इ
ति॑शुश्श्रु॒म॒धीरा॑णाँ॒ञ्ये न॒स्तद्वि॑चचक्षि॒रे ॥ १३ ॥ वि॒द्याञ्च॑ ॥ वि॒द्याञ्चा
वि॑द्याञ्च॒यस्तद्वेदो॒भयꣳ॑सह ॥ अवि॑द्यया मृ॒त्युन्ती॒र्त्वा वि॒द्यया॒मृत॑म
श्श्नुते ॥ १४ ॥ वा॒यु॒रनि॑लम् ॥ वा॒यु॒रनि॑लम॒मृत॒मथे॒दम्भस्म्मा॑न्तꣳ

शरीरम् ॥ ॐ३म् क्रतोँस्म्मर ॥ क्लिबेस्म्मरं ॥ कृतꣳस्म्मरं ॥१५॥ अग्नेनयं । सुपथांरायेऽअस्म्मान्विश्श्वांनिदेवव्वयुनांनिविद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्विधेम ॥ १६ ॥ हिरण्ण्मयेनपात्त्रेण । सत्त्यास्यापिहितम्मुखम् ॥ योसावादित्त्येपुरुषꣳ सोसावहम् ॥ १७ ॥ ॐ३म् खम्ब्रह्म ॥ १८ ॥ इति श्रीवाजसनेयसंहितायां दीर्घपाठे चत्वारिंशतितमोऽध्यायः ॥४०॥ श्रीवेदपुरुषार्पणमस्तु ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॐनमोभगवतेशङ्कराय ॥ ॥ दशाध्यायेसमाख्यातानुवाकाःसर्वसङ्ख्यया ॥ शतंदशानु

वाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तषष्ठिश्चितोज्ञेयाःसौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत्पंचात्रिंशत्खिलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंव्यधिकंमतम् ॥ ३ ॥ ॥ इति वाजसनेयसंहितायामनुवाकाःसमाप्ताः ॥

॥ श्रीगणेशाय नमः ॥ अथ प्रतिज्ञा ॥ मन्त्रब्राह्मणयोर्वेदनामधेयं तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरित एवं जात्यादयोऽभिहिता ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥

अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेप्येवमथापरांतस्थस्यायुक्तान्यहलः संयुक्तस्योष्मऽकृकारै रेकारसहितोच्चारणमेवं तृतीयांतस्थस्य क्वचिहकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य टुमृतेसंयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥२॥ अथानुस्वारस्यꣳइत्यादेशः शषसहरेफेषु

सू०

तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घौ गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवति ॥ ३ ॥ इति कात्यायनपरिशिष्टसूत्रं समाप्तम् ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अथ वेदपारायणविधिः ॥ ॥ स्थंडिलंकल्पयित्वाग्निमुपसमाधायसंपरिस्तीर्य्याज्येंनैताभ्योदेवताभ्योजुहोतिअग्नयेसोमायेंद्रायविश्वेभ्योदेवेभ्यःऋषिभ्यऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैप्रज्ञायैमेधायैधारणायैश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतये

कांडऋषयेसोमायकांडऋषयेअग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकांडऋषिभ्यःसंहिताभ्योदेवताभ्यउपनिषद्भ्योयाज्ञकीभ्योदेवताभ्यउपनिषद्भ्योवारुणीभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्यऋग्गणेभ्योऽनुमत्यैस्विष्टकृतेचपृथक्स्वाहाकारेणव्याहृतिभिश्चपुनःपरिषिंचति ॥ समाप्तेचैतान्यजुषातर्प्पयति । एवमृग्वेदस्यकांडऋष्यादिवर्ज्यंमास्विष्टकृतस्तेषांस्थानेशतर्चिभ्योमाध्यमेभ्योगृत्समदायविश्वामित्रायवामदेवायात्रयेभरद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगाथेभ्यःपावमानीभ्योदेवताभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नी

भ्यइति ॥ ततोवेदादिमारभ्यसंततमधीयीतेत्याहभगवान्बौधायनः ॥ इति वेदपारायणोपक्रमविधिः ॥ ॥ अथ वेदपारायणे कलशप्रतिष्ठापनादिप्रकारः ॥ तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कलशंसुदृढंतत्र सुनिर्णिक्तं विभूषितम् ॥ पुष्पपल्लवमालाभिश्चन्दनैःकुंकुमादिभिः॥मृत्तिकाभिश्चसंमिश्रंवेदिमध्येन्यसेत्ततः॥ पंचाशद्भिःकुशैःकार्योब्रह्मापश्चान्मुखस्थितः ॥ स्नापितःस्थापितः कुम्भेचतुर्बाहुश्चतुर्मुखः ॥वत्सजान्वाकृतिंदण्डमुत्तराग्रैःकुशैःकृतम्॥ब्रह्मोपधानेदत्त्वातंततःस्वस्त्ययनंपठेत् ॥ प्रतिष्ठांकारयेत्पश्चात्पूजाद्रव्यमथोच्यते ॥

यज्ञोपवीतनैवेद्यवस्त्रचन्दनकुंकुमैः । स्रग्धूपदीपतांबूलैरक्षतैश्चपिता महम् ॥ ब्रह्मयज्ञानमिति वागायत्र्यावाप्रपूजयेत् ॥ उपाध्यायश्चसंपूज्योयथापाठंपठेत्ततः ॥ इति वेदपारायणेकलशप्रतिष्ठापनादिप्रकारः॥

॥ ॥ अथानक्षत्रपारायणविधिः ॥ ॥ अथातोनक्षत्रपारायणविधिं व्याख्यास्यामः ॥ आसमाप्तेर्नाश्नीयात् यथाशक्तिवाऽऽपःपयः फलान्योदनंवाहविष्यमल्पं भुक्त्वातदाशेषमधीयीत ॥ ग्रामात्प्राचीमुदीचींवादिशमुपगम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रदायाज्येनैताभ्योदेवताभ्योजुहोति ॥ अग्नये सोमायेन्द्राय प्रजापतये बृहस्प

तयेविश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यऋग्भ्यो यजुर्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतये अनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये कांडऋषये सोमाय कांडऋषये विश्वेभ्यो देवेभ्यःकांडऋषिभ्यःसाहितीभ्योदेवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्योहव्यवाहाय विश्वेभ्यऋग्गणेभ्य अनुमत्त्यै स्विष्टकृतेच पृथक्स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनःपरिषिञ्चति ॥ समाप्तेचैतायजुषा तर्पयति एवमृग्वेदिकानां कांडऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थाने शतर्चिभ्यो माध्यमेभ्यो

गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्योमहानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य संततमधीयीत ॥ नास्यान्तरानध्यायो नास्यान्तराजननमरणेअशुचीनान्तराव्याहरेन्नान्तराविरमेत् यावदन्तमधीयीत ॥ यद्यन्तराविरमेत्त्रीन्प्राणायामानायम्य प्रणवं वा प्रणिधाय यावत्कालमधीयीत ॥ ततः सर्वं निशोनिशान्तरं संग्रामारण्यसलिलं प्रलोप्यपरिदध्यात् ॥ आदावन्तेच ब्राह्मणभोजनं दक्षिणादानंच दद्यात् ॥ परातेन विधिनावेदमधीयीत सततः पूतोवे

द्रोभवति मनःशुद्धश्चभवति॥द्वाभ्यां पारायणाभ्यां ऋग्भिश्च॥भोजन इहाधीत अनृतेभ्यः प्रमुच्यते॥ त्रिभिर्बहुभ्यः पातकोपपातकेभ्यः शूद्रायां रेतःसिक्त्वागंगासुनिमज्जंश्चभवति॥चतुर्भ्यः शूद्रान्नभोजनात्तसेवनात्तत्स्त्रीसेवनाच्च ॥ पञ्चभिरयाज्ययाजनात्पूतोभवति ॥ अग्राह्यग्रहणादग्राह्याग्रहणादभ्यासोपासनाच्च षड्भिर्ब्राह्मणस्य लोहितकरणात्स्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंप्रयोगाच्च। सप्तभिः प्राजापत्यानांहीनाचरणाद्यज्ञोपवेधनाच्च ॥ अष्टभिश्चान्द्रायणस्यान्तरानाचरणाद्गुरुतल्पगमनाद्द्रजस्वलागमनाच्च ॥ नवभिः

सुरापानाच्च ॥ दशभिरश्रोत्रिययाजनादसोमपानादन्यायतश्च ॥ एकादशभिर्ब्राह्मणहननाद्गर्भहननात् ॥ द्वादशभिःपूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छति पितॄन्स्वर्गलोकं गमयत्यग्निष्टोमादीनृतून्यजाति तैः क्रतुभिरिष्टंभवति ॥ वेदाध्यायी सदैवस्याद्यथावैःसत्यवाक्शुचिः ॥ यंयंकामयतेकामंतंतंवेदेनसाधयेत् । असाध्यं नास्ति यत्किंचिद्ब्रह्मणोहिफलंमहद्ब्रह्मणोहिफलंमहादिति समाप्तौ यजुषातर्पयतीति ॥ समाप्ते वेदपरायणे समाप्ते एतादेवताःपूर्वोक्ताअग्निसोमाद्यजुषातर्पयति यजुर्वेदपरायणे तस्यवेदस्यप्राधान्य

मुच्यते अथवाभूरादिव्याहृतिचतुष्टयात्मकं यजुःशब्देनगृह्यते ॥ तेनैतदुक्तंभवति ॥ भूर्देवांस्तर्पयामीत्यनेनप्रकारेणतर्पयित्वा अग्निसोमादींस्तर्पयेदिति ॥ नास्यांतराजननमरणे ॥ अशुचीइतिनाशुचिहेतुभूतेइत्यर्थः ॥ नांतराव्याहरेदिति ॥ उपक्रांतवेदपारायणमध्ये न व्याहरेन्नाध्यापयेत्तथा लौकिकवचनमपि न ब्रूयात् ॥ विहितं नित्यनैमित्तिकं कर्मानुपयुक्त्वावाक्किं न कुर्यादित्यर्थः ॥ निशोनिशान्तरं संग्रामारण्यसलिलं लोप्यपरिदध्यादिति लोप्यछित्त्वापरिहार्य्यं वर्जयित्वेत्यर्थः इतियावत् ॥ परिदध्यात्समापयेत् ॥ निशान्तरं निशी

थः संध्यावा ॥सलिलं वृष्टिरुदकसमीपभूमिकावा॥निशादिकालान्दशांश्चवर्जयित्त्वा समापयेदित्त्यर्थः ॥ सततः पूतोवेदोभवतीति वेदोभवति वेदात्मको भवति उत्कृष्टज्ञानवान्भवेदित्यर्थः ॥ द्वाभ्यां पारायणाभ्यां ऋग्भिश्चेति ऋग्भिः पावमानीभिः पारायणद्वयं पावमान्यश्चमिलित्त्वोक्तफलायकल्प्येते इत्यर्थः ॥एवमुत्तरत्र पारायणत्रयं गंगास्नानंचामिलित्वा साधनम्॥निमज्जंश्च भवति पूतोभवतीत्त्यर्थः॥ प्रजापत्यानाचरणं प्रक्रान्तप्राजापत्यानामननुष्ठानम् एवं चान्द्रायणस्यानाचरणं यज्ञोपवेधनं यज्ञविनाशः ॥ इत्यनश्नत्पारायणविधिः ॥

Nepal Sanskrit University, Balmecki Campus, Kathmandu

॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥

श्रीगणेशाय नमः ॥ ॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥ ॥ अथातस्त्रैस्वर्यलक्षणंव्याख्यास्यामः॥उदात्तश्चानुदात्तश्चस्वरितश्चतथैवच ॥ लक्षणंवर्णयिष्यामिदैवतंस्थानमेवच ॥ १ ॥ शुक्लमुच्चंविजानीयान्नीचं लोहितमुच्यते ॥ श्यामंतुस्वरितंविद्यादग्निरुच्चेतुदैवतम् ॥ २ ॥ नीचे सोमंविजानीयात्स्वरितेसविताभवेत् ॥ उदात्तंब्राह्मणंविद्यान्नीचःक्षत्रियउच्यते ॥ ३ ॥ वैश्यंतुस्वरितंविद्याद्भारद्वाजमुदात्तकम् ॥ नीचं गौतमामित्याहुर्गार्ग्यंचस्वरितंविदुः ॥ ४ ॥ विद्यादुदात्तंगायत्रंनीचंत्रैष्टुभमुच्यते ॥ जागतंस्वरितंविद्यादतएवंनियोगतः ॥ ५ ॥ गांधर्ववेद

येप्रोक्ताःसप्तषड्जादयःस्वराः ॥ तएववेदेविज्ञेयास्त्रयउच्चादयःस्वराः
॥ ६ ॥ उच्चौनिषादगांधारौनीचौऋषभधैवतौ ॥ शेषास्तुस्वरिताज्ञे
याःषड्जमध्यमपंचमाः ॥ ७ ॥ षड्जोवेदेशिखंडीस्याहृषभःस्याद
जामुखे ॥ गावोरटंतिगांधारंक्रौंचाश्चैवतुमध्यमम् ॥८॥ कोकिलःपञ्च
मोज्ञेयोनिषादंतुवदेद्गजः ॥ आश्वश्चधैवतोज्ञेयःस्वराःसप्तेतिगीयते
॥ ९ ॥ निमेषमात्रःकालःस्याद्विद्युत्कालस्तथापरे ॥ अक्षरात्तुल्ययो
गाच्चमतिःस्यात्सोमशर्मणः ॥१०॥ सूर्यरश्मिप्रकाशाद्याकणिकायत्र
दृश्यते ॥ आणवस्यतुसामात्रामात्राचचतुराणवा ॥ ११ ॥ मानसेचा

णवंविंद्यात्कण्ठेविंद्याद्विराणवम् ॥ त्रिराणवंतुजिह्वाग्रेनिस्सृतंमात्रिकंविदुः ॥ १२ ॥ अवग्रहेतुकालःस्यादर्धमात्राप्रकीर्त्तिता ॥ पदयोरंतरेकालएकमात्राविधीयते ॥१३॥ ऋचोर्द्धंतुद्विमात्रःस्यात्त्रिमात्रःस्याद्दगंतके ॥ रिक्तंतुपाणिमुत्क्षिप्यद्वेमात्रेधारयेद्बुधः ॥१४॥ एकमात्रोभवेद्ध्रस्वोद्विमात्रोदीर्घउच्यते ॥ त्रिमात्रस्तुप्लुतोज्ञेयोव्यंजनश्चार्द्धमात्रकम् ॥ १५ ॥ विवृतौचावसानेचऋचोर्द्धंचतथापरे ॥ पदेचपादसंस्थानेशून्यहस्तंविधीयते ॥ १६ ॥ प्रणवंतुप्लुतंकुर्याद्व्याहृतीर्मातृकाविदुः ॥ चाषस्तुवदतेमात्रांद्विमात्रांवायसोऽब्रवीत् ॥१७॥ शिखीव

देत्रिमात्रांवैमात्राणामितिसंस्थितिः ॥ वर्णोजातिश्चमात्राचगोत्रंछं
न्दश्चदैवतम् ॥ १८ ॥ एतत्सर्वंसमाख्यातंयाज्ञवल्क्येनधीमता ॥ ह
स्तौतुसंयतौधार्यौजानुभ्यामुपरिस्थितौ ॥ १९ ॥ गुरोरनुमतंकुर्या
त्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागेतृतीयेतुकरंविन्यस्यदक्षिणम् ॥२०॥
प्रसन्नमानसोभूत्वाकिंचिन्निम्नमधोमुखम् ॥ प्रणवंप्राकप्रयुञ्जीतव्या
हृतीस्तदनंतरम् ॥ २१ ॥ सावित्रींचानुपूर्व्येणततोवेदान्समारभेत् ॥
कूर्मोङ्गानीवसंहृत्यचेष्टांदृष्टिंदृढंमनः ॥२२॥ स्वस्थःप्रशांतोऽनिर्भीको
वर्णानुच्चारयेद्बुधः ॥ नाभ्याहन्यान्नानहन्यान्नगायेन्नैवकंपयेत् ॥२३॥

यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयन् ॥ निवेश्यदृष्टिंहस्ताग्रेशास्त्रा
र्थमनुचिन्तयेत् ॥ २४ ॥ सममुच्चारयेद्वर्णान्हस्तेनचमुखेनच ॥
स्वरश्चैवतुहस्तश्चद्वावेतौयुगपत्स्थितौ ॥२५॥ हस्तभ्रष्टःस्वरभ्रष्टोनवे
दफलमश्नुते ॥ नकरालोनलंबोष्ठोनाव्यक्तोनानुनासिकः ॥ २६ ॥ गद्ग
दोबद्धजिह्वश्चनवर्णान्वक्तुमर्हति ॥ प्रकृतिर्यस्यकल्याणीदंतोष्ठौयस्य
शोभनौ ॥ २७ ॥ प्रगल्भश्चविनीतश्चसवर्णान्वक्तुमर्हति ॥ शंकितंभीत
मुद्घुष्टमव्यक्तमनुनासिकम् ॥ २८ ॥ काकस्वरंमूर्ध्निगतंतथास्थानवि
वर्जितम् ॥ विस्वरंविरसंचैववाविश्लिष्टंविषमाहतम् ॥ २९ ॥ व्याकुलंता

लहीनंचपाठदोषाश्चतुर्दश ॥ संहितास्वास्वबहुलःपदसंज्ञासमाकुलः ॥
॥ ३० ॥ क्रमसंधिसमाकीर्णोदुस्तरोमंत्रसागरः ॥ ऋक्संहितांत्रिर
भ्यस्ययजुषांवासमाहितः ॥ ३१ ॥ साम्नांवासरहस्यांचसर्वपापैःप्रमु
च्यते ॥ संहितानयतेसूर्यंपदंचशशिनःपदम् ॥ ३२ ॥ क्रमश्चनयतेसू
क्ष्मंयत्तत्पदमनामयम् ॥ कालिंदीसंहिताज्ञेयापदयुक्तासरस्वती ॥
॥ ३३ ॥ क्रमेणावर्त्ततेगंगाशंभोर्वाणीतुनान्यथा ॥ यथामहाह्रदंप्राप्य
क्षिप्तोलोष्टोविनश्यति ॥ ३४ ॥ एवंदुश्चरितंसर्वंवेदेत्रिवृतिमज्जति ॥
आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतःप्रातरुत्था

यभक्षयेद्दंतधावनम् ॥३५॥ खदिरश्चकदंबश्चकरवीरकंरजकौ ॥ एतेकंटकिनःपुण्याःक्षीरिणस्तुयशस्विनः ॥ ३६ ॥ तेनास्यकरणेसूक्ष्मं माधुर्यंचैवजायते ॥ त्रिफलांलवणाक्तांवैभक्षयेच्छिष्यकःसदा ॥ क्षीणमेधाजनन्येषास्वरवर्णकरीतथा ॥ ३७ ॥ हस्तहीनंतुयोधीतेमंत्रंवेदविदोविदुः ॥ यजूꣳषिनोसाधयंतिभुक्तमव्यंजनंयथा ॥ ३८ ॥ हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितम् ॥ ऋग्यजुस्सामभिर्दग्धोवियोनिमधिगच्छाति ॥ ३९ ॥ ऋचोयजूꣳषिसामानिहस्तहीनानियःपठेत्॥ अनृचोब्राह्मणस्तावद्यावत्स्वारंनाविंदति ॥ ४० ॥ ज्ञातव्यश्चतथैवा

थर्वेदानांकर्मसिद्धये ॥ पठन्मात्रापपाठात्तुपंकेगौरिवसीदति ॥४१॥
स्वरवर्णप्रयुंजानोहस्तेनाधीतमाचरन् ॥ ऋग्यजुस्सामभिःपूतोब्रह्म
लोकमवाप्नुयात् ॥ ४२ ॥ नकुर्वीतपदंदीर्घंनकुर्वीतविलंबितम् ॥ पद
स्यग्रहमोक्षौचयथाशीघ्रगतिर्हयः ॥ ४३ ॥ आगमंकुरुयत्नेनकार
णंहितदात्मकम् ॥ आस्येनचशयंकुर्यात्पठन्नान्यमतिर्भवेत् ॥ ४४ ॥
नचास्यमुष्टिबंधीस्यान्नचात्युत्तममाचरेत् ॥ चुलुनौँकास्फुटोदंडीस्व
तिकोमुष्टिराकृतिः ॥ एतेवैहस्तदोषाःस्युःपरशुश्चैवसप्तमः ॥ ४५ ॥
यथावाणीतथापाणीरिक्तंतुपरिवर्जयेत् ॥ यत्रयत्रास्थितावाणीपाणि

स्तत्रैवातिष्ठति ॥ ४६ ॥ यथाधनुष्याविततेशरेक्षिप्तेपुनर्गुणः ॥ स्व
स्थानंप्रतिपद्येततद्वद्धस्तगतःस्वरः ॥ ४७ ॥ उत्तानंसोन्नतंकिंचित्सु
व्यक्तांगुलिरंजितम् ॥ स्वराविद्धंकरंकुर्यात्प्रादेशोद्देशगामिनम् ॥४८॥
अंगुष्ठस्योत्तरेपर्वैतर्जन्युपरियद्भवेत् ॥ प्रादेशस्यतुसोद्देशस्तन्मात्रं
चालयेत्करम् ॥४९॥ मनुष्यतीर्थोर्ध्वंकृत्वापितृतीर्थोदकंव्रजेत् ॥ ना
मितंकरपृष्ठेतुसव्यक्तांगुलिमोक्षणम् ॥ ५० ॥ स्वारितेत्र्यंगुलंविद्यान्नि
पातेतुषडंगुलम् ॥ उत्थानेतुनवांगुलल्यमेतत्स्वारस्यलक्षणम् ॥५१॥
अभ्यासार्थेद्रुतांवृत्तिंप्रयोगार्थेतुमध्यमाम् ॥ शिष्याणामुपदेशार्थेकु

यांद्धृत्तिंविलंबिताम् ॥ ५२ ॥ ऐंद्रीतुमध्यमावृत्तिःप्राजापत्याविलंबि
ता ॥ अग्निमारुतयोर्वृत्तिःसर्वशास्त्रेषुनिंदिता ॥ ५३ ॥ मुष्ट्याकृति
र्मकारेतुनकारेतुनखाग्रतः ॥ अनुस्वारेंगुष्ठपातऊष्मांतेंगुलिमोक्षणम्
॥ ५४ ॥ उदात्तंभुविपातेनप्रचयंनोग्रएवच ॥ शेषंषडंगुलंविंद्यान्नि
चितंतुविधीयते ॥ ५५ ॥ षडंगुलंतुजात्यस्यहस्तस्यानुपथस्यच ॥
तच्चतुर्भागमात्रंतुहस्तस्तेनैववर्तयेत् ॥ ५६ ॥ ककारांतेटकारांतेङ
णेचांगुलिनामयेत् ॥ पंचांगुल्यमकारेतुतकारेकुण्डलाकृतिः ॥५७॥
ऊर्ध्वक्षेपाच्चयोष्माच्चअधःक्षेपाच्चयोभवेत् ॥ एकैकामुत्सृजेद्धीरःस्व

रितेतूभयंक्षिपेत् ॥ ५८ ॥ अंगुष्ठाकुंचनंलघावनुस्वारेत्वपाꣳरसम्॥
दीर्घेरंगेचतर्जन्याःप्रसारःपरिकीर्तितः ॥ ५९ ॥ तर्जन्यंगुष्ठयोःस्पर्शे
प्युदात्तंप्रतिविद्यते ॥ नीचंतुमध्यमंकुर्याच्छेषंनीचतरंक्रमात् ॥६०॥
स्वरितंयद्भवेत्किंचिद्धकारसहसंयुतम् ॥ ऊष्माणंतद्विजानीयान्निक्षि
पेदुभयोरपि ॥ ६१ ॥ स्वरितसंज्ञेचानिक्षिप्तेसंयोगोयत्रदृश्यते ॥ द्वि
मात्रिकेभवेदेकमात्रिकेतूभयंक्षिपेत् ॥ ६२ ॥ जात्येचस्वरितेचैवव
कारोयत्रदृश्यते ॥ कर्तव्यस्तूभयोःक्षेपोवायव्यइतिदर्शनम् ॥ ६३ ॥
शृंगवद्धाथवत्सस्यकुमारीकुचयुग्मवत् ॥ उभक्षेपस्वरोयत्रसाविसर्ग

उदाहृतः ॥६४॥ विसर्गांतस्वरोयत्रस्वरितोयत्रदृश्यते ॥ दीर्घश्चैवतुकारश्चतत्रोभक्षेपउच्यते ॥ ६५ ॥ त्रिविधस्तुभवेदूष्माप्रचिताबलकातरा ॥ स्वरितेप्रचिताविद्यान्निपातेबलकांविदुः ॥ ६६ ॥ उत्थानेतुतथाताराएताभिस्त्रिभिरूष्मभिः॥ मात्रामात्रांविदित्वातुततःक्षेपंप्रयोजयेत् ॥ ६७ ॥ अक्षरंभजतेकाचित्काचिद्वृत्तेप्रतिष्ठितम् ॥ समानेजातिकाकाचित्काचिदूष्माप्रदायिका ॥ ६८ ॥ यथाबालस्यसर्पस्यउच्छ्वासोलघुचेतसः ॥ एवमूष्माप्रयोक्तव्याहकारपरिवर्जितः ॥६९॥ विवृतिंप्रत्ययादूष्मांप्रवदंतिमनीषिणः ॥ तामेवप्रतिषेधंतिआईऊए

निदर्शनम् ॥७०॥ अष्टौस्वरान्प्रवक्ष्यामितेषामेवतुलक्षणम् ॥ जात्यो
भिनिहितःक्षैप्रःप्रश्लिष्टश्चतथापरः ॥७१॥ तैरोव्यञ्जनसंञ्ज्ञश्च तथा तै
रोविरामकः॥पापवृत्तोभवेत्तद्वत्तथाभाव्यइतिस्वराः ॥७२॥एकपदेनी
चपूर्वःसयवोजात्यइष्यते।अपूर्वोऽपिपरस्तद्वद्धान्यंकन्यास्वरित्यपि ॥
एकपदइत्याह ॥ नीचपूर्वःसयकारवकारौवाजात्यःस्वरितोभवति ॥
यथाजात्यंमनुष्यानिति।सुप्वेति।चम्वीव।धान्यम् । कन्याइव।स्वः ।
वीर्यं । एवं ह्याहयानिचान्यानीदृग्लक्षणानिपदानिभवंति । एओआभ्या
मुदात्ताभ्यामकारोरिफितश्चयः ॥अकारोयत्रलुप्येततंचाभिनिहितंवि
दुः॥७३॥यथा कुक्कुटः+असि। कुक्कुटोसि । वेदः+असि। वेदोसि। भागः

आसि+भागोसि। मारुतः+असि। मारुतोसि । श्वात्रः+असि। श्वात्रोसि।ते+अप्सरसाम्। तेप्सरसाम्।ते+अवंतु। तेवंतु।कः+असि।कोसि। सः+अहम् । सोहम् । एवꣳह्याहयानिचान्यानिईदृग्लक्षणानिपदानि भवंति। इउवर्णौयदोदात्तावापद्येतेयवौक्वचित् ॥ अनुदात्तेपदेनित्यंविद्यात्क्षैप्रस्यलक्षणम्॥७४॥यथा त्रि+अंबकम् । त्र्यंबकम् । द्रु+अन्नः । द्र्वन्नः । वीडु+अंगः । वीड्वंगः । वाजी+अर्वन् । वाज्यर्वन् । एवꣳह्याहयानि० ॥ इकारोयत्रदृश्येतइकारेणैवसंयुतः॥उदात्तश्चानुदात्तेनप्रश्लिष्टो भवतिस्वरः॥७५॥ अभि+इन्धताम् । अभीन्धताम् । अभि+इमम् ।

अभीमम् । वि+इहि । वीहि । स्रुचि+इव । स्रुचीव । चम्वी+इव । चम्वीवेति । एवंꣳह्याहयानि चान्यानि ०॥ उदात्तपूर्वंयत्किंचिच्छंदसिस्वरितंपदम्॥ एषसर्वंबहुस्वारस्तैरोव्यंजनउच्यते॥७६॥ इडे। रंते। हव्ये। काम्ये । चंद्रे। ज्योते । आदिति । सरस्वता । माहि । विश्रुतीतिभवंति । एवंꣳह्याहयानि० भवंति ॥ अवग्रहात्परोयस्तुस्वरितःस्यादनंतरम् ॥ तैरोविरामंतंविद्यादुदात्तोयद्यवग्रहः ॥ ७७ ॥ यथागोमदितिगो+मत् । गोपतावितिगो+पतौ । प्रप्रेतिप्र+प्र । विततेतिवि+तता । सामिद्धेतिसम् +इद्धः । एवंꣳह्याहयानि० भवंति ॥ स्वरेति

स्वरितेचैवविवृतिर्यत्रदृश्यते ॥ पादवृत्तोभवेत्स्वारःश्वित्रआदित्येति निदर्शनम् ॥ श्वित्रः+आदित्यानाम् ॥ श्वित्र आदित्यानाम् । पुत्रः+ईधे । पुत्रईधे । दात्रे+एधि । दात्रएधि । कः+ईम् कईम् । ताः+अस्य । ताअस्य । एवꣳह्याहयानि० ॥ उदात्ताक्षरयोर्मध्येभवेन्नीचस्त्ववग्रहः ॥ तथाभाव्यंभवेत्कंपंस्तनूनप्त्रेतिनिदर्शनम् ॥ ७८ ॥ यथातनूनप्त्रइति तनू+नप्त्रे । तनूनपादिति तनू+नपात् । तनूनपातमिति तनू नपातम् । एवꣳह्याहयानिपदानिलक्षणानिभवंति ॥ इत्यष्टपदसमाम्नायेवैशोषिकेयाज्ञवल्क्यवचनानांपदानांपाठःसमाप्तः ॥

माध्यंदिनविरोधिःस्यात्तथाभाव्यस्तुयःस्मृतः ॥ स्वरोनैवात्रदृश्येताभिन्नोदात्तानुदात्तकौ ॥ १ ॥ स्वराःस्पर्शांताःस्थोष्माणः ॥ कण्ठ्य-जिह्वामूलीय-तालव्य-मूर्धन्य-दंत्य-ओष्ठ्य-यम-विसर्जनीयनिपाताद्याश्चकिंवर्णदैवत्यलिंगाः । स्मराः शुक्लाः नानादैवत्याः । स्पर्शाः कृष्णाः । कपिलाअंतस्थाः । ऊष्माणोऽरुणाः । नीलायमाः । हरितानासिक्याः । पीतोनुस्वारः । रक्तोजिह्वामूलीयः । पीतउपध्मानीयः । श्वेतोविसर्जनीयः । शबलोरंगः । नीलोनुनासिक्यः । इत्यंतर्मध्यमयोर्नासिक्यंविद्यात् ॥ द्विरुदात्ताख्याइतिस्मृतः । उदमनुद

निपातेआद्येचोपसर्गैनाम्नाख्यातेचोपसर्गनिपाताश्चेति । किंदैवत्या अक्षराणांचकेपुरुषाः । काःस्त्रियः । कानिनपुंसकानिइत्यत्रब्रूमः । कंठ्याआग्नेयाः । अकारादयः । जिह्वामूलीयानैर्ऋत्याःककारादयः । तालव्याः सौम्याश्चचकारादयः । वायंव्यामूर्धन्याष्टकारादयः । रौद्रादंत्यास्तकारादयः । औष्ठ्याआश्विन्याः पकारादयः । शेषावैश्वदेवाः । अंइत्येवमादयः ॥ स्वरास्तुब्राह्मणाज्ञेयावर्गाणांप्रथमाश्चये ॥ द्वितीयाश्चतृतीयाश्चचतुर्थाश्चापिभूमिपाः ॥ २ ॥ वर्गाणांपंचमावैश्याअंतस्थाश्चतथैवच ॥ ऊष्माणश्चहकारश्चशूद्राएवप्र

कीर्तिताः ॥ ३ ॥ शुक्लवर्णानिनामानिआख्यातारोहितामताः ॥ कपिंजलास्तूपसर्गाःकृष्णाश्चैवनिपातकाः ॥ ४ ॥ भार्गवगोत्राणिनामानिभारद्वाजाआख्याताः ॥ वासिष्ठाउपसर्गास्तुनिपाताःकाश्यपाःस्मृताः ॥ पीतवर्णश्चोपसगाँनिपातःकृष्णवर्णकः ॥ सवँतुसौम्यमाख्यातंवायव्यंनामदृश्यते ॥ आग्नेयस्तूपसर्गःस्यान्निपातोवारुणःस्मृतः ॥ ५ ॥ प्रथमाश्चतथांतस्थाःस्त्रीलिंगाःपरिकीर्तिताः ॥ शेषाक्षराणिषंढानिप्राहुर्लिँगाविवेचकाः ॥ ६ ॥ नाम्नामिंद्रोदेवतावरुणउपसर्गाणामादित्यःसर्वस्याक्षरगणस्यस्वराविसर्जनीयोयमाश्चपुँ

ल्लिंगाः । ङञणनमायरलवाः स्त्रीलिंगाः । शेषाण्यक्षराणिनपुंसकलिंगानीति ॥ संधिश्चतुर्विधोभवतीति ॥ लोपागमौवर्णविकारः प्रकृतिभावश्चेति । तद्यथा तत्रलोपोभवति अयक्ष्माः+मा अयक्ष्मामा । शततेजाः+वायुः शततेजावायुः । तिग्मतेजाः+द्विषतः । तिग्मतेजाद्विषतः । इतिलोपः॥आगमोभवति यथा प्रत्यङ्+सोमः प्रत्यक्सोमः। प्राक्सोमःप्राङ्+सोमः।अस्मान्+सीतिअस्मान्त्सीति।त्रीन्+समुद्रान् त्रीन्त्समुद्रान्। इतिआगमः॥विकारोभवति आ+इदम् एदम्। आ+इमे एमे । आ+इष्टयःएष्टयः । प्र+इषितः प्रेषितः । इतिविकारः॥प्रकृति

भावः यथा आशुः शिशानः । युञ्जानःप्रथमम् । अदितिःषोडशाक्षरेण । देवोवःसविता । इतिप्रकृतिभावः ॥ आकाशस्थायथाविद्युत्स्फुटितामणिसूत्रवत् ॥ एषच्छेदोविवृत्तीनांयथाबालेषुकर्तरी ॥ ७ ॥ द्वयोस्तुस्वरयोर्मध्येसंधिर्यत्रनदृश्यते ॥ विवृत्तिस्तत्रविज्ञेयायईशेतिनिदर्शनम् ॥ ८ ॥ पिपीलिकापाकवतीतथावत्सानुसारिणी ॥ वत्सानुसंसृताचैवचतस्रस्तुविवृत्तयः ॥ ९ ॥ पंचरंगाःप्रवर्तंतेघातनिर्घातवज्रिणः ॥ अहरप्रहरोज्ञेयअइउऋओइतिनिदर्शनम् ॥ १० ॥ पिपीलिकाआद्यंतदीर्घानाभ्याआसीदितिनिदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वा

विनइन्द्रेतिनिदर्शनम् ॥ ११ ॥ अन्तेचवत्सानुसृजतातानेत्यसौआ
वोढमाश्विनेतिनि०॥वत्सानुसारिणीचादौदीर्घाताअस्येतिनि०॥१२॥
करिणीकुर्विणीचैवहरिणीहारिणीतिच ॥ तथाहंसपदानामपंचैताःस्व
रभक्तयः ॥ १३ ॥ करिणीरहयोर्योगेकुर्विणीलहकारयोः ॥ हरिणीर
षयोर्योगेहारितांऋषकारयोः ॥ १४ ॥ यातुहंसपदानामसातुरेफष
कारयोः ॥ हरिणीहरयोर्विद्यात्कुर्विणीलहकारयोः ॥ १५ ॥ देवंबर्हि
रितिकरिणीउपह्वरेतिकुर्विणी ॥ हरिणींअरेषसइत्याहुर्हारिणीशत
वल्हेतिच ॥ १६ ॥ वर्षांवर्षीयतेसीतितथाहंसपदेतिच ॥ स्वरभक्तिं

प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारंचाप्युकारंचग्रस्तदोषंतथैवच ॥ एतल्लक्षणमाख्यातंयाज्ञवल्क्येनधीमता ॥ १८ ॥ सम्यक्पाठस्यासिद्ध्यर्थंशिष्याणांहितकाम्यया ॥ अर्धमात्रास्वरंकिंचित्पृथङ्न्यूनमिवोच्चरन् ॥ ऋकारेतुहकारस्यहृत्कंठमनसापिच ॥ १९ ॥ नैतत्स्वरितपूर्वांगेनापरांगेकथंचन ॥ नस्वरेनचमात्रायांकथंस्वारोविधीयते ॥ २० ॥ परांगस्यतुयत्पूर्वंपूर्वांगस्यतुयत्परम् ॥ उभयार्द्धार्द्धंसंयोगेस्वारंकुर्याद्विचक्षणः ॥ २१ ॥ संयोगेतुपरंस्वार्थंपरंसंयोगनायकम् ॥ संयुक्तस्यतुवर्णस्यनस्वार्थंपूर्वमक्षरम् ॥ २२ ॥ उदात्ताद

नुदात्तेतुवामायाभ्रुवआरभेत् ॥ उदात्तात्स्वरितोदात्तौक्रमाद्दक्षिणतो
न्यसेत् ॥ २३ ॥ स्वरितादनुदात्तायेप्रचयांस्तान्प्रचक्षते ॥ एकस्व
रानपिचतानाहुस्तत्त्वार्थचिंतकाः ॥ २४ ॥ प्रचयोयत्रदृश्येततत्रह
न्यात्स्वरंबुधः ॥ स्वरितःकेवलोयत्रमृदुस्तत्रानिपातयेत् ॥ २५ ॥ दु
र्बलस्ययथाराष्ट्रंहरतेबलवान्नृपः ॥ एवंव्यंजनमासाद्यअकारोहरते
स्वरम् ॥ २६ ॥ उच्चादुच्चतरंनास्तिनीचान्नीचतरंतथा ॥ अक्षरात्तु
ल्ययोगाच्चनीचेनिचगतानिच ॥ २७ ॥ स्वरउच्चःस्वरोनीचःस्वरः
स्वरितएवच ॥ स्वरप्रधानैस्तैःस्वार्यंव्यंजनंतेनसस्वरम् ॥२८॥ व्यंज

नान्यनुवर्ततेयत्रातिष्ठतिसस्वरः ॥ स्वरप्रधानंत्रैस्वर्यंआचार्याःप्रवदं
तिहि ॥२९॥ मणिवद्व्यंजनंविद्यात्सूत्रवच्चस्वरंविदुः ॥ आचार्याःसम
मिच्छंतिपदच्छेदंतुपंडिताः ॥३०॥ स्त्रियोमधुरमिच्छंतिविकृष्टमित
रेजनाः ॥ उदात्तंनानुवर्ततेनीचंनस्वरितंतथा ॥३१॥ विस्वरंतंविजा
नीयाद्दीर्घह्रस्वविवर्जितम् ॥ हरिवरुणवरेण्येषुधारहिपुरुषेषुच ॥ वैश्वा
नरोनकारे च शेषास्तु स्वरितानराः ॥ स्वरितेरेफवैश्वानरोनकारःशे
षाकारःस्वरितानराः ॥ ३२ ॥ द्वौवरुणौचस्वरितौउदुत्तमंत्वंवरुण ॥
धारेचैवोरुधारेतुपुरुधारेचदोहने ॥ मात्रिकंवाद्विमात्रंवास्वरितंयदि

हाक्षरम् ॥ तस्यादितोर्द्धमात्रावैशेषंचपरतोभवेत् ॥३३॥ नकारांतेपदे पूर्वैश्मश्रुभिःपरतःस्थिते॥ छकारंनप्रयुंजीतत्रशसंधिसमुच्चरेत्॥३४॥ ओकारंप्लुतविज्ञेयंप्लुतमग्नाद्वितीयकम् ॥ लाजींछाचींतृतीयंचविवेशंतिचतुर्थकम् ॥ ३५ ॥ अधःस्विदासीत्पंचमंचोपरिस्विदासीच्चषष्ठकम् ॥ सप्तमंतुभ्रुवोस्मारअष्टमंनैवविद्यते ॥ ऌकारस्यतुदीर्घत्वंनास्ति वाजसनेयिनः॥३६॥ उच्चस्थानगतेह्रस्तेस्वरितंनोपपद्यते ॥ अधस्तातुयदागच्छेत्स्वरितंनतदाभवेत् ॥ कचटतपाहृश्यंतेसंधिस्थानेषुनित्यशः ॥ स्ववर्गेणैवसंयुक्तामोक्षंकुर्वीततत्रवै ॥ तकारांतेपदेपूर्वैसका

रेपरतःस्थिते ॥ प्रत्यारंभंनकुर्वीतपापावितिनिदर्शनम् ॥ ककारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ खसवर्णंविजानीयाद्भिखक्सेतिनिदर्शनम् ॥ तकारांतेपदेपूर्वेचवर्गेपरतःस्थिते ॥ मोक्षंतत्रचकुर्वीतयच्चपापौनिदर्शनम् ॥ ङकारांतेपदेपूर्वेसकारेपरतः स्थिते ॥ कसवर्णंविजानीयात्प्राङ्सोमेतिनिदर्शनम् ॥ टकरांतेपदेपूर्वेसकारेपरतःस्थिते ॥ टसवर्णंविजानीयात्संम्राट्संभृतेतिनिदर्शनम् ॥ तकारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ छसवर्णंविजानीयात्तत्सावितुरितिनिदर्शनम् ॥ नकारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ तसवर्णंविजानीयात्त्रीन्त्समुद्रेतिनिदर्शं

ःम् ॥ पकारांतेपदेपूर्वेंशकारेपरतःस्थिते ॥ छासवर्णंविजानीयादनुष्टु
प्छारदीतिनिदर्शनम्॥ मकारांतेपदेपूर्वेंसवर्णेंपरतःस्थिते॥ मसवर्णंवि
जानीयादिमम्मेतिनिदर्शनम्।।वर्णेंतुमात्रिकेपूर्वेंअनुस्वारोद्विमात्रिकः
द्विमात्रेमात्रिकोज्ञेयःसंयोगाद्यस्ययोभवेत्।। अनुस्वारोद्विमात्रः स्या
द्वर्णव्यंजनादिगः।।ह्रस्वाद्धायादिवादीर्घाद्देवानाꣳहृदयेभ्यइति ॥ अ
नुस्वारस्योपरिष्टात्संवृतंयत्रदृश्यते। दीर्घंतंतुविजानीयाच्छ्रोताग्रावा
णेतिनिदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगोयत्रदृश्यते ॥ ह्रस्वंतंतु
विजानीयात्सꣳस्थेतिनिदर्शनम् ॥ अनुस्वारश्चयोदीर्घादक्षराद्योभवे

त्परः॥सतुह्रस्वइतिज्ञेयोमँत्रेष्वेवविभाषया ॥ ओभावश्चाविवृत्तिश्चशषसारेफएवच ॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः ॥ यद्योभावप्रसंधानमुकारादिपरंपदम् ।स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥ उभावादुत्थितश्चोष्मातांतुकेलिंविनिर्दिशेत् ॥ विवृत्तंप्रातियाऊष्माविज्ञेयाविकटानना ॥ लीढातिलीढविद्युच्चशषसेषुप्रकीर्तिताः ॥ जिह्वामूलेचरेफेचविज्ञेयाविठकाशठा ॥ उपध्मानीयसहितांपुष्पिणींतांविनिर्दिशेत्॥अन्यत्रयोभवेदूष्मासुलभांतांविनिर्दिशेत्॥ पादाद्यंतंपदाद्यंतंतथावग्रहकालिकम् ॥ ईषत्स्पृष्टंविजानीयात्तस्मिन्कालेतुकारयेत् ॥

पादादौचपदादौचसंयोगावग्रहेषुच ॥ जःशब्दइतिविज्ञेयोयोन्यःसय
इतिस्मृतः ॥ उपसर्गपरोयस्तुपदादिरपिदृश्यते ॥ ईषत्स्पृष्टंयथावि
द्युतपदच्छेदात्परंभवेत् ॥ त्वदर्थवाचिनौवोवांवावेयादिनिपातजौ॥आ
देशश्चविकल्पार्थाईषत्स्पृष्टाइतिस्मृताः ॥ विभाषयायेकारःस्यात्तथा
नेतिपदात्परः॥भ्रवतीत्यपिपूर्वैंवतथाचसपदादपि ॥ यदेवलक्षणंयस्य
वकारस्यापितद्भवेत् ॥ यत्रयत्रविशेषःस्यादिदानींससकथ्यते ॥
वकारस्त्रिविधःप्रोक्तोगुरुर्लघुर्लघूतरः ॥ आदौगुरुर्लघुर्मध्येपदांतेचल
घूतरः ॥ यवर्णस्त्रिविधःप्रोक्तोगुरुर्लघुर्लघूतरः ॥ आदौगुरुर्लघुर्मध्ये

पदांतेतुलघूतरः ॥ उपांशुस्वरितंचैवयोधीतेवित्रसन्नपि ॥ अपिरूपस
हस्राणांसंदेहेषुप्रवर्तते ॥ पंचाविद्यांनगृह्णंतिजडास्तब्धाश्चयेनराः ॥ अल
साश्चैवरोगाश्चयेषांचविस्मृतंमनः ॥ अहेरिवगणाद्भीतःसंमानान्नर
कादिव ॥ राक्षसीभ्यइवस्त्रीभ्यःसविद्यामधिगच्छति ॥ नभोजनवि
लंबीस्यान्नचनारीनिबंधनः ॥ सुदूरमपिविद्यार्थीव्रजेद्गरुडहंसवत् ॥
यथाखनन्खनित्रैंणनरोवार्यधिगच्छति ॥ तथागुरुगतांविद्यांशुश्रूषुर
धिगच्छति ॥ सुखार्थीचेत्त्यजेद्विद्यांविद्यार्थीचेत्त्यजेत्सुखम् ॥ सुखि
नश्चकुतोविद्यासुखंविद्यार्थिनःकुतः ॥ गुणिताशतशोविद्यासहस्रावर्ति

तापुनः॥ आगमिष्यातिजिह्वाग्रेस्थलान्निम्नमिवोदकम्॥ शतेनगुणिता
विद्यासहस्रेणचातिष्ठति॥शतानांचसहस्रेणप्रत्यंचदवतिष्ठति॥ जलम
भ्यासयोगेनाशिलायांकुरुतेक्षयम्॥ कर्कशानांमृदुस्पर्शंकिमभ्यासा
न्नसाध्यते॥ गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा॥ अथवाविद्ययावि
द्याचतुर्थंनोपलभ्यते॥ शुश्रूषारहिताविद्याह्यल्पमेधागुणैः सह॥
वंध्याचयौवनीतस्यानविद्याफलिनीभवेत्॥ हयानामिवजात्यानाम
र्धमात्रार्द्धशायिनाम्॥ नहिविद्यार्थिनांनिद्राचिरंनेत्रेषुतिष्ठति॥
यथा पिपीलिकैःपांसुर्वल्मीकंक्रियतेमहत्॥ नतत्रबलसामर्थ्यमुद्य

मस्तत्रकारणम् ॥ अंजनस्यक्षयंदृष्ट्वावल्मीकस्यतुसंचयम् ॥ अवंध्यांदिवसंकुर्याद्दानाध्ययनकर्मसु ॥ अत्रव्यंजनयोर्मार्गौतृतीयमुद्कस्यच ॥ वायोःसंचारणार्थायचतुर्थमुपकल्पयेत् ॥ हकारंपंचमैर्युक्तमंतस्थैश्चापिसंयुतम् ॥ औरसंतंविजानीयात्कंठ्यमाहुरसंयुतम् ॥ हकारोयत्रपूर्वस्थोअन्तस्थाद्योभवेत्परः ॥ पदकालेवियुज्येतसंहितायांसऔरसः ॥ मेघदुंदुभिनिर्घोषोज्ञायतेपयसोहृदात् ॥ एवंनादंप्रयोकव्यांसिंहस्यहृदितंयथा ॥ मासेभाद्रपदेमेघाःशब्दंकुर्वंतियादृशम् ॥ एवंगह्वरमासाद्यशुभंदुंदुहेतिदर्शनम् ॥ शेषाणांवानरायुद्धमुत्पतंति

पतीतिच ॥ एवंवर्णाःप्रयोक्तव्याइहैहैपातिदर्शनम् ॥ यथापुत्रवतीह्येषासुंवतेनिजमौरसम् ॥ एवंवर्णाःप्रयोक्तव्यायुआनेतिनिदर्शनम् ॥ दुंदुंपोदरदेशौतुप्रफुल्लेतेपुनर्यथा ॥ एवंवर्णाःप्रयोक्तव्याअपांफेनेतिनिदर्शनम् ॥ यथाभारभराक्रांतानिश्वसंतिनराभुवि ॥ एवंवर्णाःप्रयोक्तव्या अद्यःसंभूतइत्यपि ॥ कुक्कुटःकामतुल्याश्वककारद्वयमुच्चरेत् ॥ एवंवर्णाःप्रयोक्तव्याःकुक्कुटोसौतिदर्शनम् ॥ वडवाप्यहृयंदृष्ट्वायोनिंविकुरुतेयथा॥ एवंवर्णाःप्रयोक्तव्याःसद्दुद्रुमेतितिनिदर्शनम् ॥ रंगेचैवसमुत्पन्नेनोग्रसेत्पूर्वमक्षरम् ॥ स्वरंदीर्घंप्रयुंजीतपश्चान्नासिक्य

माचरेत् ॥ यथासौराष्ट्रिकानारीअराँइत्यभिभाषते ॥ एवंरंगःप्रवक्तव्योङ्कारःपरिवर्जितः ॥ द्विमात्रिकोमात्रिकोवानासामूलंसमाश्रितः ॥ अंतेप्रयुंजतेरंगः पंचमैः सानुनासिकः ॥ यथासौराष्ट्रिकानारी अराँइत्यभिभाषते ॥ एवंरंगंविजानीयान्ङ्कारपरिवर्जितम् ॥ अनंतरंमकारस्ययोरंगस्तत्ररंज्यते ॥ सर्वानुनासिकंविंद्यादेषावध्योपधानिका ॥ यरलवशषसहरज्यतेचोपधानिका ॥ गवांतेरंगतेयस्तुसर्वैःसर्वानुनासिका ॥ नासादुत्पद्यतेरंगःकांस्येनसमानिःस्वनः ॥ मृदुश्चैवद्विमात्रःस्याद्दृष्टिमान्स्यान्निदर्शनम् ॥ यथाव्याघ्रीहरेत्पु

त्रान्दंष्ट्राभिर्नचपीडयेत् ॥ भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत्॥
मधुरंचनचाव्यक्तंव्यक्तंचापिनपीडितम् ॥ सनाथस्यैकदेशस्यनवर्णाः
संकरंगताः ॥ यथासुमत्तनागेंद्रःपदात्पदंनिधापयेत्॥ एवंपदंपदाद्यंतं
दर्शनीयंपृथक्पृथक्॥गीतीशीघ्रीशिरःकंपीयथालिखितपाठकः ॥अन
र्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः ॥ माधर्यमक्षरव्याक्तिःपदच्छेदस्तुसु
स्वरः ॥ धैर्यंलयसमत्वंचषडेतेपाठकागुणाः॥चतुरक्षरषट्कंचानिवर्तेतपु
नःपुनः॥आवर्ततेपदंयच्चद्विस्त्रिराम्रेडितंहितत् ॥ यथाधाम्नेधाम्नेतिय
जुषेयजुषेतिनिदर्शनम्॥हीयतेवर्धतेचापिपदंयत्रकृशोदरम् ।उपचारः

सविज्ञेयउभेस्तुश्चंद्रेतिनिदर्शनम् ॥ ॥ अथसप्तविधाःसंयोगपिंडाः ॥
अयःपिंडोदारुपिंडऊर्णापिंडोज्वालापिंडोमृत्पिंडोवायुपिंडोवज्रपिंड
श्चेति ॥ यमान्विद्यादयःपिंडान्सांतस्थंदारुपिंडवत् ॥ अंतस्थंप्रथमवर्ज्जं
तुऊर्णापिंडंविनिर्दिशेत् ॥१॥ अंतस्थंप्रथमंसंयोगेविशेषेणोपलक्ष्यते ॥
अशरीरंयमंविद्याद्दंतस्थंपिंडनायकम् ॥२॥ ज्वालापिंडान्सनासिक्या
न्सानुस्वारांस्तुमूर्द्धगान् ॥ सोपध्मावायुपिंडश्चजिह्वामूलेतुवर्त्तिणः
॥३॥ अयःपिंडोनामयथा । अर्घौः । पर्कौः । मात्सर्च्चिय । दारुपिंडो
नामयथा । अश्वः । सूर्यः । विभ्राजतीतिभवति । तत्रऊर्णापिंडोनाम

यथा । अस्मिन् । यस्मिन् । अमुष्मिन् । इतिभवति ॥ तत्रज्वालापिंडोनामयथा । ब्रह्मा । ब्राह्मः । गृह्णामीतिभवति । तत्रमूर्त्तिपिंडोनामयथा । सꣳस्थाम् । सꣳस्कर्त्तारः । सꣳस्रवतंइति । तत्रवायुपिंडोनामयथा । देवसवितः । युञ्जानः प्रथमम् । प्रादिशःककुत्सुसमितिभवति ॥ तत्रवज्रपिंडोनामयथा । इष्कृतिः निष्कृतिः ऋक्सामयोः । इतिभवति ॥ प्रथममेवणकारेण सकारेणैवसंयुतम् ॥ एतत्स्वरंसमासाद्यअग्निष्वातानिदर्शनम् ॥४॥ प्रथमेनठकारेणथकारेणैवसंयुतम् ॥ एतत्स्वरंसमासाद्यअधिष्ठानानिदर्शनम् ॥५॥ प्रथममेवणकारेणनकारेणैवसंयुतम् ॥ एत

त्स्वरंसमासाद्यात्रिणवत्त्रयस्त्रिꣳशावितिनिदर्शनम् ॥ ६ ॥ प्रथममेव रंगेणनकारेणैवसंयुतम् ॥ एतद्रञ्जितमासाद्यवृष्टिमानितिनिदर्शनम् ॥७॥ एतेककाराद्योमकारपर्यंवसानाःकृष्णाव्याख्याताः । शनैश्चर दैवत्याः । चत्वार्यंतस्थायरलवाःकपिलवर्णाःअग्निदैवत्याः । चत्वार्यूष्माणःशषसहा अरुणवर्णाः आदित्यदैवत्याः॥त्रयस्त्रिꣳशद्व्यंजनानि स्पर्शाअंतस्थाऊष्माणश्चेति । चतुर्विधंकरणम् ॥ स्पृष्टमस्पृष्टंसंवृतं विवृतंचेति ॥ संवृताघोषाविवृताअघोषाः । विꣳशतिर्घोषास्तेगजडदबाघझढधभाङञणनमाःयरलवाश्चेति । त्रयोदशअघोषास्तेकचट

तपाःखछठथफाःशषसाश्चेति ॥ षड्विधमास्यप्रयत्नम् ॥ संवृतंविवृतम
स्पृष्टंस्पृष्टमीषत्स्पृष्टंचार्धस्पृष्टंचेति ॥ तत्रअकारःसंवृतोज्ञेयइतरेवि
वृताःस्वराः ॥ सर्वेंचतेस्युरस्पृष्टाःस्पर्शाः स्पृष्टाभवन्तिहि ॥ ८ ॥
ईषत्स्पृष्टास्तथान्तस्थाऊष्माणोर्धस्पृशःस्वराः ॥ सामान्यंभजतेवर्णः
संस्थानकरणस्यहि ॥ ९ ॥ ऋलोर्मध्येभवत्यर्धमात्रारेफलकारयोः ॥
तस्मादस्पृष्टतानस्याद्लृकारनिरूपणे ॥ १० ॥ वर्गाणांप्रथमद्वितीयाः
शषसहाश्चाघोषाघोषास्त्वन्येदशर्धावर्णाभवन्ति ॥ अष्टौवर्णस्थानानि
भवंति। उरःकंठ्यमूर्धन्यतालुदंत्योजिह्वामूलयमानुनासिक्याश्चेति ॥

दौ औरन्यौं ह्व ह्यइति । अआआ ३ अवर्णह्कारविसर्जनीया इति त्रयःकंठ्याः । ऋषट्मूर्द्धन्याः टठडढणष इति । दशतालव्याः चछजझञयशइईई ३ इति । अष्टौदंत्याः तथदधनलॢलसाः । अष्टावोष्ठ्याः पफबभमवाउऊऊ ३ वउपध्माचेत्यादयः । एकोदंतमूलीयोरेफः । जिह्वामूलीयाःपंच कुंखुंगुंघुंङुंइति । क्मख्मग्मघ्मकुंखुंगुंघुंइतियमाश्चत्वारः ॥ रुक्मेति प्रथमोज्ञेयः सक्थ्येत्येवापरोभवेत् । तृतीयःसह्नइत्याहुःउपध्मेतिचतुर्थकः ॥ ११ ॥ प्रथमौचौष्ठनासिक्यौद्वितीयःकंठ्यदंत्यश्चनासामूलमुपाश्रितः ॥ तृतीयःकंठ्यजिह्वा

ग्रेनासाग्रामेवंनिर्दिशेत् ॥ चतुर्थाँह्लादिनासिक्यःकंठेचाभिहितायमाः
॥ १२ ॥ आपंचमैश्चैकपादःसंयुक्तंपंचमाक्षरम् ॥ उत्पद्यतेयमस्तत्र
सोऽङ्गपूर्वाक्षरस्याहि ॥ १३ ॥ पंचमाःशषसैर्युक्ताअन्तस्थैर्वापिसंयु
ताः ॥ यमास्तत्रनिवर्तंतेश्मशानादिवबांधवाः ॥ १४ ॥ ऋवर्णांतिपरे
सादावनुस्वारोद्विमात्रकः ॥ संयोगेपरभूतेतुह्रस्वएवोच्यतेबुधैः ॥
॥ १५ ॥ आद्यामात्रातुकण्ठ्यस्यएकारौकारयोर्भवेत् ॥ तालव्यस्य
तथौष्ठ्यस्यद्वितीयाचयथाक्रमम् ॥ १६ ॥ यादृशीरत्नवर्णांभाजपा
याःकुसुमेऽथवा ॥ तादृशंरञ्जयेद्वर्णंप्रान्तेनासिक्यमाचरेत् ॥ १७ ॥

लाक्षारक्तंयथातोयंनकारान्तंपदंतथा ॥ सर्वंरंगंविजानीयाच्छत्रूनि
तिनिदर्शनम् ॥ १८ ॥ लुप्तेनकारेयत्स्वारंरंजन्तिशौनकादयः ॥ आ
दिरैङ्गंविजानीयान्नचासीदिवाविन्दन्ति ॥ १९ ॥ प्रथमस्थषकारेण
तकारेणचसंयुतम् ॥ एतदक्षरमासाद्यात्रिष्टुभेतिनिदर्शनम् ॥ २० ॥
प्रथमस्थषकारेणथकारेणचसंयुतम् ॥ एतत्स्वरंसमासाद्याधिष्ठान
मितिनिदर्शनम् ॥ २१ ॥ चतुर्थंचतृतीयेनद्वितीयंप्रथमेनच ॥ आद्यं
मध्यंतथान्त्यश्चस्वरूपेणाभिपीडयेत् ॥ २२ ॥ अवग्रहपदच्छेदउदात्तं
दृश्यतेयदि ॥ स्वरन्तंस्वारितंप्राहुःसंधौतुस्वार्यतेपरम् ॥ २३ ॥ स्वर

संधिविधानेननीचोच्चंतुविधीयते ॥ व्यंजनाद्वास्वराद्वापितत्सन्धौ
स्वरउच्यते ॥ २४ ॥ उदात्तान्निहितःस्वारःस्वरितात्प्रचयोभवेत् ॥
उदात्तात्स्वरितात्पूर्वोनान्यआपद्यतेस्वरः ॥ २५ ॥ पदकालेयःस्वरि
तःसंहितायांतथैवच ॥ स्वरिताच्चेद्भवेत्पश्चात्सएवनिचितःस्वरः ॥
॥ २६ ॥ प्रथमाश्चतृतीयाःस्युपरेघोषवतिस्थिते ॥ पञ्चमाःपञ्चमे
पाठेद्वितीयाःशषसेषुच ॥ २७ ॥ उदात्तान्निहितःस्वार्यःस्वारोदात्तौ
नतत्परौ ॥ स्वरितोनस्तथाभूतोज्ञेयःसप्रचयःसदा ॥ २८ ॥ उच्चानु
दात्तयोर्योगेस्वरितःस्वारउच्यते ॥ ऐक्यंतत्प्रचयःप्रोक्तःसन्धिरेषां

मिथोऽद्भुतः ॥ २९ ॥ वह्नीजिह्वायथागूढात्यह्वोवह्निस्तथैवच ॥ ब्रह्म
रूपं विजानीयाद्रूपमेवात्मनःसदा ॥ ३० ॥ यत्किंचिद्वाङ्मयंलोकेस
र्वमन्त्रप्रतिष्ठितम् ॥ करोतितत्प्रदानंयस्तस्माद्ब्रह्ममयोगुरुः ॥ ३१ ॥
विधिनाप्यविधिनाज्ञानमविद्यानान्नलभ्यते ॥ अविद्यानपरोनित्यंप्रा
याश्चित्तीभवेन्नरः ॥ ३२ ॥ युक्तियुक्तंवचोग्राह्यंनग्राह्यंगुरुगौरवात् ॥
सर्वशास्त्ररहस्यंतद्याज्ञवल्क्येनभाषितम् ॥ ३३ ॥ ह्रवर्णोतितत्परे
सादानुस्वारोद्विमात्रकः । संयोगेपरभूतेतुह्रस्वएवोच्यतेबुधैः ॥
॥ इति श्रीयाज्ञवल्क्यशिक्षासमाप्ता ॥ ॥ ॥ ॥

श्रीगणेशाय नमः ॥ ॥ ॐ अथानुवाकान्वक्ष्यामिब्राह्मणानांमितान्पु
रा ॥ शिष्याणामुपदेशाययज्ञसंस्कारएवच ॥ विप्राणांयज्ञकालेषु
जपहोमार्चनादिषु ॥ १ ॥ इषेत्वैकादशःपवित्रेतिस्रोग्नेव्रतपतेसप
वित्रेस्थोद्वेशर्मासि तिस्रोधृष्टिरसिशर्मासिद्विकोदेवस्यत्वातिस्रोदेव
स्यत्वापंचप्रत्युष्टंरक्षास्तिस्रोदशैकत्रिंशत् ॥ १० ॥ ३१ ॥ १ ॥
कृष्णोसिषडग्नेवाजाजित्तिस्रोमयीदमग्नीषोमयोःपंचकावग्नेदब्धायो
तस्रःसंवर्चसापंचाग्नयेकव्यवाहनायषट्सप्तचतुस्त्रिंशत् ॥ ७ ॥
॥ ३४ ॥ २ ॥ समिधाग्निंभूर्भुवःस्वश्चतुष्कावाग्निर्ज्योतिर्द्वेउपप्रयंतः

अनु. षड्विꣳशतिर्भूर्भुवःस्वश्चतस्रोगृहामातिस्रःप्रघासिनःपंच पूर्णादर्विद्वे
॥२४॥ ऽअक्षन्नमीमदन्तषडेषतेसप्तदशत्रिषष्टिः ॥ १० ॥ ६३ ॥ ३ ॥ एदंद्वेम
हीनांपयश्चतस्रआकूत्याऋक्सामयोर्द्वेकौव्रतंकृणुतषडेषातेचतस्रोव
स्व्यासितिस्रएषतेद्वेशुक्रंत्वाचतस्रोदित्यास्त्वगष्टौदशसप्तत्रिꣳशत् ॥
॥ १० ॥ ३७ ॥ ४ ॥ अग्नेस्तनूरापतयेचतुष्कौतप्तायनीद्वेइन्द्रघोष
स्तिस्रोयुञ्जतेष्टौदेवस्यत्वाचतस्रोदेवस्यत्वापंचाविभूरसिचतस्रोज्यो
सू.अ. तिरसिषडुरुविष्णोतिस्रोदशत्रिचत्वारिꣳशत् ॥ १० ॥ ४३ ॥ ५ ॥
१ देवम्यत्वाषडुपावीरसिपंचमाहिःषट्संते (तिसंते) तिस्रःसमुद्रंगच्छ

हविष्मतीर्द्धिकौह्नदेत्वापंचदेवस्यत्वाष्टावष्टौँसप्तात्रिꣳशत् ॥ ८ ॥
॥३७॥६॥ वाचस्पतयऽउपयामगृहीतो।सि।त्रिकावावायोयंवाद्धिकौया
वामेकातंप्रत्नथा चतस्त्रोयंवेनोयेदेवासस्त्रिकाविन्द्रायमूर्द्धानंद्धिकौय
स्तएकाप्राणाय तिस्त्रोमघवइन्द्राग्नीआगतमाघौमासश्चर्षणीधृतोवि
श्वेदेवासऽआगतेंद्रमरुत्वोमरुत्वंतं वृषभंमरुतांत्वौजसेसजोषाइंद्रम
रुत्वाँ२ ॥ इन्द्रमहँ२ ॥ इन्द्रोमहाँ२ ॥ इंद्रमेकैकोदुत्यमष्टौपं
चविꣳशतिरष्टाचत्वारिꣳशत् ॥ २५ ॥ ४८ ॥ ७ ॥ उपयामगृहीतो
सि ॥ आदित्येभ्यः पंचवाममद्यद्धेसुशर्मास्येकाबृहस्पतिसुतस्यद्धेह

रिरसिचतस्रः सामिन्द्रणाष्टौमाहिरेजतुद्दशमास्यः पंचकावातियुक्ष्वा
हींद्रमिदेकैकायस्मान्नद्धेऽग्नेपवस्वोत्तिष्ठन्नहश्रमुदुत्यमेकैकाजिघ्रद्धावि
नइन्द्रवाचस्पतिंविश्वकर्मन्नेकैकाग्नयेत्वाचतस्रइहरतिस्तिस्रःपरमेष्ठी
दशाग्नयोविंऽशतिस्त्रिषष्टिः ॥ २३ ॥ ६३ ॥ ८ ॥ देवसवितश्च
तस्रइंद्रस्यवज्रः पंचदेवस्याहंदशापयोतिस्रोवाजस्येममष्टावाग्निरेका
शेरणैषतेचतुष्कौसविताद्धेअष्टौचत्वारिंऽशत् ॥ ८ ॥ ४० ॥ ९ ॥
अपोदेवाश्चतस्रः सोमस्यत्विषिःपंचावेष्टाः सप्तसोमस्यत्वाचतस्र
इन्द्रवज्रःपंचस्योनासिच्चतस्रः सवित्रेकाश्विभ्यांचतस्रोष्टौचतुस्त्रिंऽ

शत् ॥ ८ ॥ ३४ ॥ १० ॥ युंजानएकादशप्रतूर्त्तꣳ षोडशादेवस्य
त्वादशापोदेवीर्द्वादशापोह्येकादशादितिश्च पंचाकूतिमष्टादशसप्तत्र्य
शीतिः ॥ ७ ॥ ८३ ॥ ११ ॥ इशानःसप्तदशादिवस्पारिद्वादशास
मिधाग्निंपंचदशापेतसप्तदशाऽसुन्वन्तंत्रयोदशयाओषधीःसप्तविꣳश
तिर्मांमाषोडशसप्तसप्तदशꣳशतम् ॥ ७ ॥ ११७ ॥ १२ ॥ मयिगृह्णा
तिपंचदशध्रुवासिमधुवाताएकादशकौ सम्यक्स्रवंतिनवेमंमाषड
पांत्वेकाऽयंपुरःपंचसप्ताष्टापंचाशत् ॥ ७ ॥ ५८ ॥ १३ ॥ ध्रुवाक्षि
तिः षट्सजूर्ऋतुभिर्मूर्द्धावयोर्द्धकाविन्द्राग्नी आयुर्मेषट्कावाशुस्त्रि

वृदेकाऽग्नेभोगोस्येकयाचतुष्कावष्टावेकत्रिंशत् ॥ ८ ॥ ३१ ॥
॥ १४ ॥ अग्नेजातान्पंचराडिमनासत्यायचतस्रोराड्यस्ययंपुरःपं
चकावग्निर्मूर्द्धैकोनत्रिंशत् येनऋषयोष्टौतपश्चनवसप्तपंचषष्टिः ॥
॥ ७ ॥ ६५ ॥ १५ ॥ नमस्तेषोडशाहिरण्यबाहवऽउष्णीषिणे
तक्षभ्योज्येष्ठायपंचकाः स्तुत्याय चतस्रःशंभवायैकापार्यायपंचद्रा
पेअंधसोविंशतिर्नवषट्षष्टिः ॥ ९ ॥ ६६ ॥ १६ ॥ अ
श्मन्नूर्जंदशनमस्तेपंचाग्निस्तिग्मेननवचक्षुषः पिताष्टावाशुः शिशानः
सप्तदशोदेनंक्रमध्वमाग्निना पंचदशकौशुक्रज्योतिः सप्तमर्ठंस्तनंत्र

योदशनवैकोनशतम् ॥ ९ ॥ ९९ ॥ १७ ॥ वाजः सप्तमूर्क्कचतुष्काअ
श्माग्निस्त्रिकावꣳशुः पंचैकाचतस्रोवाजायद्वेवाजस्यत्वष्टावृताषाट्त्र
योदशाग्निंयुनज्मिसप्तयदाकूताद्वार्त्रंहत्यायदशकौ त्रयोदशसप्तसप्त
तिः ॥ १३ ॥ ७७ ॥ १८ ॥ स्वाद्वींत्वैकादशद्वेवायज्ञंविꣳशतिःसुराव
तꣳसप्तदशोदीरतां त्रयोदशाच्याजानुर्दशसोमोराजाष्टौसीसेनतंत्रꣳ
षोडशसप्तपंचनवतिः ॥ ७ ॥ ९५ ॥ १९ ॥ क्षत्रस्ययोनिस्त्रयोदशय
द्वेवादशाभ्यादधाम्यष्टौयाभूतानांचतस्रः समिद्धइंद्रएकादशायात्व
ष्टौसमिद्धोअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनव

अनु. तिः ॥ ९ ॥ १० ॥ २० ॥ इमम्मेसमिद्धोअग्निरेकादशकोवसन्तेन
॥२७॥ ऋतुनाषड्ढोतायक्षत्समिधाग्निर्द्वादशाऽश्विनौ छागस्यसम देवंबर्हि
श्चतुर्दश षडेकषष्टिः ॥ ६ ॥ ६१ ॥ २१ ॥ तेजोसिपंचाग्नय
एकाहिंकारायद्वतत्सवितुर्द्दश विभूर्मात्रैकाकायद्वेआब्रह्मंस्त्रयोद्दश
शेषाद्वैकैकोनाविंशतिश्चतुस्त्रिंशत् ॥ १९ ॥ ३४ ॥ २२ ॥ हिरण्य
गर्भायःप्रणतोद्विकौयुंजंत्यष्टौवायुर्द्वापंचप्राणायतिस्त्र उत्सक्थाद्वाद्द
शु.अ. शगायत्र्यौकस्त्वाषट्कौकःस्विदष्टौकास्विद्दशसुभूःस्वयम्भूरित्तस्त्र एका
९ दशपंचषष्टिः ॥ ११ ॥ ६५ ॥ २३ ॥ अश्वस्तूपरोधूम्रान्वसंताय

समुद्रायशिशुमारान्मयुःप्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥
॥ ४ ॥ ४० ॥ २४ ॥ शादंदद्भिर्नवैकैका हिरण्यगर्भश्चतस्र आनो
दशमानोमित्रोयदश्वस्याष्टकौयत्तेषडिमानुकंद्वेपंचदशसप्तचत्वारिꣳ
शत् ॥ १५ ॥ ४७ ॥ २५ ॥ अग्निश्चपंचदशोच्चातएकादशाद्यौ
षड्विꣳशतिः ॥ २ ॥ २६ ॥ २६ ॥ समास्त्वादशोर्ध्वाअस्यपांचो
अन्नाद्वादशकावभित्वैकादशचत्वारःपंचचत्वारिꣳशत् ॥ ४ ॥ ४५ ॥
॥ २७ ॥ होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्येवंचत्वारःषट्चत्वा
रिꣳशत् ॥ ४ ॥ ४६ ॥ २८ ॥ समिद्धोअंजन्नेकादशयदक्रंदस्त्रयो

अनु. दशसमिद्धोअग्नद्वादशकेतुंकृण्वंश्चतुर्विंशतिश्चत्वारःषष्टिः ॥ ४ ॥

॥२८॥ ॥ ६० ॥ २९ ॥ देवसवितःषट्तपसेकौलालंषोडशद्वौद्वाविंशतिः॥

॥ २ ॥२२॥३० ॥ सहस्रशीर्षाषोडशाद्यःसंभृतःषट्द्वौद्वाविंशतिः ॥

॥ २ ॥ २२ ॥ ३१ ॥ तदेवसप्तवेनस्तन्नवद्वौषोडश ॥ २ ॥ १६ ॥

॥ ३२ ॥ अस्याजरासःसप्तदशापाश्विद्वादश विभ्राट्चतुर्दशप्रवावृज

एकादशप्रवायुप्रवीरयापंचदशकावानस्त्रयोदशसप्तसप्तनवतिः ॥ ७ ॥

सू.अ. ॥ ९७ ॥ ३३ ॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृष्णेनपूषंतव्रद

१ शकानतदष्टौषडष्टापंचाशत् ॥ ६ ॥ ५८ ॥ ३४ ॥ अपेतोद

शाद्यंद्वादशद्वौँद्वाविꣳशतिः ॥ २ ॥ २२ ॥ ३५ ॥ ऋचंवाचꣳषोडशद्यौःशांतिरष्टौद्वौचतुर्विꣳशतिः ॥ २ ॥ २४ ॥ ३६ ॥ देवस्यत्वादशयमायत्वैकादशद्वावेकविꣳशतिः ॥ २ ॥ २१ ॥ ३७ ॥ देवस्यत्वाष्टौयमायत्वाक्षत्रस्यत्वादशकौत्रयोष्टाविꣳशतिः ॥ ३ ॥ २८ ॥ ३८ ॥ स्वाहाप्राणेभ्यःषडुग्रश्चसप्तद्वौत्रयोदश ॥ २ ॥ १३ ॥ ३९ ॥ ईशावास्यमष्टावंधंतमोनवद्वौसप्तदश ॥ २ ॥ १७ ॥ ४० ॥ ॥ दशाध्यायेसमाख्याताअनुवाकास्तुसंख्यया ॥ शतंदशानुवाकश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तषाष्टिरग्नौज्ञेयासौक्तेद्वाविंशतिस्तथा ॥

अश्वएकोनपंचाशत्पंचत्रिंशात्खिलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंत्वाधिकंमतम् ॥ ३ ॥ इत्यनुवाकसूत्राध्यायः समाप्तः ॥ ॥ ॥ ॥

श्रीगणेशायनमः ॥ मंडलंदाक्षिणमाक्षिहृदयंचाधिष्ठितंयेनशुक्लानियजूंषिभगवान्याज्ञवल्क्योयतः प्रापतंविवस्वंतंत्रयीमयमार्चिष्मंतमभिध्यायमाध्यंदिनीयेवाजसनेयके यजुर्वेदाम्नायेसर्वे सखिलेसशुक्रियऋषिदैवतच्छंदांस्यनुक्रमिष्यामोयजुषामनियताक्षरत्वादेकेषां छंदोनाविद्यते द्रष्टारऋषयःस्मर्तारः परमेष्ठ्याद्योदेवतामंत्रांतर्भूता

गन्यादिकाहविर्भाजःस्तुतिभाजोवानःशाखोखाशम्योपवेशकपालेध्मोलूखलादयश्चप्रतिमाभूताश्छंदांसिगायत्र्यादीन्येतान्यविदित्वाथोधीतेनुब्रूतेजपतिजुहोतियजतेयाजयतेतस्य ब्रह्मनिर्वीर्यं यातयामंभवत्यथांतराश्वगर्त्तंवापद्यते स्थाणुंवर्छतिप्रमीयतेवापापीयान्भवत्यथ विज्ञायैतानियोधीतेतस्यवीर्यवदथयोर्थवित्तस्यवीर्यवत्तरं भवतिजपित्वाहुत्वेष्ट्वातत्फलेनयुज्यते ॥ १ ॥ इषेत्वादिखंब्रह्मांतंविवस्वानपश्यत्ततः प्रतिकर्मविभागेनब्राह्मणानुसारेणऋषयोवेदितव्याःपरमेष्ठीप्राजापत्योदर्शपूर्णमासमंत्राणामृषिर्देवावाप्राजापत्याइषेत्वाशाखानु-

ष्टुब्विनियोगः कल्पकारोक्तएवमूर्ज्जैंत्वावायवोवायव्यंदेवोवऐंद्रंयज
मानस्यशाखावसोर्वायव्यंद्यौर्मातरिश्वनउखावसोर्वायव्यंदेवस्त्वाप
यः कामधुक्षप्रश्नःसाविश्वायुस्त्रीणिगव्यानींद्रस्यैंद्रंविष्णोपयः ॥ २ ॥
योअग्नइद्धमाग्नेये ॥ कस्त्वाप्राजापत्यंकर्मणेस्त्रुक्शूर्पंप्रत्युष्टंद्वेराक्षसे
उरुब्रह्मरक्षोघ्नठंसर्वत्रधूरसिधूर्देवानां विष्णुस्त्वानऽउरुहविष्याऽअप
हतठंरक्षोयच्छंताठंहविष्यादेवस्यत्वासावित्रठंसर्वत्राग्नयेलिंगोक्तेभू
तायत्वाहविःस्वःसूर्यौंहठंहंतांगृहाःपृथिव्यास्त्वाहव्यंपावित्रेलिंगोक्त
ठंसावितुर्देवीः ॥ प्रोक्षिताआपान्यग्नयेलिंगोक्तेदैव्यायपात्राणि ॥ ३ ॥

शर्मास्यदित्याः कृष्णाजिनमवधूतꣳराक्षसमाद्रिर्ग्रावोलूखलेअग्नेर्हवि
र्बृहत्सइमम्मौसलेहविष्कृदाधिदैवतंवागधियज्ञंपत्नीकुक्कुटोवाग्वर्ष
वृद्धꣳशूर्पंप्रतित्वाहविःपरापूतमपहतꣳराक्षसेवायुर्वोँदेवोवस्तंडुलाधृ
ष्टिरूपवेषोपाग्नआदेवजयमाग्नेयेध्रुवमासिषण्णां कपालान्यग्नेब्रह्मा
ग्नेयंधिषणासिदार्षदंदिवःशम्याधिषणौपलंधान्यमासिषण्णाꣳहविर्म
हीनामाज्यम् ॥ ४ ॥ संवपामिहविःसमाप आपंजनयत्त्यैत्वेदꣳहवि
रिषेत्वाज्यंधर्मोँसिषण्णांपुरोडाशस्त्रितायत्रयाणांत्रितोद्धितएकतःक्र
मेणाददइंद्रस्यस्फ्यः पृथिविवेदिर्व्रजंपुरीषंवर्षंतुवेदिर्बंधानसावित्रम

पाररुमररोआसुरेंद्रप्सस्तेवेदिर्गायत्रेणत्रीणि वैष्णवानिसूक्ष्मात्रया
णांवेदिः पुराघशर्ठंसोपह्ययच्चांद्रमसीत्रिष्टुभंप्रोक्षणीः प्रैषोद्धिपतःआ
भिचारिकमनिशितःस्रुवोनिशितास्रुगादित्यैविष्णोर्यांक्रमूर्जं त्रयाणा
माज्यर्ठं सवितुरापंतेजोसिधामाज्यम् ॥ ५ ॥ कृष्णोसीध्मोवेदिर्बर्हि
र्लिंगोक्ते ॥ आदित्याआपंविष्णोःप्रास्तरमूर्णम्रदसंवेदिर्भुवपतयेत्री
ण्याग्नेयानिगन्धर्वस्त्रयाणांपरिधयोवीतिहोत्रंग्निश्वान्नसुराग्नेयीं गायत्री
र्ठंसमिदाग्नेयर्ठंसूर्यस्त्वालिंगोक्तर्ठंसवितुर्विधृती ऊर्णं म्रदसमात्वा
प्रास्तरंघृताच्यासित्रयाणांजुहूपभृद्ध्रुवाःक्रमेणाग्नियेणहविर्ध्रुवा असद

न्पाहि मांवैष्णवेअग्नेवाजजिदाग्नेयं नमोदैवंऽस्वधापित्र्यःसूयमेसु
चावांघ्रिणावैष्णवं वसुमतीमाग्नेयमितऐंद्रंःसंज्योतिषाज्यंमयीदमा
शीःप्रतिग्रहणमुपहूताद्यावापृथिव्यम् ॥६॥ ब्रह्मत्वंप्रतिष्ठांतम् ॥ बृह
स्पतिरांगिरसोपश्यदग्नेष्ठाप्राशित्रमेतंतेवैश्वदेवमेषातेनुष्टुबाग्नेय्यग्ने
वाजजिदाग्नेयमग्नीषोमयोश्चत्वारिलिंगोक्तानिवसुभ्यस्त्रयाणांपरिध
यःसंजानाथाव्यंतुप्रास्तरंमरुतांकपिर्बृहतींप्रास्तरीमंत्यः पाद आग्ने
योयंपरिधिंदेवल आग्नेयींत्रिष्टुभंविराड्रूपांचयजुरंतामग्नेःप्रियंयजुः
सठेंस्त्रवभागाःसोमसूक्ष्मोवैश्वदेवींत्रिष्टुभंयजुरंताऽस्वाहावाड्यजुर्घ्रं

ताचीस्रुचौयज्ञनमः शूर्पंयवमान्क्रुपिरुद्धालवांधानांतवांनितिपंचार्षें
योयज्ञोदेवतास्मेदंधायोगार्हपत्योग्नये दक्षिणाग्निः सरस्वत्यैलिङ्गोक्तं
वेदोसिवेदोदेवामनसस्पतिर्वातदेवत्यां विराजꣳसंबर्हिर्लिंगोक्तात्रिष्ट
ब्विराड्रूपाकस्त्वाप्राजापत्यꣳरक्षसाꣳराक्षसम् ॥ ७ ॥ अथयाजमा
नꣳसंवर्च्चसात्वाष्ट्रीत्रिष्टुब्दिविविष्णुस्त्रीणि वैष्णवान्यस्माद्भागोस्यैभू
मिरगन्मदैवꣳसंज्योतिषाहवनीयःस्वयंभूःसूर्यस्यसौरेअग्नेगृहपतेगा
र्हपत्यः सूर्य्यस्यसौरमग्नइदमाग्नये ॥ ८ ॥ पितृयज्ञःप्रजापतेरार्षम
ग्नयेसोमायद्धदैवेस्वाहाकारश्रुतेरपहता असुरायेरूपाणिकव्यवाहनो

ग्निस्त्रिष्टुबत्रामीमदंतपित्र्यैनमोव: षड्लिंगोक्तानिपरेपित्र्येआधत्त
पित्र्यागायत्र्यूर्जमापिविराट्॥९॥अग्न्याधेयंप्रजापतेरार्षम् ॥ देवाना
मग्नेर्गंधर्वाणांवासमिधाग्नेठ्यश्चतस्रोगायत्र्य: समिधाविरूपआंगि
रस: सुसमिद्धायवसुश्रुतस्तंत्वाभरद्वाजोभूर्भुव: स्वस्तिस्रोमहाव्या
हृतयोग्निवायुसूर्यदेवत्या: क्रमेणद्यौरिवयजमानाशीर्लिंगोक्तदेवता
यंगौ: सार्पराज्ञ्यस्तृचोगायत्र्योग्नि:परावररूपेणदेवता ॥ १० ॥
अग्निहोत्रंप्रजापतेरार्षमग्निर्ज्योति: ॥ सप्तलिंगोक्तदेवतागायत्र्यआ
द्या: पंचैकपदाअग्निर्वर्च्चौंद्धतक्षापश्यत्परांजीवलश्चैलकि: ॥ ११ ॥

यजमानाग्न्युपस्थानंबृहद्देवानामार्षम् ॥ उपप्रयंतइत्यनुवाकआद्ये द्वेआग्नेय्यौगायत्र्यावुपवत्यागोतमाराहूगणोमूर्द्धन्वत्याविरूपउभावांभरद्वाजऐंद्राग्नीत्रिष्टुभंयंतेदेवश्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमयामिह वामदेवोजगतीमस्यप्रत्नामवत्सारोगव्यांवाग्नेयींवापयोदेवत्यांवागायत्रीं तनूपाआग्नेयानींधानाआग्नेयींमहापंक्तिस्त्र्यवसाना ॥ १२ ॥ चित्रावसोरात्रिदेवत्यमृषयोपश्यन्त्संत्वमाग्नेयमंधस्थरेवतीः सꣳहितेतित्रीणिगव्यान्युपत्वाग्नेयंतृचंगायत्रंमधुछंदावैश्वामित्रोग्नेत्वंचतस्रोद्विपदा आग्नेयीर्बंधुःसुबंधुःश्रुतबंधुर्विप्रबन्धुरे

कैकशइडेकाम्यागव्येसोमानंब्रह्मणस्पत्यंतृचंगायत्रंब्रह्मणस्पतिर्मेधा
तिथिर्वामहित्रीणाꣳसत्यधृतिवारुणिरादित्यदैवतं तृचंगायत्रंपाथि
स्वस्त्ययनं कदाचनैंद्रींपथ्याबृहतींमधुच्छंदास्तत्सवितुर्विश्वामित्रः
सावित्रींगायत्रींपरितेवामदेवआग्नेयीमानिरुक्तांगायत्रीम् ॥ १३ ॥
क्षुल्लकोपस्थानमासुरेरार्षम् ॥ भूर्भुवःस्वःप्रवत्स्यदुपस्थानमागतोप्र
स्थानंचादित्यस्यार्षंनर्यंगार्हपत्यः शꣳस्याहवनीयोथर्वदक्षिणाग्नि
रागन्माहवनीयोनुष्टुब्वयमग्निर्न्यंकुसारिणीबृहतीगार्हपत्योयमग्निर
न्वाहार्यपचनोनुष्टुब्गृहामात्रिष्टुब्विराड्रूपाश्वेगमषानुष्टुबुपहूतामहा

स.नु. पंक्तिस्त्र्यवसनास्तिस्रोपिवास्तवीःशंयुर्बार्हस्पत्यः ॥ १४ ॥ चातुर्मा
॥३४॥ स्यानिप्रजापतेरार्षम् ॥ प्रघासिनोमारुतीगायत्रीयद्ग्रामममारुत्यनुष्टु
बनिरुक्तामोषुणोगस्त्यऐंद्रामारुतीं विराजमक्रंनानिरक्ताग्नेय्यनुष्टब
वभृथयज्ञदैवतं पूर्णादर्विंद्वे और्णवाभऐंद्र्यावनुष्टुभावक्षंद्वेगोतमऐं
द्र्यौपंक्तीमनोनुमानसंतृचंबंधुर्गायत्र्यंवयꣳसौमीं गायत्रींबंधुरेषतेद्वे
रौद्रेअवरुद्रꣳरौद्र्यावेकापंक्तिरपराककुब्त्र्यंबकंद्वेअनुष्टुभौपूर्वस्यां
सू.अ. वासिष्ठएतदास्तारपंक्तिस्त्र्यायुषंनारायणउष्णिहंयजमानाशीर्षꣳशिवो
१ नामक्षौरंनिवर्तयामिलिंगोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ आग्ने

ष्टोमःप्रजापतेरार्षम् ॥ एदंद्वे अत्यष्टीत्यवसाने आद्यावर्द्धर्चौदेवयज
नदेवत्याविमाआपओषधेकुशतरुणꣳस्वधिते क्षौरमापोऽअस्मानापं
दीक्षातपसोर्वासोमहीनां नवनीतं वृत्रस्यांजनंचित्पतिर्द्वैप्राजापत्ये
देवोमासावित्रमावोदैव्यनुष्टुब्वासीस्वाहायज्ञं चतुर्णांयज्ञआकूत्यैच
तुर्णांमौद्गृभ्णानामग्निरापोदेवीर्लिंगोक्तदेवताविराट् ॥ १६ ॥ विश्वो
देवस्यस्वस्त्यात्रेयः ॥ सावित्रीमनुष्टुभमृक्सामयोःकृष्णाजिनेश
र्मासिकृष्णाजिनमूर्गस्यां गिरोभिर्दृष्टंमैखलꣳसोमस्य नीविर्विष्णोर्वा
सइंद्रस्य सुसस्याःकृष्णविषाणोच्छ्रयस्वदंडोव्रतं यज्ञोदैवींधीयैदेवा

वाक्प्राणोदानौचक्षुःश्रोत्रमध्यात्ममग्निर्मित्रावरुणावादित्योविश्वेदे
वाअधिदैवतꣳश्वात्राआपोजगतीयंतेलोष्टमपोमूत्रंपृथिव्या लोष्टमग्ने
त्वमाग्नेय्यनुष्टुप्पुनर्मनआग्नेयंत्वमग्नेवत्सआग्नेयीं गायत्रीꣳरास्वेय
त्सौम्यमेषातेहिरण्याज्यदैवतंजूरसिवाग्दैवतꣳशुक्रमासिहिरण्यंचिद
सिगौःसोमक्रयणीवाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टुप्
बृहतीवासोमक्रयण्यास्तुतिरादित्याआज्यमस्मेषण्णां लिंगोक्तादेव
ताःसमख्येपत्न्याशीरास्तापंक्तिरेषतेलिंगोक्तदेवतमास्माकोसिसौ
म्यमभित्यꣳसावित्र्यष्टिःप्रजाभ्यस्त्वाप्रजास्त्वाशुक्रंत्वासौम्यानिस

ग्मेस्मेलिंगोक्तेतपसोद्वैजाद्वैसोमोमित्रोनइंद्रस्यसौम्येस्वानादीनि
धिष्ण्यनामानिपरिमाग्नेयीपुरस्ताद्बृहतीप्रतिपन्थामनुष्टुप्पथिदेवत्या
दित्याःकृष्णाजिनमदित्यैसौम्यमस्तभ्नात्रिष्टुभौ वारुण्यौ सूर्यस्या
नुष्टुप्कृष्णाजिनमुस्त्रावूर्ध्वंबृहत्यानडुहीभद्रोमेसौम्यनमोमित्रस्या
भितपनःसूर्यःसौरींजगतींवरुणस्यपंचवारुणानियातेसौमींत्रिष्टुभंगौ
तमः ॥ १८ ॥ अग्नेस्तनुरसिपंचवैष्णवान्यग्नेःशकलंवृषणादर्भंतरु
णैकेउर्वश्यसित्रयाणांलिंगोक्तादेवतागायत्रेणत्रीण्याग्नेयानिभवतंनः
पंक्तीरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयावग्नीदेवतेआपतयेवायव्य

मनाधृष्टमाज्यमग्नेव्रतपाआग्नेयमठंशूरठंशुःप्रकृतिश्चतुरवसानासौ
म्यंत्योर्द्धचौंलिंगोक्तदैवतोयातेत्रीण्याग्नेयानितसायनीचत्वारिपार्थिं
त्रानिविदेदाग्नेयमग्नेअंगिरोयोस्यामनुत्वालिंगोक्तानिसिठंह्यासित्रया
णांवेदिरिंद्रघोषश्चतुर्णामुत्तरवेदिरिदमहमापठं सिठंह्यासि पंचानां
वाग्भूतेभ्यःस्रुग्ध्रुवोसिपरिधयस्त्रयाणामग्नेःसंभारागुल्गुल्वादयः ॥
॥ १९ ॥ युजतेश्यावाश्वः ॥ सावित्रींजगतीमिदंविष्णुर्मेधातिथिर्वै
ष्णवींगायत्रीमिरावतीवासिष्ठास्त्रिष्टुभंदेवश्रुतावक्षधुरौ प्राचीस्वंगोष्ठम
त्रहविर्द्धानेविष्णोर्नुतिस्रोवैष्णव्यास्त्रिष्टुभआद्येद्वेयजुरंतेविष्णोर्नुप्रत

दीर्घतमाऔतथ्यो विष्णोरराटंपंचवैष्णवान्याददेग्निरिदमहꣳरक्षो
घ्नंबृहन्नौपर्वाणीदमहंपंचालिंगोक्तानिस्वराडस्यौपर्वाणिचत्वारिरक्षोह
णोवःसप्तवैष्णवानियवोसियवोदिवेत्वौदुंबरीशुधंतांपित्र्येउद्दिवंपंचा
नामौदुंबरिघृतेनद्यावापृथिव्यामिंद्रस्यैंद्रंपरित्वामधुच्छंदाअनिरुक्ता
मैंद्रीमनुष्टुभमिंदस्यैंद्राणित्रीणिचतुर्थंवैश्वदेवम् ॥ २० ॥ विभूरस्य
ष्टानांधिष्ण्याअग्नयः ॥ सम्राडाहवनीयःपरिषद्योबाहिष्पवमानदेशो
नभोसिचात्वालोमृष्टोसिशामित्रऋतधामौदुंबरीसमुद्रोसिब्रह्मासन
मजोसिशालाद्वार्यौंहिरसिप्राजाहितोवागासिसदऋतस्यद्वार्यैंअध्वना

स.नु. ꣳसूर्यांमित्रस्यर्त्विजोग्नयोधिष्ण्याः ॥ २१ ॥ ज्योतिरसिवैश्वदेवम् ॥
॥३७॥ त्वꣳसोमक्रतुभार्गवःसौमींगायत्रीमनवसानांजुषाणो अप्तुदेवत्यैक
पदाविराडयजुरंताग्नेनयागस्त्य आग्नेयींत्रिष्टुभमयन्नाग्निस्त्रिष्टुब्ब्यजुरंता
ग्नेठ्युरुविष्णोवैष्णव्यनुष्टुब्ब्यजुरंतादेवसवितः सावित्रमेतत्त्व ꣳ सौ
म्यꣳस्वाहानिर्लिंगोक्तदेवतामग्नेव्रतपाआग्नेयमत्यन्यान्वनस्पतिरोष
धेकुशतरुणꣳस्वधितेपरशुर्द्यांमातस्त्वंवनस्पतिः ॥ २२ ॥ अग्रेणीःश
सू.अ. कलम् ॥ देवस्त्वायूपःसुपिप्पलाभ्यश्चबालंद्यामग्रेणस्पृषोग्रातेदीर्घंत
१ मायूपदेवत्यांत्रिष्टुभंब्रह्मवनिब्रह्मह ꣳ हयूपदेवत्येविष्णोःकर्माणिद्व

मेधातिथिर्वैष्णव्यौगायत्र्यौपरिवीर्स्यूपोदिवस्वरुरेषतेस्यूपउपावीस्तृण
मुपदेवांलिंगोक्तमृतस्यत्वापशुरग्नीषोमाभ्यांलिंगोक्तमद्भ्योपांपशुरापो
देवीरापठंसंतेपशुर्घृतेनस्वरुशासौरेवतीवागवषौतृणꣳस्वाहा दैवे ॥
॥ २३ ॥ माहिर्भूरज्जुर्नमस्तेयज्ञोदेवीरापोंर्द्धमापमर्द्धमाशीर्वाचंतेमन
स्तेपशुः शंलिंगोक्तमोषधेतृणꣳस्वधितेसीरक्षसांलिंगोक्तंनिरस्तमिद
महठंरक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमाग्निराज्यस्याग्नेयꣳ
स्वाहा कृतेवपाश्रपण्याविद्माप आपीमहापंक्तिस्त्र्यवसानापावमान
श्चांत्यःपादःसंतेहृदयठंरेडासिवसाग्रयुतांलिंगोक्तंघृतंवैश्वदेवांदिशःपंच

दिश्यान्यैंद्रः प्राणः पश्वंगः प्राणदानंलिंगोक्तंदेवत्वाष्टीत्रिष्टुप् ॥ २४ ॥
समुद्रंलिंगोक्तानिद्वादश ॥ दिवंतेस्वरुर्मापोहृद्द्वयशूलंधाम्नोधाम्नोवा
रुणंयदाहुर्वारुणीगायत्र्यनवसानासुमित्रियानआपठं हविष्मती
र्लिंगोक्तदेवतानुष्टुबग्नेर्वंश्वत्वायार्पान्त्यमूरापागायत्रींमेधातिथिहृदेत्वा
सौम्यनुष्टुप्सोमराजन्त्सौम्येशृणोतुलिंगोक्तदेवतात्रिष्टुब्देवीरापऽआ
पीपंक्तिःकार्षिराज्यमनुष्टुप्समुद्रस्यसमापआपेठ्यमग्नेमधुच्छंदाआग्ने
यींगायत्रीमाददेग्रावाणिग्राभ्याआपमिंद्रायत्वापंचसौम्यानियत्तेसौ
मीविपरीताबृहतीश्वात्राःपथ्याबृहतीमाभेःसौम्यमर्द्धंद्यावापृथिव्यम

र्द्धंप्रागपाकसौम्युष्णिक्त्वमंगगोतमऐंद्रींपथ्याबृहतीम्॥२५॥वाचस्पतयेप्राणदेवत्याविराट् ॥ मधुमतीर्लिंगोक्तं यत्तंसौम्यꣳस्वाहोरुयजुषीलिंगोक्तेस्वांकृतोस्युपाꣳशुर्देवेभ्यस्त्वादैवंदेवाꣳशोलिंगोक्तमाभिचारिकं प्राणायाग्रहोव्यानायउपाꣳशुसवनउपयामगृहीतोस्यंतरैंद्रमंतस्तेमघवदेवत्यात्रिष्टुबुदानायगृहआवायोवसिष्ठोवायव्यांत्रिष्टुभमिंद्रवायूमधुच्छंदाऐंद्रवायवींगायत्रीमयंवांगृत्समदो मैत्रावारुणीꣳरायावयंत्रसदस्युस्त्रिष्टुभंयावांमेधातिथिराश्विनींगायत्रींतंप्रत्नथावत्सारःकाश्यपोवैश्वदेवींजगतीमच्छिन्नस्य सौम्यꣳसाप्रथमैंद्रीत्रिष्टुप्तृपं

त्वयाऽग्नीलिंगोक्ते ॥२६॥ अयंवेनोवेनस्यत्रिष्टुप्सोमस्तुतिराधिदैवतमधियज्ञंचमनोनात्रिष्टुप्सोमस्तुतिराधियज्ञानुवादिन्यपमृष्टःशंडोपमृष्टोमर्क्कआभिचारिकेदेवास्त्वाशुक्रामंथिनावनाधृष्टाऽसिदक्षिणोत्तरवेदिश्रोण्यौसुवीरःसुप्रजाःशुक्रामंथिनौनिरस्तोद्धेआभिचारिकेशुक्रस्यमंथिनःशकलंयेदेवासःपरुच्छेपोवैश्वदेवींत्रिष्टुभमाग्रयणोसिलिंगोक्तदैवतम् ॥२७॥ सोमःपवतेवैश्वदेवामिंद्रायत्वापंचलिंगोक्तानिमूर्द्धानंभरद्वाजोवैश्वानरींत्रिष्टुभंध्रुवोसिध्रुवोध्रुवंध्रुवेणबृहतीपूर्वार्द्धंचांग्नौवउत्तरऐंद्रोयस्तेदेवश्रवाःसौमींत्रिष्टुभंयजुरंतांदेवानांचात्वालदैवतंप्राणाय

मेलिंगोक्तदेवतान्यैकादशकौसिप्राजापत्योष्णिग्वर्द्धमानामघवेत्वा
लिंगोक्तदेवतानित्रयोदश ॥ २८ ॥ इंद्राग्नीविश्वामित्रऐंद्राग्नींगायत्री
माद्यात्रिशोकआग्नैंद्रीमोमासोमधुच्छंदावैश्वदेवींविश्वेदेवासोगृत्समद
इंद्रमरुत्वश्वतस्त्रोविश्वामित्रऐन्द्रामारुतींस्त्रिष्टुभोमरुतांत्वायजुर्मरु
त्वतीयंमहाम् ॥ इंद्रोभरद्वाजोमाहेंद्रींत्रिष्टुभंयओजसावत्सोगायत्री
मुदुत्यंप्रस्कण्वः सौरींगायत्रींचित्रंकुत्सआंगिरसस्त्रिष्टुभमर्ठरूपेणवाद
क्षिणाश्चतुर्णांब्राह्मणमध्यालिंगोक्तदेवतान्यष्टौ ॥ २९ ॥ विष्णोर्वैष्णवं
कद्राचनादित्यदेवत्येबृहत्यौयज्ञोदेवानांकुत्सस्त्रिष्टुभंविवस्वन्यजुः

श्रदस्मैजगत्याशीर्वाममद्यभरद्वाजोबार्हस्पत्यःसावित्रींत्रिष्टुभर्ठंसा
वित्रोऽसिसावित्रठंसुशर्मासिवैश्वदेवंबृहस्पतिसुतस्यलिंगोक्तमहंप्रजा
पतिरूपेणाऽऽत्मादेवतात्रिष्टुबश्वा ३ इपत्नीवन्नाग्नेयंप्रजापतिः ॥ प्राजा
पत्यर्ठंहरिरस्पृकसामेहर्योर्यस्तेलिंगोक्तेदेवकृत्तस्याऽऽग्नेयानिषट्३०॥
समिन्द्रात्रिवैश्वदेवींत्रिष्टुभंधातालिंगोक्तबहुदेवत्यासुगावोदेवीषाँ२ ॥
आवहोवयमाग्नेय्यौयज्ञयज्ञमेषतेलिंगोक्तेयजुषीउरुर्ठंहिशूनःशेपोवा
रुणींत्रिष्टुभंनमोवारुणमग्नेरनीकमाग्नेयीत्रिष्टुप्समुद्रेतेसौमीविराड्
देवीरापःपंक्तिबृहतीवापूर्वार्द्धर्चआपउत्तरःसौम्योदेवानामाग्नेयमेजतु

ऱ्यवसानामहापंक्तिर्यस्यैतेवशापुरुदस्मोगभौंमरुतोयस्यगोतमोमा
रुतींगायत्रींमहीद्यौमैंधातिथिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥
अथषोडश्यातिष्ठगोतमऐंद्रीमनुष्टुभंयुक्ष्वाहिमधुच्छंदाइंद्रामिद्गोतमो
यस्मान्नैंद्रीत्रिष्टुप्परब्रह्मरूपेणषोडशिनस्तुतिरिंद्रश्चैंद्रावारुणीषोडशि
देवत्यावायजुरंताग्नेपवस्ववैखानसआग्नेयींगायत्रीमुत्तिष्ठन्कुरुस्तुतिरै
न्द्रीमहश्चंप्रस्कण्वःसौरींतिस्रोपियजुरन्ताउदुत्यंदेवानामार्षमाजिघ्र
डैकौसुरूँविदुर्गंव्येमहापंक्तिप्रस्तारपंक्तीविनःशासोभारद्वाजऐन्द्रीम
नुष्टुभंवाचस्पतिंवैश्वकर्मणींत्रिष्टुभंविश्वकर्मनैंद्रीवैश्वकर्मण्यग्नयेत्वादे

वार्षाण्यदाभ्यदेवत्यानिव्रेशीनांत्वासौम्यानि ॥ ३२ ॥ सत्रोत्थानं
देवानामार्षमिहरातिः पशुदैवतमुपसृजन्नुष्णिगाग्नेयीसत्रस्यबृहतीयज
मानानामात्मस्तुतिषुवंतंपरुच्छेपऐंद्रीमत्यष्टिंस्त्र्यवसानामाद्योर्द्धंर्चंऐं
द्रापार्वतः परमेष्ठीनैमित्तिकान्याध्यायाद्वसिष्ठस्यार्षंलिंगोक्तदेवतानि
चतुस्त्रिꣳ शद्ययोर्वैष्णववारुणीं त्रिष्टुब्देवांदिवमाशीर्लिंगोक्तदेवताश्च
तुस्त्रिꣳशद्धर्मंदेवत्यापंक्तिस्त्रिष्टुब्वा यज्ञस्ययज्ञदेवत्यात्रिष्टुबापवस्व
सौमींगायत्रीं नैध्रुविः कश्यपः ॥ ३३॥ अथवाजपेयोबृहस्पतेरार्षम् ॥
इंद्रस्यचदेवसावितः सावित्रीत्रिष्टुब्ध्रुवसदमैंद्राणित्रीण्यपाꣳरसदेव

त्यानुष्टुब्ग्राहालिंगोक्तदेवतानुष्टुप्संपृचौयजुषीन्द्रस्यरथोवाजस्यपा
र्थिव्यतिजगत्यंत्यः पादः सावित्रोप्स्वन्तरश्वदेवत्यानवसानापुरउ
ष्णिक्वातोवातिस्रोश्वस्तुतयउष्णिक् त्रिष्टुब्जगत्योवाजिनोश्वादेव
स्याहंलिंगोक्तानिवाजिनोश्वाएषस्यद्वेदधिक्रावावामदेव्योश्वदेवत्येज
गत्यौशन्नोवासिष्ठोविराजंतेनोनाभानेदिष्ठोजगतींवाजेवाजेवसिष्ठस्त्रि
ष्टुभमामाप्राजापत्यांवाजिनोश्वाः ॥ ३४ ॥ आपयआयुर्यज्ञेनप्राजाप
त्यानिप्रजापतेःस्वमृतायजमानोस्मेदिशोनमःपृथिवीयमासंदीयंता
सुन्वन्वाजस्यप्राजापत्यंतृचंत्रैष्टुभमꣳसोमंतृचंतापसऽआद्यावैश्वदेव्य

निरुक्तानुष्टुब्द्वितीयालिंगोक्तदेवतातृतीयाऽऽग्नेयीप्रनोलिंगोक्तागाय
त्रीसरस्वत्यैसुन्वन्नाग्निः सप्तदशालिंगोक्तदेवतानि ॥३५॥ अथराजसूयो
वरुणस्यार्षम् ॥ एषतेपार्थिवमाग्निनेत्रेभ्योदेवार्षाण्याध्यायाद्दशाद्यानि
दैवान्यग्नेसहस्वदेवश्चवादेववातश्चभारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्री
णिरक्षोघ्नानिसविताद्वेयजमानः ॥३६॥ आपोदेवाआपीत्रिष्टुप् ॥ वृष्ण
ऊर्म्मिर्लिंगोक्तानि मधुमतीरनाधृष्टाआपसोमस्यचर्माग्नेयोलिंगोक्ता
न्यनिभृष्टमापꣳसधमादोवारुणीत्रिष्टुप्क्षत्रस्य चतुर्णांतार्प्यपांड्वाधी
वासोष्णीषाणींद्रस्यधनुर्म्मित्रस्यबाहूत्वयायंधनुर्हबाषणामिषवआ

वि:प्राजापत्यंपराणिलिंगोक्तानि॥३७॥अवेष्टामृत्युनाशनम् ॥प्राचींपंचानांयजमान:प्रत्यस्तमासुरंमृत्योरोजोसिरुक्मोहिरण्यरूपो मैत्रावरुणीत्रिष्टुब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापींत्रिष्टुब्विष्णोस्त्रीणिलिंगोक्तानिसुन्वन्प्रजापतेनप्राजापत्यात्रिष्टुब्यजुंमध्यायममुष्यजूरुद्रयद्रौद्रम् ॥ ३८ ॥ इंद्रस्यलिंगोक्तानि ॥ मातेसंवरण:प्राजापत्यऐंद्रींत्रिष्टुभममग्नयेलिंगोक्तानिपृथिविमातभूमिर्हꣳसोवामदेव:सौरीꣳसप्रपंचपरब्रह्माभिधायिनीमातिजगतीमियच्छतमानावृर्गासिशाखेन्द्रस्यबाहूस्योनास्यासंदीक्षत्रस्याधीवासꣳस्योनाꣳसुन्वन्निषसादशुन:शेपो

वारुणींगायत्रीमाभिभूरस्यक्षायजमानोवाब्रह्मँस्त्वमामंत्रणानिपंच
लिंगोक्तानींद्रस्यस्फ्योग्निःपृथुराग्नेयꣳस्वाहाकृताअक्षाःसवित्रालिंगो
क्तदैवतम्॥३९॥अथचरकसौत्रामण्यश्विनोरार्षं॥ अश्विभ्यांत्रीणिलिं
गोक्तानिवायुःसौमीगायत्रीकुवितृच॰सुकीर्तिःकाक्षीवतआद्यासौम्य
निरुक्तात्रिष्टुब्युवमनुष्टुप्पुत्रामिवात्रिष्टुबश्विसरस्वतींद्रदेवत्येअश्विसर
स्वतीन्द्रदेवत्ये ॥४०॥ इतिसर्वानुक्रमणिकायांप्रथमोऽध्यायः॥ १ ॥
सू.अ. २ अथाग्निंप्रजापतिरपश्यत् ॥ साध्यावापश्यन्त्सोग्निःपंचचितिकः प्रथ
माचितिः प्रजापतेर्द्वितीयादेवानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्थ्यं

षीणां पंचमीपरमेष्ठिनोऽथ प्रतिकर्मदर्शिनोषुञ्जानोष्टौसावित्राणिसं
वितापश्यदाद्यातृतीयाचानुष्टुप्चतुर्थीषष्ठ्यौजगत्यौद्वितीयागायत्री
पंचमीत्रिष्टुबिमंनोषजुरंतागायत्र्यनवसानाददेभ्रिर्हस्तेनुष्टुब्यजुरंता
॥ १ ॥ प्रतूर्तनाभानेदिष्ठः ॥ आश्वीमास्तारपंक्तिषुंजाथांकुश्रिगार्द
भींगायत्रींषोगेयोगेशुनःशेपआजींप्रतूर्वंस्त्रिष्टुब्विराड्रूपाषजुर्गर्भारु
षजुःपृथिव्यास्त्रीण्याग्नेयान्यन्वग्निराग्नेयींत्रिष्टुभंपुरोधसआगत्यमयो
भुवआश्वीमनुष्टुभमाक्रम्याऽनुष्टुब्द्यौस्तेबृहत्युत्क्रामाविराडुदक्रमीत्रि
ष्टुबात्वाद्धेगृत्समदआग्नेष्षौपरिसोमकोगायत्रीं परित्वापायुरनुष्टुभं

त्वमग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याआग्नेयम् ॥ अपांपुष्करपर्ण
ꣳस्वराट्पंक्तिःशर्मद्वेअनुष्टुभौकृष्णाजिनपुष्करपर्णेपुरीष्योग्निस्त्वामग्ने
तृचंभारद्वाजआग्नेयंगायत्रꣳसीदहोतर्देवश्रवादेववातश्च त्रिष्टुभंनिहो
तागृत्समदःसꣳसीदस्वप्रस्कण्वोबृहतीम् ॥ ३ ॥ अपोदेवीः ॥ सिंधु
द्वीपआपीन्यंकुसारिणीꣳसंतेत्रिष्टुप्पार्थिवोद्वौवायव्योर्द्धःसुजातोनु
ष्टुबाग्नेय्युदुतिष्ठविश्वमनाःपथ्याबृहतीमूर्द्धःकण्वउपरिष्टाद्बृहतीꣳस
जातस्त्रितास्त्रिष्टुभꣳस्थिरोरासभेऽयनुष्टुबुष्णिग्वाशिवोभवाजीपथ्याबृ
हतीप्रैतुलिंगोक्तमहापंक्तिस्त्र्यवसानाग्नेगायत्र्येकपदाग्नेय्यतमग्निमाग्ने

ये ओषधयास्त्रिष्टुबनुष्टुभावोषाधिदेवत्ये व्यस्यन्नाग्नेयोर्द्धंचौंविपाजसोत्कीलः कात्यआग्नेयींत्रिष्टुभम् ॥ ४ ॥ आपोह्यापर्ठंसिंधुद्धिपस्तृचंगायत्रंमित्रउपरिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्रौद्रीसर्ठंसृष्टां द्वेसिनीवालीदेवत्येउखामादित्यामखस्यमृतिंपडोवसवस्त्वालिंगोक्तानिसर्वत्रादित्यैरास्नादितिरौषंकृत्वायायादित्योष्णिगदितिरावटंदेवानांपंचौखानिमित्रस्याविश्वामित्रोमैत्रींगायत्रींदेवस्त्वासावित्रीबृहत्युत्थायपूर्वार्द्धंर्चंऔषउत्तरोमैत्रः ॥ ५ ॥ आकूतिंलिंगोक्तान्यौद्गृभणानि ॥ मास्वौख्यौगायत्रीत्रिष्टुभावाग्निश्चपादाआग्नेयोद्धंनः सोमाहुतिराग्नेयींगा

यत्रीं परस्याविरूपऽआंगिरसःपरमस्याऽआरुणिरनुष्टुभंयदग्नेद्वेजमदग्निरहरहर्नाभानेदिष्ठस्त्रिष्टुभौयाःसेनाअनुष्टुभःसर्वाआग्नेय्यौंत्योपपरिष्टाद्बृहती ॥ ६ ॥ इशानोवत्सप्री ॥ त्रिष्टुभठंरौक्मीनक्तोषासाकुत्सऽआग्नेयींविश्वाइयावाश्वःसावित्रींजगतीठंसुपर्णःकृतिश्चतुरवसानागारुत्मी विषघ्नी विष्णोर्लिंगोक्तन्यक्रंदद्वत्सप्रीराग्नेयींत्रिष्टुभमग्नऊर्ध्वबृहत्यग्नेमहाबृहतीपुनर्गायत्र्यावात्वाध्रुवोनुष्टुभमुदुत्तमठंशुनःशेपोवारुणींत्रिष्टुभमग्नेत्रितआग्नेयीठंहठंसउक्ताजगतीहयजुरन्तांतेबृहद्यजुः सीदत्वमाग्नेयीत्रिष्टुभंतरग्नेनुष्टुभौ ॥ ७ ॥ दिवस्पर्याग्नेयंत्रैष्टुभ

म् ॥ द्वादशर्चंवत्सप्रीर्भालंदनः समिधाग्निंविरूपाक्षआंगिरसआग्नेयं
गायत्रमुदुत्वातापसोनुष्टुभं प्रेदनुष्टुप्प्रप्रायमाग्नेयींवासिष्ठस्यस्त्रिष्टुभ
मापोदेवीराप्यप्स्वग्नेविरूपऽआग्नेयींगायत्रीगर्भोअसितिस्त्रोनुष्टुभो
